KÂVYAMÂLÂ.

A Collection of old and rare Sanskrit Kâvyas, Nâtakas, Champûs, Bhâṇas, Prahasanas, Chhandas, Alankâras &c.

PART IX.

EDITED BY

MAHÂMAHOPÂDHYÂYA PAṆDIT SHIVADATTA

OF

JAIPUR

AND

VÂSUDEVA LAXMAṆ S'ÂSTRI PAṆAS'IKAR.

Published by Tukaram Javaji, and Printed by Ramchandra Yesu St
"Nirnaya sagar," Press, 23, Kolbhat Lane, Bombay.

॥ श्रीः ॥

काव्यमाला।

नाम

नानाविधप्राचीनकाव्यनाटकचम्पूभाणप्रहसन-
च्छन्दोलंकारादिसाहित्यग्रन्थानां
संग्रहः।

नवमो गुच्छकः।

जयपुरवासिमहामहोपाध्यायपण्डितशिवदत्तशर्मणा,
मुम्बापुरवासिपणशीकरोपाह्वलक्ष्मणशर्मात्मज-
वासुदेवशर्मणा च संशोधितः।

द्वितीयं संस्करणम्।

स च

मुम्बय्यां

तुकाराम जावजी श्रेष्ठिभिः

स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये [illegible] मुद्रयित्वा प्राकाश्यं नीतः।

शाकः १८३८, खिस्ताब्दः १९१६.

मूल्यमेको रूप्यकः।

अनुक्रमणिका ।

पृष्ठानि ।

१ आनन्दवर्धनाचार्यकृतं देवीशतकम् (कय्यटकृत टीकया समेतम्) १

२ अवतारकविप्रणीतमीश्वरशतकम् (सटीकम्) ३१

३ मधुसूदनकविप्रणीतमन्यापदेशशतकम् ६४

४ लक्ष्मणाचार्यप्रणीता चण्डीकुचपञ्चाशिका ८०

५ विद्यावागीशकविविरचितं कौन्तेयवृत्तम् ९२

६ उत्प्रेक्षावल्लभकविविरचितं सुन्दरीशतकम् १००

७ श्रीनारायणपण्डिताचार्यविरचिता शिवस्तुतिः (सटीका).... १०९

८ श्रीमच्छंकराचार्यभगवत्पादविरचितं त्रिपुरसुन्दरीमानसिकोप-
चारपूजास्तोत्रम् ११४

९ श्रीसुन्दराचार्यकविनिर्मितं गीतिशतकम् १३५

१० श्रीसामराजदीक्षितविरचितं त्रिपुरसुन्दरीमानसपूजनस्तोत्रम् १४०

११ श्रीशंकराचार्यविरचितं चतुःषष्ट्युपचारमानसपूजास्तोत्रम् १५१

काव्यमाला ।

श्रीमदानन्दवर्धनाचार्यकृतं
देवीशतकम् ।

श्रीकय्यटकृतया टीकया सहितम् ।

नमोऽस्तु वागधीशाय हयग्रीवाय विष्णवे ।
कौमोदकीचक्रशङ्खकमलाङ्कितपाणये ॥
प्रणम्य परमं धाम यत्प्रसादाज्ज्वलन्त्यमी ।
महामोहमहिम्नार्ता रविताराधिपानलाः ॥
उच्चिक्षिप्सुरलं स्वबुद्धिरचितैः पर्यायशब्दैर्वृथा-
टीकां वल्लभदेव उत्तममतिर्यत्नं भवानीस्तुतेः ।
पर्यायैः क्रियया समं कविकृतान्पाठान्पठन्व्यस्यद-
धन्द्रादित्यतनूज इत्थमकरोत्तस्यैव नम्रा नवाम् ॥
आनन्दवर्धनकविप्रवरप्रणीतकाव्ये विभान्यमतिना क्रियते मयेयम् ।
किं वा पिपीलकशतानि न संश्रयन्ते मत्तेभदन्तपदवीहतसंकसाराम् ॥
विषमेऽत्र काव्यमार्गे गुरवे वा स्खलति मामकी धिषणा ।
कौलेय निसरणं (?) संप्राप्य शनैः शनैस्तदपि यातु ॥

सर्वत्र काव्यारम्भे संबन्धाभिधेयप्रयोजनानि वक्तव्यानि । 'सिद्धिः श्रोतृप्रवृत्तीनां संब-न्धकथनाद्यतः । तस्मात्सर्वेषु शास्त्रेषु संबन्धः पूर्वमुच्यते ॥ सर्वस्यैव हि शास्त्रस्य कर्मणो

---

१. ध्वन्यालोकापरनामधेयस्य ग्रन्थस्य कर्ता श्रीमदानन्दवर्धनाचार्यः काश्मीरेषु [illegible] राजतरङ्गिण्यामुक्तम्. अयं देवीशतकटीकाकर्ता कय्यटोऽपि [illegible] राज्ये सैव ४०७८ मितेषु गतवर्षेषु (९७८ खिस्ताब्दे) टीकां [illegible] टीकामिमां विलोकयामि [illegible] अयं कय्यटश्चन्द्रादित्यसूनुर्वैयाकरणकय्यटात् [illegible] इत्यनुमीयते. [illegible] देवीशतकस्य पुस्तकद्वयमासीदस्माकं [illegible] श्रीदुर्गाप्रसादशर्मणा [illegible] [illegible] कश्मीरदेशादानीय [illegible]
२. 'रत्नवत्' ख. ३. 'उत्पन्नानि' ख. ४. ख-पुस्तके 'मत्तेभदन्तपदवीं इतस्मरे' इत्यत्र [illegible] अशुद्धिरस्ति.

[illegible]

अनन्तमहिमव्याप्तविश्वां वेधा न वेद याम्।
या च मातेव भजते प्रणते मानवे दयाम् ॥ १ ॥
नतापनीतक्लेशायाः सुरारिमथनात्मनी।
न तापनी तनुर्यस्यास्तुल्या नारंनताग्नी ॥ २ ॥
दक्षयज्ञा विधेर्यान्ति यया सर्वमयो दया।
या साक्षात्या च जनितत्रितिसर्गत्रयोदया ॥ ३ ॥
याश्रिता पावनतया यातनाच्छिदनीचया।
याचनीया धिया मायायामायासे स्तुताशिता ॥ ४ ॥
तमांसि ध्वंसमायान्ति यस्याः स्तुत्यादरेण वः।
तस्याः सिद्ध्यै धियां धातुः फलन्तां पादरेणवः ॥ ५ ॥
(कुलकम्)

यां धातुः पादरेणवो वः सिद्ध्यै फलन्ताम्। तस्या यर्नानिम्नमानसरयाया
ऽब्जजन्याः संबन्धिनः पादरेणवश्चरणपांसवो यो युष्माकं सिद्ध्यै समीहितसंप-
संपद्यन्ताम्। यां वेधा न वेद। यां देवीं वेधा ब्रह्मा न वेद न वेत्ति न
पिशब्दोऽत्रार्थोऽवगम्यते। वेधा अपि न वेत्ति कोऽन्यो वराको ज्ञास्यतीति।
ावृतासौ क्षमते न धातुः'। धातुः प्रजापतेरपि न क्षमते इत्यर्थः। किं-
अनन्तमहिमव्याप्तविश्वाम्। अनन्तो भगवान्विष्णुस्तस्य महिमा माहात्म्यं
रितं विश्वं त्रैलोक्यं यया ताम्। हरिमाहात्म्यवशेन हि भगवती जगदापूरय-
अथवा अनन्तैर्बहुभिरप्रमेयैर्महिमभिर्व्याप्तं विश्वं यया ताम्। अथ च या
जननीव प्रणते मानवे प्रह्वे भक्ते नरे दयां घृणां भजते पोषयति। यस्या अ-
या अपि भक्तैर्भक्तिसुलभत्वमुक्तं भवति। यां वेधा अपि न वेद सा भक्त्या
बोधमे सैाफल्यम् ॥ १ ॥

यस्यास्तापनी तनुर्भानवी मूर्तिः न न तुल्या। सदृशैवेत्यर्थः। तपनस्येयं
ूताया देव्याः। नतापनीतक्लेशायाः। नतानां भक्तानामपनीता विनाशिताः क्ले-
यया तादृश्याः। कीदृशी च ता[illegible]। सु[illegible] देवशत्रुमर्दनी।

सुरारिजनांस्तापयतीति तच्छीलेति । देव्यप्येवंभूतैवेति तयोस्तुल्यत्वम् । तथा अदीनतामौजिलमापयति प्रापयत्यसावदीनतापनी । उच्छ्रायप्रदा । इत्युभयोः समानम् ॥ २ ॥

यया देव्या वाग्रूपया विधेर्ब्रह्मणो वक्त्रपद्मा मुखनलिनानि भान्ति शोभन्ते । कीदृशाः सर्गलयः । ऋच एवालयः [भ्रमराः] ऋगालयः वेदखण्डत्रयं सह तेन वर्तत इति । या च देवी साक्षाद्दया । दयामयीत्यर्थः । तथा या च देवी जनितस्थितिसर्गलयोदया जनिता विहिताः स्थितिसर्गलयाः पालनोत्पत्तिविनाशा येनासौ जनितस्थितिसर्गलयो भगवान्विष्णुस्तत उदयो यस्याः सा । भगवच्छक्तिरेव सा देवीति भावः । अथवा जनित उत्पादितः स्थितिसर्गलयानामुदयः प्रभवो यया ॥ ३ ॥

अन्यदपि । या पावनतया पवित्रत्वेनाश्रिता सेविता । पवित्रेत्यर्थः । तथा च या देवी यातनाच्छित् । यातना प्राणिवर्द्धितदुष्टकर्मविपाकः । अन्यच्च अनीचया अनूनया धिया प्रज्ञया मायाया आयामोऽविद्याप्रपञ्चस्तस्यायास उपघातो निवारणं तं याचनीया प्रार्थनीया । तथा श्रिया लक्ष्म्या स्तुता ॥ ४ ॥

तथा यस्या देव्याः स्तुत्यादरेण स्मरणाभिनिवेशेन तमांसि मोहाबोधादयो ध्वंसं विनाशमायान्ति प्राप्नुवन्ति तस्या एतादृश्या धियां मानुर्धिषणानां प्रसविन्याः संबन्धिनः पादरेणवश्चरणरजांसि वः श्रियं कल्पन्तामिति ॥ ५ ॥

ऋषीणां सादयामास या तमांसि त्रयीमयी ।
पायाद्वः सा दयामाधिच्छिदं जगति बिभ्रती ॥ ६ ॥

सा देवी वो युष्मान्पायाद्रक्षतात् । त्रयीमयी ऋग्यजुःसामरूपा ऋषीणां मुनीनां तमांस्यज्ञानानि सादयामास नाशयांबभूव । त्रय्यामुदितायामृषीणां हि तमांसि नष्टानि । तथा दयां करुणां बिभ्रती दधाना । किंभूतां दयाम् । जगति विश्वस्मिन्नाधिच्छिदं मनःपीडाविनाशिनीम् ॥ ६ ॥

स्मरद्विषा या ययाचे यया चेयं विधेः क्रिया ।
यां चाच्युतोऽपि तुष्टाव तुष्टा वः सास्तु पार्वती ॥ ७ ॥

सा पार्वती हिमवत्कन्या वो युष्माकं तुष्टा प्रसन्नास्तु भवतु । या देवी स्मरद्विषा हरेण ययाचे प्रार्थिता । यया देव्या हेतुभूतया विधेः प्रजापतेरियं प्रत्यक्षदृश्या सृष्टिलक्षणा क्रिया सिद्धा । यां चाच्युतोऽपि तुष्टाव । हरिहरहिरण्यगर्भादिभिः स्तुतेत्यर्थः ॥ ७ ॥

या दयावनयागेन साराधा नयसारया ।
हरिंकृतवहारस्याय सायामा विजिता यया ॥ ८ ॥

प्रतिलोमानुलोमेन एकार्थ द्वितीयः श्लोकः—

यायनाशिविगायया सा यस्या हा वन केरिह ।
या रसायनधारा स्या न गेयानवना दया ॥ ९ ॥

[illegible] ।
[illegible] ॥ १० ॥

(विशेषकम्)

[illegible]

[illegible] ॥ ९ ॥

[illegible] ॥ १० ॥

अयुद्ध साधुमानाय सामरा या सहारिणा ।
खड्गेन दीप्ता देवानां सामरामामहारिणा ॥ ११ ॥
चरणाघातनिहतकासरा च रणाजिरे ।
रराज या नयजयैरराजराजनानता ॥ १२ ॥
सापताद्रोऽम्बिकाभ्यर्च्यनामा नै न यशोऽमितः ।
तनोति प्रणतो यस्या ना मानैनयशोभितः ॥ १३ ॥

(इदमपि विशेषकम्)

साम्बिका जननी वो युष्मानवतादक्षतात् । या सामरा सदेवा सती । अथवा साम सान्त्वं राति ददाति सामरापि सती साधुमानाय सज्जनपरिरक्षणकारिणा प्रभुणा समम- [illegible] युद्धमकार्षीत् । कीदृशी देवी । खड्गेन करवालेन दीप्ता उज्ज्वला । कीदृशेन । देवानाममराणां सामरं सङ्ग्रामभयमायासं [illegible] हरति तच्छीलस्तेन सामरामामहारिणा । [illegible] ॥ ११ ॥

---

१. 'नयन' क. २. 'नयन' क.

तथा या देवी नयजयैर्नीत्युत्कर्षे रराज शुशुभे । किंभूता । रणाजिरे सङ्ग्रामाङ्गने चरणाघातनिहतकासरा पादाहतिव्यापादितमहिषासुरा । अन्यत्, अराजसजनिता । रजःप्रतिषेधाद्दूरतरे तमो निषिद्धम् । तत्सात्त्विकजनप्रणतेत्यर्थः । यथा च 'अरजस्काः परं पदम्' ॥ १२ ॥

अपरं यस्या देव्या ना मनुष्यः प्रणतः प्रह्वो न नाभितः समन्ताद्यशः कीर्तिं तनोति विस्तारयति । अपि तु तनोत्येव । स च नाभ्यर्च्यनामा पूज्याभिधानः । देवी चाभ्यर्च्या नामो नमनं यस्या इति । अन्यच्च स पुमान्माननयशोभितः । माननयाभ्यामलंकृत इत्यर्थः ॥ १३

> संयतं याचमानेन यस्याः प्रापि द्विपा वधः ।
> संयतं या च मानेन युनक्ति प्रणतं जनम् ॥ १४ ॥
> या दमानवमानन्दपदमाननमानदा ।
> दानमानक्षमानित्यधनमानवमानिता ॥ १५ ॥

(मुरजबन्धः)

> सा रक्षतादपारा ते रसकृद्गौरवाधिका ।
> सारक्षतादपारातेरसकृद्गौरवाधिका ॥ १६ ॥

(समुद्रकम्) (इदमपि विशेषकम्)

सा देवी ते रक्षतादवतात् । यस्या द्विपा शत्रुणा संयतं सङ्ग्रामं याचमानेन प्रार्थयमानेन वधः प्रापि मरणमलम्भि । या च देवी प्रणतं प्रह्वं संयतं जनं समनियमवन्तं लोकं मानेन युनक्ति पूजया संभावयति ॥ १४ ॥

या देवी दमानवमानन्दपदम् । दमेनेन्द्रियजयेनानवमः श्रेष्ठो य आनन्दपद आनन्दस्थानम् । विरक्ता हि शमसुखलाभः । किं च, आननमानदा । आननस्य मुखस्य मानं पूजां आपादनां ददाति प्रयच्छति । निरपभ्रंशपदभाषणान्मुखं पूज्यं भवति । एवं च पदद्वयेन प्रकाशरूपं वाग्रूपं च देव्या आगमोक्तं प्रकाशितं भवति । तथा दानमानक्षमानित्यधनमानवमानिता । दानं सत्पात्रे धनसमर्पणम् । मानं ज्ञानम् । क्षमा रोषोपशमः । त एव नित्यमविनश्वरं धनं येषां ते मानवास्तैः पुंसां तैर्मानिता पूजिता । दानादिभिरेव देव्यर्चना यथा भवति न तथा पुष्पादिभिरित्यर्थः । एष मुरजबन्धः ॥ १५ ॥

सा अपारा अपर्यन्ता गौर्वेन्दु अबाधिका अविघ्नकारिणी रक्षतात् । तत्रस्तत्पुरुषसंज्ञे । अगाधमुत पुनः । रसाङ्कृत् रसो रागं करोति ज्वलति च सा रसाङ्कृत् । अर्जितं निरीक्षं च वस्तु रसानाम् । कीरस्य ते । अपरातेर्निःशब्दो । किं च, गौरवाधिका गौरवेण पूज्यतयाधिका । सर्वेषां गुरुरित्यर्थः । एष समुद्रबन्धः ॥ १६ ॥

---

१. 'आनन्दं' क. २. 'मानन्द' क.

अनुत्तमोहराशयो भवन्ति यामनाश्रिताः।
अनुत्तमो हराशयो यया चिरं च रञ्जितः॥ १७॥
अनन्तरागतापायास्तारयित्री भवापदः।
अनन्तरागतापायाः सा वो गौरी ह्रियात्क्रियाः॥ १८॥
(संदानितकम्)

सा गौरी वो युष्माकमनन्तरागतापायाः अनन्तरमविद्यमानान्तरं कृत्वा आगताः प्राप्ता अपाया विघ्ना यासां ताः। अनिष्पन्ना एवोत्पन्नविनाशा याः क्रियाश्चेष्टा ह्रियादपहरतु। दुष्क्रिया विनाशयत्वित्यर्थः। यां देवीमनाश्रिताः शरणं न प्राप्ता नरा अनुत्तमोहराशयोऽप्रेरिताज्ञाननिवहा अविनाशिततमसो भवन्ति संपद्यन्ते। यया गौर्या अनुत्तमोऽविद्यमानप्रधानो हराशयो महादेवचित्तं चिरं बहुकालं रञ्जित आवर्जितः। तथा या देवी भवापदः संसारदुःखात्। भव एवापत् भवस्येति वा। कीदृश्या भवापदः। अनन्तोऽपर्यन्तो रागतापः स्मरार्तिदाहो यस्यास्ततस्तारयित्री उद्धर्त्री। भवापद इति कृद्योगे कर्मणि षष्ठी। अथवा अनन्ता ये रागजनितास्तापास्तानायस्यति क्षिपतीति देवीविशेषणम्॥१७॥१८

यामायासजिदासक्तशोकजालस्य पातिनी।
या माता सर्वदा भक्तलोकजालस्य पालनी॥ १९॥
(गोमूत्रिकाबन्धः)

सामरागमनायासं त्यक्त्वा सार्धं सुरारिभिः।
सामरा गमनायासत्वरिता युधि यद्गणाः॥ २०॥
सामोदयाजया शातैः शस्त्रैः शत्रौ हते यया।
सामोदया जयाशा तैर्गीर्वाणैर्गर्वतो जहे॥ २१॥
ययायायाय्यया यूयं यो योऽयं येययैय याम्।
ययुयायिययेयाय ययैयेऽयायाय याययुक्॥ २२॥
साव्याद्गौरी सदा युष्मान्सदायुष्मान्समृध्यति।
शरणं यां नरोगच्छन्न रोगच्छन्दमेति च॥ २३॥
(पञ्चभिः कुलकम्)

सा गौरी गिरितनया युष्मान्भवतः सदा सततमव्यात्पायात्। या भक्तलोकजालस्य

1. 'विधाता' क. २. 'अनिष्पन्नविनाशा याः' क. ३. 'विद्याप्रधानो' क. ४. 'उद्धरन्ती' ख. ५. 'जा[illegible] [illegible]यो' ख. ७. 'ये ये' क. ८. 'जातस्य' क.

प्रणतजनसमूहस्य यामायासजित् । याममन्तककृतमायासमुपतापं जयलभिभवति । या माता करुणापरा सती सर्वदा सर्वकालं च भक्तानामेवासक्तशोकजालस्य पातिनी । आसक्तानि संलग्नानि शोकजानि खेदोद्भवानि यान्यालस्यानि तानि पातयति निहन्त्लवश्यमिति । भक्तलोकस्य जालं समूहस्तस्य पालनी गोप्त्री च । गोमूत्रिकाबन्धः ॥ १९ ॥

तथा यद्रूणा यस्याः संबन्धिनः पार्श्वकिंकराः सुरारिभिः सार्धं दैत्यैः सह युधि सङ्ग्रामे गमनायोद्यताः प्रवेष्टुं सादंकाराः सामराः सदेवाः सन्त आसन्नभूवन् । किं कृत्वा । सामर्षा सान्त्वसक्तिं त्यक्त्वा परित्यज्य । किंभूतम् । अनायासमक्रेशम् ॥ २० ॥

यया याजया जन्मरहितया सामोदया सदर्पया दाशी विपक्षे शातैः शस्त्रैस्तीक्ष्णैरायुधैर्दते निपातिते सति तैर्गीर्वाणैर्देवैः सामोदया जयाशा सान्त्वोद्भूता विजयाकाङ्क्षा गर्वतोऽभिमानाल्हृदे त्यक्ता । साम्न उदयो यस्या इति सामोदया ॥ २१ ॥

[यया आयाय अयि अया यूयं यः यः ऽयं येयया एय याम् ।
ययुयायियया इयाय ययौ अयायाय या आययुक् ॥ २२ ॥ इति पदानि ।]

अयि जनाः, यया देव्या हेतुभूतया यूयं भवन्तः आयायाविर्भूय अया विष्णुशरणा भवत । अं भगवन्तं वासुदेवं यान्त्ययाः संपद्यध्वम् । प्रभवस्य हि हेतुर्देवीति भावः । यथा च—'गोविन्दभगिनी देवी सदन्ते सद्गतिप्रदा । भगवती' इत्यागमः । यः यः अयं लोकः सामेय यां देवीं प्राप्य ययुयायियया इयाय । ययुभिरश्वैर्याति गच्छति तच्छीलो ययुयायी सूर्यः तं ययुयायिनं यातीति ययुयायिय । रविमण्डलभेदी । मुक्त इत्यर्थः । तस्य या गतिः । यानं या । 'अन्यत्रापि दृश्यते' इति क्विप् । तया ययुयायियया सूर्यमण्डलभेदिगत्या । 'णिचन्तो धातुत्वं न जहाति' इति परिभाषावचनात् 'आतो धातोः' इत्याकारलोपे कृते रूपमेतत् । इयाय जगाम । किंभूतया गत्या । येयया अवश्यप्राप्यया यो यो जनस्तां देवीं शरणमेति स स सूर्यमण्डलभेदिगत्या गच्छति । मुच्यते इति तात्पर्यार्थः । अन्यच्च या देवी अयायाय ययौ । अयो ज्ञानं दैवमनुकूलं वा कथ्यते तस्याय अयाय । अदनमदः प्रीतिः । तदर्थमयायाय ज्ञानप्राप्तये ययौ सिद्धिये । यस्माद्देवी आययुक् । आदेन ज्ञानेन धनागमनेन वा युनक्ति संबध्नाति । अयनमायः । अयं च यम् । एव इति ईदृग्रूपस्य ॥ २२ ॥

तथा यां देवीं शरणं गच्छन्नरः प्रपद्यमानः पुमान् । सदानुध्यान् धीमानचिरर्द्धिं सन् सद्गजादि समृद्धिं संपत्तिं प्राप्नोति । रोगच्छन्दं च नैति व्यपैरनुवर्तनं च न प्राप्नोति । व्याधिवशादंत्पथपाती न जातु भवति । यो देवीं शरणमेति स अनुगतोदयेनर्धं लभत इति तात्पर्यार्थः ॥ २३ ॥

धृतारपदा यया संपद्यानि सुरैररिपु ।
हन्ति या सा नन्दी दुरादपानि सुरैररिपुः ॥ २४ ॥

जितानया या नताजितारसातलसारता ।
न सावना नावसानयातनारिरिना सया ॥ २५ ॥

(सर्वतोभद्रः)

मनोभवारातिमनोभिरामया जरामयापाकरणैकदक्षया ।
मदक्षयान्निर्मलतां ददानया सदा नमास्था क्रियतां तयार्यया॥२६॥

(विशेषकम्)

तत्र भवतस्तया आर्यया गौर्या नमस्यास्था नीलग्रीविभिः सदा सर्वकालं क्रियतां विधीयताम् । यया देव्या गुर्वर्थिषु देवतासु शृंगारदा सम्प्रतिष्ठा संपत्समृद्धिरणानि जये दत्ता । सा च मादृशी परार्थसर्वात्मभावैरविरहिता अपापानि पापानि व्यसनानि या हन्ति हिनस्ति । येन । गुरुवैः साधुशब्दैः । सा च सुरदनुजादिसुरवैरुः ॥ २४ ॥

या जितानया अविद्यमानो नयो नीतिर्येषां ते जितानयाः । सया सा देवी नताजितारसातलसारता । नतानां भक्तानां आजितः संग्रामात् महारसाग्रणं विजयलक्ष्म्या सातता सविस्तारा । आततमाततम् इति । सारता दृढता । बहुतरं दार्ढ्यं सा देवीत्यर्थः । न सावना न । सद्भावनेन रक्षणेन वर्तते इति सावना न न सावना किं तु सावनैव । भक्तानां संरक्षणा । किं च अवसानयातनारिः । अवसाने अन्तकाले या यातना दुष्कृतिविपाकसंत्रासमरिः शत्रुः विनाशिनी । इना स्वामिनी । सर्वतोभद्र एषः । बन्धस्तु प्रसिद्ध एव ॥ २५ ॥

तया देव्या मनोभवारातिमनोभिरामया चित्तजन्मशत्रुचेतोनुकूलया त्रिनयनचित्तहारिण्या । तथा जरामयापाकरणैकदक्षया जरा पलितं आमया व्याधयस्तेषामपाकरणं निरस्कारः विनाशनं तत्र दक्षया चतुरया । अन्यच्च मदक्षयाददंकारविघाताद्धेतोर्निर्मलतां विरजस्कत्वं ददानया वितरन्त्या प्रयच्छन्त्या ॥ विशेषकमिदम् ॥ २६ ॥

समाययाविन्द्रहिताय या रणे समायया या न जितारिसेनया ।
स मा ययाचे हरमाश्रितः स्फुटं समा यया मुग्धतया मनोज्ञता॥२७॥

सा भावक्षालवर्या नुतविभवितनुर्या वलक्षावभासा
जानानस्याशयप्रा नवनलिनवनप्रायशस्याननाजा ।
सातं वर्मोननस्या रहसि रसिहरश्याननर्मावतंसा
पायादक्ता रणत्रा मतनमनतमत्राणरक्ता दयापा ॥ २८ ॥

(प्रतिपादं प्रतिलोमानुलोमः) (संदानितकम्

सा देवी अक्ता व्यक्ता पायादव्यात् । येन्द्रहि[illegible] समायरं

सेनया शत्रुपृतनया न जिता नाभिभूता । अपि च मुग्धतया कृशतया युक्तः स माधवो हरं महादेवमाश्रितः संश्लिष्टः सन् स्फुटं नूनं यया देव्या समा तुल्या मनोज्ञता रामणीयकानि ययाचे प्रार्थयामास । ततसमलावण्येच्छश्चन्द्रः स्फुटं हरं याचते ॥२७॥
[या च देवी] सा भावक्षालवर्या । क्षालनं क्षालः भावस्य चेतसः क्षालो नैर्मल्यं तत्र च या वर्या श्रेष्ठा । तथा नुतविभवितनुः । नुता विभविनी महाप्रभावा तनुर्मूर्तिर्यस्याः । वलक्षावभासा । वलक्षः शुद्धोऽवभासः प्रभा यस्याः । शुद्धप्रकाशरूपेत्यर्थः । किं च जानानस्य ज्ञानिनः आशयप्रा अभिलापपूरणी । तथा नवनलिनवनप्रायशस्यानना । प्रफुल्लकमलखण्डतुल्यमुखमुखी । तथा अजा जन्मरहिता । किं चाननस्था मुखगता सती सातं वर्म श्रेष्ठः कवचः । सदैव सतां वाग्रूपेण परमं संनहनं सेत्यर्थः । तथा रहसि विजने रसी रसिको योऽसौ हरः शंभुस्तस्य यानि स्थाने नर्माणि अवसरे परिहसितानि तानि अवतंसः कर्णाभरणं यस्याः सा । रणत्रा सङ्ग्रामत्राणिणी । अपरं मतनमनतमत्राणरक्षा । अतिशयेन मतमभिप्रेतं नमनं देवीप्रणामो येषां तेषां त्राणे रक्षा सक्ता । यतो दयापा । दयां करुणां पाति रक्षति आप्नोति वा । प्रणतानां दयापरेति भावः ॥ २८ ॥

उपासते कृष्टिकृतोदयां यां जना सदाराधनमीहमानाः ।
शंभोः प्रसिद्धा तनुतां वहन्ती गौरी हितं सा भवतां विधेयात् ॥२९॥
(अर्थत्रयवाची)

सा गौरी मृडानी भवतां युष्माकं हितमनुकूलं विधेयात्कुर्यात् । यां जना लोका उपासते सेवन्ते । यतः कृष्टिकृतोदयाम् । कृष्टीनां सूरीणां कृतो विहित उदय आविर्भावो यया ताम् । कीदृशा जनाः । सदा सततं सच्छोभनं वाराधनं संमुखीकरणं सेवामीहमानाः काङ्क्षन्तः । किंभूता देवी । शंभोः शर्वस्य तनुतां कायत्वं वहन्ती बिभ्राणा । प्रसिद्धा प्रथिता ॥ अथ च सा गीर्वाणी ईहितमभिमतं विधेयात् । कीदृशी । कृष्टिभिः सूरिभिः कृत उदयो विकाशो यस्याः । शंभोर्ब्रह्मण अतनुतामकृशतां वहन्ती प्रसिद्धा ॥ नर्मिन्द्रोक्त्येणापि सुव्यक्त स्थिता वागिति भावः । 'शंभू ब्रह्मेश्वरौ ज्ञेयौ' । यां जना उपासते । कीदृशाः । सतां साधूनामाराधनं चित्तग्रहणमीहमाना अभिलषन्तः ॥ अन्यच्च सा गौर्भूः वः ईहितं विधेयात् । यां जना उपासते अधितिष्ठन्ति । कीदृशाः । सदारा सकलत्राः । धनं वित्तमीहमानाः प्रार्थयमानाः । कीदृशीं स्माम् । कृष्टिभिः कर्षकैर्हलविलेखनैः कृत उदयः फलागमः । देवी च वाङ्मयी (मही) मूर्तिरपीति वाक्यार्थः ॥ २९ ॥

यां सद्य एव त्रिदशैः पुमांसः समा नमस्यन्ति सदानभोगाः ।
अपानि यस्याः प्रणता विपक्षैः समानमस्यन्ति सदा नभोगाः ॥ ३० ॥
यस्याः प्रभावो गुरुतां विपक्षसेना वधानन्दयिताहरस्य ।
गोम्बुजस्यादरतु श्रियं वः सेनाप्रधानं दयिता हरस्य ॥ ३१ ॥
(संदानितकम्)

सा इना ईश्वरी हरस्य गिरीशस्य दयिता वल्लभा वो भवतां श्रियै लक्ष्म्यर्थमवधानं प्रयत्नमावहतु विदधातु । यां पुमांसो नराः सद्य एव प्रणतेः समनन्तरमेव त्रिदशैर्देवैः समास्तुल्या नमस्यन्ति प्रणमन्ति । किं च सदानभोगाः । सह दानेन त्यागेन भोगैर्विषयानुभवैश्च वर्तन्ते ये ते । तथा यस्या देव्याः प्रणताः प्रह्वाः नभोगा नभसि गता इति विपक्षैः शत्रुभिः समानं सहाघानि पापानि सदा सर्वकालमस्यन्ति क्षिपन्ति ॥ ३० ॥

तथा यस्या देव्याःप्रभावो माहात्म्यं द्युसदां सुराणां विपक्षसेना वधानन्दयिता अरिवरूथिनीवधेन हननेनानन्दयिता परितोषयिता । किं चास्य मनोम्बुजस्य चेतःकमलस्य अहरिवाहः । विकासकलात् । एतद्देव्याः प्रभावस्य वा विशेषणम् ॥ ३१ ॥

सुरा जिता भावितदेवराजद्विपक्षमा यात रणादभीतम् ।
स्वापं न वो धाम हितं न नाम सदैवसेना भवतोहितानाम् ॥ ३२ ॥
सुराजिता भावितदेवराजद्विपक्षमाया तरणादभीतम् ।
स्वापन्नबोधामहितं ननाम सदैव सेना भवतो हितानाम् ॥ ३३ ॥

(महायमकम्)

सुरानिति द्वेषिजनैरभिद्रुतानुदाहरद्या स्वयमाहवोद्यता ।
शिवोऽद्य तापप्रशमस्तया तव प्रशस्तया तत्त्वदृशा विधीयताम् ॥ ३४ ॥

(विशेषकमिदम्)

तथा देव्या प्रशस्तया मङ्गलभूतया तव भवतः अद्यास्मिन्नहनि तत्त्वदृशा सारज्ञानेन शिवः श्रेयाननुकूलः······मसुख इति यावत् । तापप्रशम आध्यात्मिकाधिदैविकाधिभौतिकदोषत्रयस्य प्रशमो विनाशो विधीयतां क्रियताम् । या देवी सुरान्देवान्द्वेषिजनैः शत्रुजनैरभिद्रुतान्पलायितान्स्वयमाहवोद्यता सङ्ग्रामसंनद्धा सती इति वक्ष्यमाणप्रकारेणोदाहरदवोचत् । कथमित्याह—हे जिता अभिभूताः सुरा देवाः, रणात्सङ्ग्रामादभीतं निर्भयं कृत्वा यात गच्छत । मा भूद्भवतां सङ्ग्रामभयमित्यर्थः । भाविता देवराजद्विपस्य ऐरावणस्य क्षमा अशक्तता यैस्ते । अपरं वो भवतां हितं धाम अनुकूलं स्थानं न न नाम स्वापम् । सुप्रापमेवेत्यर्थः । अन्यच्च या देवसेना सह देवेन इनेन प्रभुणा च सुराजिताः सुष्ठु भ्राजिता अहितानां तर्कितानां चित्तविषयाणां शत्रूणां मध्ये भवतः संपत्······समस्तश्लोकयमनान्महायमकमिदम् ॥ ३२ ॥ ३३ ॥ ३४ ॥

वक्रं बिभ्रत्युपहितचन्द्रायासं या संमोहप्रशमनसूर्याकारा ।
कारानीतामरमरिमाचिक्षेप क्षेपत्यक्ता रणभुवि सा वः पायात् ॥ ३५ ॥

(काञ्चीयमकम्)

सा देवी वो युष्मान्पायात् । या उपहितचन्द्रायासं वक्रं बिभ्रती स्वकान्तिनिर्यनोपहितो दत्तश्चन्द्रस्य शशाङ्कस्यायासो ग्लानिर्येन तादृशं वक्रं मुखं बिभ्रती धारयन्ती । तथा

संमोहो हार्दं तमस्तत्प्रशमने विनाशने सूर्याकारा भानुतुल्या । सूर्यो यथा तमोविनाशने दक्षस्तद्वद्धार्दतमोनिवृत्तये देवीत्यभिप्रायः । तथा या देवी क्षेपत्यक्ता भर्त्सनरहिता अनिन्द्या रणभुवि आहवभूमौ कारानीतामरं बन्धनस्थापितदेवं अरिं शत्रुं आचिक्षेपाजुहाव। समरार्थ-माहूतवतीत्यर्थः । काञ्चीवन्मेखलावत्स्तम्भनात्काञ्चीयमकम् । जलधरमाला नाम वृत्तम् ३५

हितेहितेऽस्तु ते स्तुते जिताजितामितामिता ।
जयाजया जनोऽजनो यया ययावलं बलम् ॥ ३६ ॥

(आवलिर्नाम यमकमिदम्)

जयाख्या देवी ते तव हितेहितेऽनुकूले चेष्टितेऽस्तु भवतु । हितं च तदीहितमिति । त्वद्धितकार्ये वर्ततामित्यर्थः । कीदृशे । हितेहिते स्तुते प्रशस्ते । कीदृशी देवी । जिताजिता लब्धजयसमरतामिता गता । तथा अमिता अपरिच्छिन्नस्वरूपा । अन्यत्, यया हेतुभूतया । जनो लोकः अलमत्यर्थं बलं ययौ जगाम लेभे । कीदृश्या यया । अजया जन्मरहितया । कीदृशो जनः । अजनः जन्मरहितः सन् । जननं जन इति कृत्वा नञ्समासः । प्राप्ततत्त्व-ज्ञान इत्यर्थः । मुमुक्षुर्जनस्तत्प्रसादान्मोक्षावाप्तिसामर्थ्यं लभत इत्युक्तं भवति॥ ३६ ॥

सक्तिं वः सुकृतार्जने विदधती सत्रा यतां त्रायतां
दुर्गा दुर्मददूषितोद्धतधियामायासदा या सदा ।
साधूत्साहविधानसक्तमनसां मुख्या ततां ख्याततां
संस्मृत्यैव·········[मत्सरभरस्फीतापदां तापदाम्] ॥ ३७ ॥

················आयासदा क्लेशदायिनी । तथा साधूत्साहविधाने सज्जनानामुत्साह-करणे सक्तमनसामभिनिविष्टचेतसां लोकपालानां मुख्या प्रधानम् । अन्यच्च संस्मृत्यैव स्मरणेनैव ततां विस्तीर्णां ख्याततां······ । मत्सरभ (भ)रो द्वेषबाहुल्यं स एव स्फीतो विप्रलाप (?) आपद्दौर्भाग्यं येषां तेषां तापदां खेदप्रदाम् ॥ ३७ ॥

या मूर्तिं किमपि स्मरारिवपुषा धत्ते समायोजितां
यां दृष्ट्वैव विनाशमाप सहसा शुम्भः समायोऽजिताम् ।
या नम्रैः सुरसिद्धकिंनरनरैः खेदं विना शस्यते
सा हेतुर्भवतां त्रिलोचनवधूरर्थीविनाशस्य ते ॥ ३८ ॥

त्रिलोचनवधूर्हरपत्नी ते भवतः अर्थीविनाशस्यार्थ्यसर्वार्थप्रतिघातस्य हेतुर्निमित्तं भवता-न्मोपदनाम । या स्मरारिवपुषा मदनारिपुरारिणा समायोजितां मिलितां मूर्तिं तनुं किमपि येनापि हेतुना धत्ते धारयति । यां चाजितं समरभूमौ शुम्भाख्यो दैत्यः समायः समरहटो ऽपि गर्वदृप्तावलोक्यैव सहसा झटित्येव विनाशं मरणमप्राप लेभे । तथा सुरसिद्ध-गरुडैर्देवगन्धर्वकिंपुरुषैः खेदं विना आलस्यं विना शस्यते स्तूयते ॥ ३८ ॥

सायासायाखिलौघयाः शरणमकरणक्षुण्णदैत्यप्रवीरा
सैरं सैरंशगर्भेर्गहनतममहामोहहार्दं हरन्ती ।
दास्यान्नसादधाना सकलमभिहितं भक्तिभाजः स्मृतैव
स्तादस्तादभ्रदोषा द्विपदुपशमनी सर्वतः पार्वती वः ॥ ३९ ॥

पार्वती वो युष्माकं सर्वतः गमनादिर्देशकाद्विपदुपशमनी शत्रुमर्दिनी स्ताद्भवतात् । अस्ताः क्षिप्ता विनाशिता अदभ्रा महान्तो दोषा मूर्तामूर्त······तथा सायासायाः सोपसायासाखिलौघया भूर्भुवःस्वर्लक्षणायाः शरणमभयपदस्थानम् । अन्यथाकरणं निर्दयं कृत्वा क्षुण्णा विनाशिता दैत्यप्रवीरा असुरप्रधाना यया सा । अपि च सैर्निर्जरंशसर्गैरवयवप्रादुर्भावैः सैरं शनैः शनैः कृत्वा गहनतमो दुर्भेद्यो योऽसौ महान्हार्दो हृदयभवो मोहोऽविवेकस्तं हरन्ती निवारयन्ती । अन्यच्च भक्तिभाजः सेवासक्तपुंसः दास्यादास सम्यगनुल्लाभिलाषस्य सतः स्मृतैव ध्यातमात्रैव सकलमशेषमभिमतमादधाना पोषयन्ती ३९

सुरसुरचितचितनवनवभवभवनानादरादरायेये ।
लयलयचरणौ चरणौ न न मामि नतेन नमामि न ते ॥ ४० ॥

(निरन्तरावलियमकम्)

हे देवि, सुरैर्देवैः सुरचितेन शोभनरचनया चिता दृष्टा नवा अनन्यकृता नवाः स्तवा यस्याः सा सुरसुरचितचितनवनवा । तथा भवभवाः संसारसंभूता ये नानादरा बहुप्रकारभयानि तन्निवृत्त्यर्थमादरेणौत्सुक्येन या आयेया आगन्तव्या । या भवभवनानादरादरायेया यातव्या । प्रथमार्धश्लोकेन (नु) संधानम् । ते तव चरणौ पादौ लयो लीला विलासस्तस्य लयश्चरणं गमनं ययोस्तौ चरणौ नतेन नमनेन नमामि न मामि न पर्याप्तो भवामि । तृप्तिं न गच्छामीत्यर्थः ॥ ४० ॥

या विस्मयं स्मरभिदा चक्रेऽङ्कारोपिता नवं नारीणाम् ।
विदधे यच्चापस्य न च कैंकारोऽपि तानवं नारीणाम् ॥ ४१ ॥
या हन्तां च प्रयाता विहायसा कंसमाह तारातिबलेन ।
कृष्णस्तव परमाया विहाय साकं समाहतारातिबलेन ॥ ४२ ॥
तां नमत या च समरेष्वनेकशो भाति भद्रकाली नतया ।
ख्याति यया जनतोज्ज्वलविवेकशोभातिभद्रकालीनतया ॥ ४३ ॥

(कलापकम्)

तां देवीं नमत नमस्कुरुत या स्मरभिदा मदनहन्त्रा भर्त्रा हरेणाङ्कारोपिता उत्सङ्गमारोहिता सती नारीणां स्त्रीणां नवमपूर्वं विस्मयमाश्चर्यं चक्रे । तथा यच्चापस्य य-

दीयधनुषश्च संबन्धी क्रेंकारोऽपि ध्वनिरप्यरीणामरातीनां तानवं क्षयं न न विदधे अपि तु चक्रे । अपरं या तारा प्रकाशरूपिणी विहायसा आकाशेन प्रयाता गता सती कृष्णो भगवान्वासुदेवस्तव भवतः हन्तां हिंसतु इत्यनेन प्रकारेण कंसाख्यं दैत्यमाहावोचत्म् । कथमित्याह—परमाया विहाय द्विपत्कुलवर्तीः परित्यज्य अतिबलेन बाहुना समा हतारातिना निहतशत्रुणा बलेन भगवता संकर्षणाख्येन भ्रात्रा साकं सह । तथा या च भद्रकाली कात्यायनी समरेषु युद्धेष्वनेकशो बहुधा भाति शोभते । यया च देव्या नतया प्रणतया जनता जनसमूह उज्ज्वलविवेकशोभा प्रकृष्टज्ञानप्रभा सती अतिभद्रकालीननया अत्यर्थमङ्गल्यसंपृक्ततया हेतुभूतया प्रशस्तया देवी भातीत्यर्थः । ख्याति प्रकाशने ब्यक्तीभवतः (?) नमत इति संबन्धः ॥ ४१ ॥ ४२ ॥ ४३ ॥

तां स्मरत या स्मृतैव हि मानवतामरसमानता राति बलात् ।
यत्प्रणतं श्रीः श्रयते मानवतामरसमानताराति बलात् ॥ ४४ ॥

तां देवीं स्मरत चिन्तयत । हि यस्माद्या मानवता ज्ञानिना स्मृतैव ध्यातैव सती अमरसमानता देवतुल्यत्वानि अमृतत्वादीनि राति ददाति । तथा यत्प्रणतं यस्याः प्रह्वं मानवतामरसं नरनलिनं आनताराति बलात् आसमन्तान्नतं बन्धुरकंधरं यदरातिबलं तत्परित्यज्य इति ल्यब्लोपे कर्मणि पञ्चमी तस्मादेत्य श्रीः (बलात्) श्रयते सेवते ॥ ४४ ॥

अनवरागसमुद्भवदेहतामुपगता ददृशे गिरिशेन या ।
अनवरागसमुद्भवदेह तामवनतोऽस्मि जगत्प्रियतां सतीम् ॥ ४५ ॥

तां सतीं सतीसंज्ञां साध्वीं वा अवनतोऽस्मि अहं प्रणतः । कीदृशीम् । या अनवरः सर्वोत्कृष्टो योऽगावगः पर्वतस्तत्समुद्भवदेहता तज्जातशरीरत्वमुपगता जगत्प्रियतां च प्राप्ता सती गिरिशेन महादेवेन दृष्टाभिजगति अनवरागसमुत् अनवेन निरंतनेन रागेण प्रेम्णा समुत् सहर्षा ददृशे दृष्टा । तथा च कालिदासः—'सती सतीयोगविसृष्टदेहा' इति तथा भवदा भवं संसारं द्यति खण्डयति ॥ ४५ ॥

मेने नूत्नमनेन माननमुमानाम्ना नु मेनोन्मना
नुन्नेनोनमने निमानममुना नो नाम नानानुमे ।
मौनेनाममानिम्ननमनन्नानामिनानूनिमे
मुन्मिन्नाननमा नमी मुनिमनोमानाननोन्नामिनि ॥ ४६ ॥

(द्व्यक्षरः)

हे नुन्नेनोनमने देवि, नुन्नं प्रेरितं एनः पापं यदेव नमनं प्रणतिर्यस्याः । पापघातिनी यस्याः सेवेत्यर्थः । तामाहूय नुन्नमित्यर्थादभ्युपदते तेन हे देवि, तुभ्यं नमः । वयं त्वां प्रणमाम इति भावः । तथा हे देवि, मेना हिमवन्महिला उन्मना सोत्कण्ठा सती अनेन नवत्वेन उमानाम्ना उमेति संज्ञया नूनं निश्चितं माननं पूजनं मेने अहो नु-

हे देवि, विराजसे विगतरजोविकारे हृदि हृदये त्वं भासि शोभसे । किं कृत्वा । सान्मार्गविपिवरगत्वं चेतोगुणमुन्मील्य प्रकटीकृत्य । तथा द्विषां शत्रूणां संबन्धिनीं वाहिनीं चमूमरीणां सारवतीं सेनां सेश्वरां लघुदकम्पयः कम्पयांचकार कम्पितवती । भासि विराजसे, द्विषामरीणाम्, सेनां वाहिनीम्, उदकं पयः, इति पुनरुक्तभासनात्पुनरुक्तवदाभासोऽयं न तु पुनरुक्तः ॥ ५५ ॥

दूरागतरसा धन्यः सेवते यस्तव स्तुतीः ।
दूरागत रसाधन्यः कल्पन्ते तस्य सिद्धयः ॥ ५६ ॥

हे देवि, यो धन्यः पुरुषः पुण्यवांस्तव भवत्याः स्तुतीः प्रशंसाः सेवते विदधाति तस्य पुंसः सिद्धयो मनोरथा अणिमाद्या या कल्पन्ते संपद्यन्ते । किंभूताः सिद्धयः । दूरागतरसा दूरगत्यर्थमागतो रसः सक्रियांसु ताः । अभिलषणीया इति यावत् । तथा दूरागो दुष्टासक्तिस्ततस्तस्य उत्तरणं साधयन्ति संपादयन्ति तच्छीलास्ताः ॥ ५६ ॥

मोहं हत्वास्पदं यासि सास्त्वमम्ब स्वासिना ।
या न संस्तूयसे केन सा त्वम्बरवासिना ॥ ५७ ॥

हे अम्ब मातः, सा त्वं वक्ष्यमाणस्वरूपा केनाम्बरवासिना द्युसदा देवेन न स्तूयसे । सर्वैरपि देवैः स्तूयस इति भावः । सा त्वं का । या भवती स्वासिना अनाहतखड्गेन मोहमज्ञानं हत्वा विनाश्य प्रकाशात्मकसत्त्वगुणमयमास्पदं स्वकीयं प्रकाशस्थानं यासीत्यर्थः । तथा चोक्तम्—'अनाहते पात्रकर्णे भग्नशब्दे सरिद्रुते (?) । शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति' ॥ ५७ ॥

प्रकाश्य गृह्यपुंसस्यखेदच्छेदाम्बुदावली ।
प्रज्ञात्मनेनविमला स्थिता दृश्यसि विद्वताम् ॥ ५८ ॥

(अपशब्दाभासः)

हे देवि, असि त्वम् । विद्वताम् वेदनं वित् ज्ञानं विद्यते येषां तेषां संबन्धिन्यां दृशि बुद्धौ प्रज्ञात्मना ज्ञानरूपेण विवेकात्मना प्रकाश्य प्रकटीकृत्य इनविमला आदित्यरूपा तिष्ठसीत्यर्थः । कीदृशी त्वम् । गृह्यास्त्वत्सेवोद्यता ये पुमांसस्त एव सस्यं शालिस्तस्य खेद आयासस्तस्य च्छेदे विनाशेऽम्बुदावलीत्यर्थः । गृह्य, प्रज्ञात्मनेन, दृश्यसि, विद्वताम्, इत्यपशब्दवदाभासनादपशब्दाभासः ॥ ५८ ॥

भवानि ये निरन्तरं तव प्रणामलालसाः ।
मनस्तमोमलालसा भवन्ति नैव तु क्वचित् ॥ ५९ ॥

हे भवानि शर्वभार्ये, ये जना निरन्तरमविरतं कृत्वा तव भवत्याः प्रणामलालसाः प्रणतिपरास्ते मनस्तमोमलालसा चित्तमोहकलङ्कनिःशोभा न क्वचित्र कुत्रचिद्भवन्ति संपद्यन्ते ॥ ५९ ॥

विभावनाकुला त्वयि क्रमेण देवि भावना ।
वपुष्पतिस्थिरेतरे नितान्तमेव पुष्यति ॥ ६० ॥

हे देवि, त्वयि विभौ व्यापिन्यां त्वद्विषये क्रमेण यथोक्तविधिना अनाकुला स्थिरा निश्चला भावना भक्तिः अतिस्थिरेतरे अतिशयेन स्थिरादितरे विनश्वरे वपुषि शरीरे नितान्तमेवात्यर्थं पुष्यति पुष्टा । प्रकृष्टेत्यर्थः । अस्थिरेऽस्मिन्संसारे त्वद्भक्तिरेव सारमित्यर्थः ॥ ६० ॥

महोऽदयानामवधी रणेन महोदयानामवधीरणेन ।
महोदयानामव धीरणेनमहोदयानामवधीरणेन ॥ ६१ ॥

(पादाभ्यासयमकम् ।)

न दयन्ते रक्षन्तीत्यदया हिंसास्तेषामदयानां महस्तेजः रणेन संग्रामेण या त्वमहो आश्चर्यं दयानामवधीरणेन तिरस्कारेणावधीः निहतवती । निर्दयतया हिंसात्वं समरं महोदयानामुत्सवोत्तर्त्तानामवधीरणेनावधिक्षपणेन निरवधिसुखोत्पादनेन महोदया महान्तो बृहन्त ये उदया अयो ज्ञानं दैवमनुकूलं वा । उद्गतश्चासावय उदयः । महान्त उदया येषां तेषां धीरणेनं धीरयतीति धीरणं धैर्यकर्तारमिनमीश्वरं प्रभुमव रक्षस्व । महाज्ञानानां धैर्यकर्तारं प्रभुं पालयेति यावत् ॥ ६१ ॥

न मज्जनेन तीर्थानां तदिह प्राप्यते शुभम् ।
नमज्जनेन तीर्थानां सेवया यत्त्वाम्बिके ॥ ६२ ॥

हे अम्बिके मातः, तव भवत्याः संबन्धिनां तीर्थानामागमानां सेवया समाश्रयणेन नमज्जनेन प्रणतजनेन यच्छुभं फलं श्रेयः प्राप्यते लभ्यते तत्तीर्थानामृषिसेवितजलानां मज्जनेन न प्राप्यते ॥ ६२ ॥

प्रयाति मोहे निःसारभारतीव्रतमेत्ययम् ।
त्वत्प्रसादाज्जनः सारभारतीव्रतमेत्ययम् ॥ ६३ ॥

हे देवि, अयं जनो लोकस्त्वत्प्रसादात्त्वदीयेन कारणेन सारभारतीव्रतं सारा प्रधाना यार्गा भारती वाक् तद्व्रतं तत्परतामेति प्राप्नोति । पश्यन्तीस्वरूपं लभत इत्यर्थः । वा विप्रतये हि प्रधाना पश्यन्ती । तथा चोक्तम्—'अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा । स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ॥' कस्मिन्समये । मोहेऽज्ञानेऽत्ययं विनाशं प्रयाति गच्छति सति । कीदृशे मोहे । निःसारभारतीव्रतमे निःसारस्य दुर्बलस्य यथा भार आयासहेतुस्तद्वत्तीव्रतमे इष्टतमे । अविषयायामद इत्यर्थः ॥ ६३ ॥

शास्त्रप्रभावहसिताः सतां या निर्मला गिरः ।
शास्त्रप्रभावहसितास्त्वमम्ब तिमिरच्छिदः ॥ ६४ ॥

हे अम्ब जननि, याः गिरो साधूनां सूरीणां संबन्धिन्यः शास्त्रप्रभावेण पदवाक्यप्रमा-

णानां माहात्म्येन ह्रसिता गिरो वाचो निर्मला अकलङ्का निरपशब्दास्तास्त्वं शास्त्रप्रभा आयुधदीधितयस्तिमिरच्छिदोऽन्धकारघ्यो वहसि बिभर्षि धारयसि। निरपशब्दा वाचो मोहघ्यस्त्वायुधमित्यर्थः ॥ ६४ ॥

शमीह ते समानतो विभावितोऽत्रसन्न यः।
विभावितोऽत्र सन्नयः शमीहते स मानतः ॥ ६५ ॥

हे देवि, ते तव समानतः सम्यक्प्रणतो य इह संसारेऽत्रसन्नबिभ्यन्सन् न विभौ भगवति वासुदेवाख्ये ब्रह्मणि इतः न गतः। मोक्षं न प्राप्त इति भावः। शमी जितेन्द्रियः सन् सन्नयो विद्यमाननीतिः। अत्र संसारे विभावितो लक्षितो मानतो ज्ञानाद्धेतो संश्रयत ईहते चेष्टते यः। संसारसक्ततया भगवन्तं विष्णुं न श्रितः सोऽपि त्वां प्रणतश्चेत्तद्विद्यमाननीतिः शमी च प्राप्तज्ञानो विश्वं प्राप्नोतीति भावः ॥ ६५ ॥

मातरं त्वा पदं सद्य आश्रितास्ते कथं जनाः।
मा तरन्त्वापदं सद्य आद्यं श्रेयः समाश्रिताः ॥ ६६ ॥

हे देवि, त्वां मातरमम्बिकां ये जना लोका आश्रितास्ते कथं केन प्रकारेण सद्यस्तत्क्षणमेव आपदं दुर्गतिं मा तरन्तु मा लङ्घयन्तु। दुःखमुत्तीर्य वर्तन्त इति भावः। त्वां कीदृशीम्। सत्पदं शोभनस्थानम्। जनाः कीदृशाः। आद्यमग्रिमं श्रेयः शिवं समाश्रिता अधितिष्ठन्तः ॥ ६६ ॥

भाति त्वत्तनुसंश्लेषे सत्यम्ब वपुरनुत्तरम्।
संसाराब्धौ सदाहुस्ते सत्यं वपुरनुत्तरम् ॥ ६७ ॥

हे अम्ब मातः, त्वत्तनुसंश्लेषे त्वत्कायसङ्गे सति पुरभित्पुरारातिः शंभुर्भाति शोभते। ते तव संबन्धि च सत्सत्यं ध्रुवं वपुः पश्यन्तीवाम्रूपं शरीरं संसाराब्धौ जगज्जलधौ सत्परं शोभनं ध्रुवं अनुत्तरमविद्यमानापरमाहुर्बुवते। तत्त्वविद एवं गायन्तीत्यर्थः। अविधातोरम्बाशब्दसिद्धेः कथं केवलौष्ठ्यतया मकारः परसवर्णः (?) दन्त्योष्ठ्ययोर्द्वयोरपीति यमकस्याभङ्गः ॥ ६७ ॥

यच्छ मे नित्यसंसङ्गि यच्छमे तदिदं मनः।
स्वच्छलो भक्तियोगस्ते स्वच्छलो कविवेकसूः ॥ ६८ ॥

[illegible], यत्-शमे विषयाणामसङ्गे मनश्चेतो नित्यसंसङ्गि सततानुरक्तं तदिदं तथावि- [illegible] यच्छ देहि। यतस्ते तव संबन्धी यो भक्तियोगः सेवासङ्गः स स्वच्छलः [illegible] निश्छिद्रः सन् स्वच्छं निर्मलं लोकानां जनानां लोकयोर्वा इहामुत्र [illegible]कं सूते जनयति। अत एव इहात्र परत्र च स्वच्छता ॥ ६८ ॥

[illegible] [illegible]नन्तकृतस्त्वत्प्रणता भवे।
[illegible] आसते विम [illegible] ॥ ६९ ॥

हे देवि, त्वत्प्रणतास्त्वत्प्रह्वा जना वितन्वन्तस्तन्वतः वितनोरनङ्गस्यान्तकृतो विनाशकारिणो भवे संसारे के चलन्ते के आविर्भवन्ति । त्वत्प्रणता जितकामा विमुच्यन्त इति भावः । ते केवलमनन्यव्यापाराः सन्तो निर्मलाममोहां धियं बुद्धिं वितन्वन्तो विसारयन्त आसते तिष्ठन्ति । यावत्संसारस्तावद्विमोहः । भूयश्च त्वत्प्रणता भवे न निवर्तन्ते ॥ ६९ ॥

देवि निर्दग्धकामस्य त्वं निरावरणात्मनः ।
दरस्य शुभसंतानं तेनासौ भ्राजते तथा ॥ ७० ॥

हे देवि, त्वं हरस्य गिरिवरतनयाधवस्य शिवस्य निर्दग्धकामस्य भस्मीभावितमीनकेतनस्य तथा निरावरणात्मनः निर्गतमावरणं परिधानमात्मनो यस्य आशाम्बरस्य दिग्वाससः शुभसंतानं पुण्यप्रतानं श्रेयोविस्तारस्तेन कारणेनासौ हरस्तथा माहात्म्ययुक्तो भ्राजते शोभते । अत्र च क्रियां प्रत्याकाङ्क्षेव नास्ति । विमृश्यमानश्चार्थो नान्वयः (?) एवं क्रियाया अभावात् शुभसंतानमिति द्वितीयानुपपत्तेस्त्वमिति प्रथमाया असामानाधिकरण्याच्च एतत्प्रतीयमानार्थसंबन्धिनी क्रिया गोपिता भवति । अत्रैव न व्याख्यानाङ्क्ष्यते । तदा चान्वयो भवति—यथा देवि, निर्दग्धकामस्य निरभिलाषस्य तथा निरावरणात्मनः प्रक्षीणक्लेशजालस्वभावस्य यतस्त्वमशुभसंतानमावरणसंततिं हरसि निवारयसि तेनाशुभसंतानहरणेनासौ तथा भ्राजते दीप्यते ॥ ७० ॥

द्विपद्द्विषा सपदि विमुच्यते यतस्त्वयानतो जननि जयाशया न कः ।
स्तवाननो जननिजया शयानकः करोति ते युधि मधुसूदनस्तवम् ॥ ७१ ॥

हे मधुमथनभगिनि कात्यायनि जननि मातः, अतोऽस्मादुच्यमानहेतोः कः पुमान् युधि संग्रामे जयाशया जयाभिलाषेण त्वदानतस्त्वां न करोति न विदधाति । सर्वलोको जिगीषुस्तव स्तुतिं विरचयतीत्यर्थः । यतो यस्मात्कारणात्तव भक्त्या आनतः प्रह्वः जननि जया लोकाराधितया द्विपद्द्विषा शत्रुभीत्या कर्त्या शयानकोऽपि निद्रालोऽपि सपदि तत्क्षणमेव प्रणामानन्तरमेव विमुच्यते त्यज्यते ततो हेतोरिति संबन्धः ॥ ७१ ॥

ज्यायोनिष्ठारिवर्याधिनियमनवगर्वद्दायताङ्ग
स्वाराधत्वागमध्यानियजनजननि क्षेमयुक्ताभभासा ।
नानापुण्यागमध्या जननमनयज्ञाननध्या धरा धी-
र्यौता नध्या त्रिभुवं नुतसरत्वमनस्तामसस्यावदाने ॥ ७२ ॥

प्रतिलोमानुलोमयमकम् एतावं द्विर्निर्देशोऽयः—

स्येशाव स्या समस्तानमलरमनु त्वं भुवि ध्याननार्या
धीग यन्या न न श्रा समनमननजन्मात्मना द्युन्दा ।

[illegible]
[illegible] ॥ ७१ ॥

([illegible])

हे देवि, [illegible] । [illegible] । [illegible] । [illegible] (!) [illegible] । [illegible] । [illegible] । [illegible] । [illegible] यत्र पेशा धीय [illegible] । तथा [illegible] देवि । तत्र एव [illegible] । [illegible] । [illegible] । अपरं हे [illegible] । [illegible] आवरणं [illegible] शरीरे [illegible] । [illegible] । [illegible] । [illegible] । [illegible] सार्यदर्शिनी । [illegible] च । [illegible] पिना, तथा [illegible] परिच्छेदा । तथा [illegible] श्रीकुर्वाणा च सती हे सुयशे शोभनयशे । तथा अनिनजनजयनि [illegible] भवकारिणि । सा एवंप्रकारा आयतादरस्रैः आयतो यस्योदरोऽभयः स आत्मा येषां तैः भावस्था आशयस्था ज्ञाता शुद्धा । तथा श्यामरास्वाधरासा श्यामानां धूसराणां तमोमयानां स्वाधरा··· ······आत्मीया । अवनमयविधिः पालनमयं विधानम् । तथा वरिष्ठा श्रेष्ठा । अनियोज्या न केनचित्प्रेर्यते स्वतन्त्रेति भावः ॥ ७२ ॥ ७३ ॥

अलोलकमले चित्तललामकमलालये ।
पाहि चण्डि महामोहभङ्गभीमबलामले ॥ ७४ ॥

(भाषाषट्कसमावेशः ।)

हे देवि चण्डि, पाहि रक्ष । अलोला अचपलापि त्वं कमला लक्ष्मीः अलोलकमला । तादृशि । तथा चित्तमेव ललामकमलं प्रधानपद्मं तदेवालयः कुलायो यस्याः । तथा महामोहस्य जन्मलक्षाव्यस्ताया अविद्याया भङ्गे विनाशे भीममुग्रं बलं सामर्थ्यं यस्तेनामलेऽकलङ्के । अमलज्ञानरूपिणी सती अज्ञानं निहंसीति भावः ।

चमागधसूरसेनापभ्रंशात्मिकाः षडपि भाषा अत्र समाविष्टा यदा तदा भाषाषट्कसमावेशोऽयम् । षण्णामपि भाषाणां साधारणा (?) न भिद्यन्त इति वाक्यार्थः ॥ ७४ ॥

दुर्गापि मातः सुलभासि भक्त्या भवानुकूलापि भवं क्षिणोषि ।
अध्येयतां यासि सदैव देवि ध्येयासि चित्रं चरितं तवैतत् ॥ ७५ ॥

हे देवि । तव भवत्याः संबन्धि चरितमाचारश्चित्रमाश्चर्यप्रदम् । यतः हे मातर्जननि, दुर्गापि कात्यायन्यपि अविदितपरमार्थापि भक्त्या सेवया सुलभासि । तथा भवानुकूलापि हरानुरक्तापि भवं क्षिणोषि संसारं निर्हंसि । अपि च ध्येयापि चिन्तनीयापि सती अध्येयतां पठनीयत्वं सदैव सर्वकालं यासि गच्छसि । अपिरिह संभावनायाम् । या दुर्गा दुर्गमा सा सुलभा, या भवानुकूला सा भवघ्नी, या ध्येया सा अध्येयतो यातीत्यपिशब्देन विरुद्धवदाभासनाद्विरोधाभासोऽयम् ॥ ७५ ॥

महदेसुरसंधम्मे तमवसमासङ्गमागमाहरणे ।
हरबहुसरणं तं चित्तमोहमवसर उमे सहसा ॥ ७६ ॥

(संस्कृतमहाराष्ट्रभाषाश्लेषः ।)

प्रकृतत्वात्संस्कृतशब्दार्थस्तावत्—हे देवि, महदे उत्सवदायिनि मे मम सुरसंधं सुरा देवाः संधिरवधिर्यस्य तम् आगमाहरणे शास्त्रार्जने समासङ्गं सम्यगासक्तिश्रद्धामव रक्ष । शास्त्रासक्तिर्देवैरपि न परित्यज्येति भावः । यदुक्तम्—'तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ' इति । तथा हे उमे हे अगजे, हसनं हसः सह हसेन वर्तत इति सहसा सामोदा सती अवसरे प्रसङ्गे बहुसरणमत्यन्तव्यापारं तं चित्तमोहं चेतोजाड्यं हर विनाशय । कविर्वैचित्र्यरचितमहाराष्ट्रभाषाशब्दार्थोऽधुना—हे हरबहु शिववधु, धम्मे धर्मे पुण्ये रसं रागं देसु देहि ददस्व विधत्स्व । तथा णे नः अस्माकं गमागमा संसारात् तमवसं तमोवशां अविद्याप्रवशायत्तां आसं आशां हर छिन्धि विनाशय । मोक्षं देहीत्यर्थः । मह मम तं त्वं सरणं शरणं परायणम् । सहसा झगित्येव चित्तमोहं मानसमज्ञानं चित्तमोहं वा चित्रं नानाविधं मोहं मोघं विफलमपांतसंसारं अवसरउ अपसरतु प्रयातु इतिक्रियान्वितयेन द्वितीयभाषाशब्दार्थः ॥ ७६ ॥

वन्द्या प्रभातसंध्येव सूर्यालोकप्रवर्तिनी ।
निवर्तयसि देवि त्वं महामोहमयीं निशाम् ॥ ७७ ॥

हे देवि, त्वं वन्द्या प्रणम्या । सूरीणां विदुषामालोकप्रवर्तिनी प्रकाशदायिनी ज्ञानदात्री महामोहमयीमज्ञानस्वरूपां निशामविद्यां निवर्तयसि द्रावयसि । अत एव प्रभातसंध्येव उषःप्रत्यूषयोरन्तरे यथा । सा हि संध्या सर्वेषां वन्द्या भवति तथा सूर्यालोकप्रवर्तिनी महान्धकारां निशां निवर्तयति ॥ ७७ ॥

संवादिसारसंपत्तीसदागोरिजयेसुदे ।

तवसत्तीरदे सन्तु संसारे सुसमानदे ॥ ७८ ॥

(संस्कृतसूरसेनभाषाश्लेषः ।)

तत्र संस्कृतशब्दार्थस्तावत्—हे देवि, असुदे प्राणदायिनि, तव संबन्धिन्यौ द्वे सत्ते । मायाविल्यर्थः । तत्रैका विद्यमानता अपरा उज्ज्वलता ते सत्ते सद्विद्यमानभागोऽपराधो येषां तेषां सागसां सापराधानामरीणां शत्रूणां जयेऽभिभवे पराभवविषये संवादिसारसंपत्ती संवादिनी ज्ञायमाना सारस्य बलस्य संपत्तिः समृद्धिर्ययोस्ते सत्ते । सापराधा अरयो यथा जनेन जीयन्ते तथा तव संनिधानगांभीर्यल्यं च दृश्यत इत्यर्थः । तथा ते सत्ते द्वे भवसागरे सत्तीरदे शोभनपारप्रदे । त्वयि गत्वा तत्प्रभावेण वा संसारसागरादुत्तीर्यत इति भावः । तथा सुसमानमपध्वंशमानं ददतः । अथवा सुगमं ब्रह्मादिस्तम्बपर्यन्तं चतुर्दशविधे भूतसर्गे नित्योदिततया समत्वेन साधारणत्वेनावस्थितं शब्दं शब्दब्रह्म ददतः । तच संसारसागरसमुत्तरणत्वम् । तथा च बाह्वृची श्रुतिः—'ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधिविश्वे निषेदुः । यस्तं न वेद किमृचा करिष्यति य एतद्विदुस्त इमे समासते ॥' इति । सूरसेनभाषार्थोऽधुना—हे गोरि हे गौरि, जयेसु जगत्सु त्रैलोक्यं दे ते तवसत्ती तपःप्रभावः सदा सर्वकालं संवादिसारसंपत्ती शम्वातिसारसंप्राप्तिः शम्ववद्वज्रवदतिसारातिदृढा संप्राप्तिर्लाभो यस्याः सा शम्वातिसारसंप्राप्तिः । यदुक्तममरसिंहेन—'ह्रादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः । शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः ॥' इति । अनपायिनी त्वत्तपःशक्तिरित्यर्थः । कीदृशि गौरि । सत्ती रदे सत्त्वे रते चेतोविकारजयासक्ते । कीदृशे सत्त्वे । संसारे श्रेयःप्रधाने । तथा हे गौरि, सुसमानदे सुशमानते सुशर्मैः सुष्ठुचित्तोद्रेकजयिभिरानते प्रणते मुमुक्षवस्त्वां प्रणमन्तीति भावः । यतश्चित्तजय एव मोक्षः । यदुक्तम्—'चित्तमेव हि संसारं रागादिक्लेशदूषितम् । तदेव तद्विनिर्मुक्तं मोक्ष इत्यभिधीयते ॥' इति ॥ ७८ ॥

आगममणिसुदमहिमसमसंमदकृदपरजस्सु ।

किर सविभयवदितो समय उज्जलभावसहस्सु ॥ ७९ ॥

संस्कृतापभ्रंशश्लेषः ।

द्विपथकाख्यं वृत्तम् । इहापि संस्कृतशब्दार्थस्तावत्प्रकृतत्वात्—हे देवि, अपरजस्सु अपगतरजस्केषु गलितमोहेषु नृषु इतोऽस्मात्संसारादसमयेऽनवसरे आगममणिसुदमहिमसमसंमदकृत् आगमाः शास्त्राणि त एव प्रकाशकत्वान्मणय इव मणयः तथा शोभनो यो दमश्चित्तोपशमः स एव निर्वापकत्वाद्धिमं तत्संबन्धी योऽसौ समोऽनाकुलः सं... हर्षस्तं कृन्तति छिनत्ति यत्तत्किर उत्क्षिप । अज्ञानं विनाशयेति वाक्यार्थः । कथ... यज्वनां सविभयवत् सवो यज्ञोऽस्यास्तीति सवी यायजूकस्तेषां भयवद्भीतिवत् । ... तदज्ञानं नाशयेत्यर्थः । तथा कीदृशेषु नृषु । उज्जलभावसहस्सु ...

योऽसौ जलभावो जडभावो जाड्यं तत्र सहो बलं येषां तेषु । लडावेकरूपाविला-म्नायः । अथ प्राकृतापभ्रंशभाषार्थः ।—जस्सु पर यस्य परं केवलं आगम मणि आगमाः शास्त्राणि मणि मनसि तथा सुदमहिम श्रुतमहिमा शास्त्रावबोधः, तथा सम शमः विषयनिग्रहः एते च सर्वे संमद साम्यदाः साम्यमनाकुलत्वं ददानाः किर स वि किल सोऽपि भयवदितोसमय उज्जलभावमहस्सु भगवतीतोषमयमुज्ज्वलभावसहस्रम् । सहस्र-शब्दो बाहुल्यार्थे । तदपि किल देवीपरितोषागतं निर्मलपदार्थसहस्रमित्यर्थः । देवीप्रसा-दविलसितं तत्तस्येति वाक्यार्थः ॥ ७९ ॥

अथ चक्रम्—

त्वं वादे शास्त्रसन्निन्यां भासि वाचि दिवौकसः ।
तवादेशास्त्रसंस्काराज्जयन्ति वरदे द्विषः ॥ ८० ॥

(अमर्त्यभिज्ञायमकमिदम् ।)

हे देवि वरदेऽभिलषितदायिनि, वादे स्वपक्षपरपक्षपरिग्रहे शास्त्रसन्निन्यां शास्त्रस-ञ्जायां वाचि भारत्यां त्वं भवती भासि शोभसे । तथा दिवौकसो लेखा देवास्तव भ-वत्याः ऐवन्धिन आदेशास्त्रसंस्कारान् आदेश आज्ञा तदेवास्त्रं विनाशायामिनिर्मितं द्रव्यं तत्संस्काराद्भावनावलाद्देनोर्द्विषः शत्रून् जयन्त्यभिभवन्ति । वादे शास्त्रमिति पञ्चा-क्षरयमनेऽप्यप्रत्यभिज्ञानादप्रत्यभिज्ञायमकमेतत् ॥ ८० ॥

सदाप्याजवशिप्याताः सदात्तजपशिक्षिताः ।
ददास्यजस्रं शिवताः सुदाराजदिशि स्थिताः ॥ ८१ ॥

(गोमूत्रिकाबन्धद्वयेन जालाकारबन्धसंबन्धादयं जालबन्धः ।)

हे देवि, अजस्रमनवरतं शिवताः श्रेयांसि ददासि प्रयच्छसि । कीदृशीः शिवताः । सदा सर्वकालमव्याजनिर्देशसर्वशिशिक्षितेन्द्रियपर्याप्ताधिष्ठिताः । तथा सदात्तभजनं कृत्वा आत्तजपैर्गृहीतमन्त्रावर्तनैः शिक्षिता अभ्यस्ताः । अन्यच्च सुदाराजदिशि स्थिता सु उदाता ऊर्जिता प्रधाना या अजदिक् विष्णुस्थानं पदं ब्रह्म तत्र स्थिता । परब्रह्म आगता इति भावः । अनन्तरप्रक्रान्तप्रत्यभिज्ञायमकश्लोकेन सहामुना गोमूत्रिकाबन्धेन सह जालबन्धोऽयम् । केचित्त्वनेन (केवलेन) गोमूत्रिकाबन्धेन केवलेनैव जालबन्धं विभिन्दन्ति तत्र यथारुचि सुखायुक्तविचारे जालस्य प्रयोजनत्वेऽपिदर्शितविन्यासवत्त्वानु-रोधः स्वबुद्धिः प्रमाणम् ॥ ८१ ॥

हरेः स्मरारे देवि त्वा जनताश्रित्य तत्त्वतः ।
धत्ते स्मरारे देवित्वा योगेन ध्वनितामुखा ॥ ८२ ॥

हे देवि, जनता जनसमूहस्त्वां भगवतीं हरेः स्मरारे ... सैन्य ... त्वां ... । कथम् । योगेन ...

रोधेन देविला व्यवहृत्य क्षपिताशुभा विनाशितकिल्बिषा । तथा च मनुः—'प्राणायामैर्दहेद्दोषान्प्रत्याहारेण संगतिम् । ध्यानेनानीश्वरान्भावान्धारणाभिश्च किल्बिषम् ॥ समस्तेन्द्रियवृत्तिर्हि प्राणो वायुः प्रकीर्तितः । तज्जयादिन्द्रियाण्याशु विजितानि भवन्ति हि ॥ प्राणस्यैव जयो योगः प्राणस्यैव जयस्तपः । प्राणस्यैव जयात्सर्वं प्राप्यते नात्र संशयः ॥' इति । तथा च छान्दोग्योपनिषदि—'यथा शकुनिः सूत्रे बद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपाश्रयते एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपाश्रयते । प्राणनिबन्धनं हि सोम्य मनः ।' तथा च बाह्वृची श्रुतिः—'सप्त युञ्जते रथमेकचक्रमेकोऽश्वो वहति सप्तनामा । त्रिनाभिचक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधितस्थुः ॥' इति ॥ ८२ ॥

सदाप्नोति यतिर्ज्योतिस्तादृशं त्वत्प्रभावतः ।
प्रभावतः समो येन कल्पते मोहनुत्तितः ॥ ८३ ॥

हे देवि, त्वत्प्रभावतस्त्वन्माहात्म्यात् यतिश्चतुर्थाश्रमी संयमी वा तादृशं तथाविधं सच्छोभनं ज्योतिःप्रकाशमान्तरं तेज आप्नोति लभते येन ज्योतिषा करणभूतेन हेतुना वा मोहनुत्तितो मोहविनाशाद्धेतोः प्रभा दीप्तिर्विद्यते यस्येति तस्य प्रभावतः सूर्यस्य समस्तुल्यः कल्पते समर्थो भवति । संपद्यत इत्यर्थः । एवं देव्या असकृन्नादरूपिणीत्वं प्रतिपाद्यानेन श्लोकेन बिन्दुरूपता प्रदर्शिता । परं ज्योतिर्हि बिन्दुशब्देनोच्यते । यदुक्तम्—'यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥' तथा चोपनिषत्सु ज्योतिःस्थानमसकृच्चागमेषु चोक्तम्—'नेत्रयोरुभयोर्मध्ये नासावंशस्य मूलतः । हृदयं तद्विजानीयाद्विश्वस्यायतनं महत् ॥' इति ॥ ८३ ॥

त्वं सद्गतिः सितापारा परा विद्योचितिर्पितः ।
संसारादत्र चाम्ब त्वं सत्त्वं पासि विपच्चितः ॥ ८४ ॥

(अयं गूढचतुर्थः ।)

हे अम्ब हे मातः, संसारादुत्तितीर्षेन उत्तर्तुमिच्छोः पुंसस्त्वं सद्गतिः शोभनं परायणं शरणम् । कीदृशी । सिता निर्मला । अपारा अपर्यन्ता । परा उत्कृष्टा विद्या तत्त्वज्ञानार्थदा । अत्र संसारे सत्त्वं प्राणिनं विपच्चित आपद आर्तेस्त्वं पासि रक्षसि । चतुर्थोऽयं पादोऽन्य एव पादत्रयाल्लभ्यत इत्यस्य गूढचतुर्थता ॥ ८४ ॥

परमा या तपोवृत्तिरार्यायास्तां स्मृतिं जनाः ।
परमायात पोपाय धियां शरणमादृताः ॥ ८५ ॥

हे जनाः पुमांसः परमलर्पमादृताः सादराः सन्त आर्याया देव्याः संबन्धिनीं तां स्मृतिं तत्स्मरणं शरणमायात आश्रयं श्रयध्वम् । स्मृतिं विशिनष्टि । परमा प्रकृष्टा तपोवृत्तिर्नियमव्रतवर्तनम् । देव्याः स्मरणमेव परमं तप इत्यर्थः । किमर्थं धियां बुद्धीनां पो-

पाय वृद्धये । अष्टप्रकारा बुद्धिरिति बहुवचननिर्देशः । यदुक्तम्—'शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा । ज्ञानं विज्ञानमूहश्चापोहो बुद्धिः स्मृताष्टधा ॥' इति ॥ ८५ ॥

प्रवादिमतभेदेषु दृश्यस्ते महिमाश्रयः ।
भान्ति त्वत्रिशिखस्येव शिखानामसमाश्रयः ॥ ८६ ॥

हे देवि, प्रवादिनां वाग्मिनां मतभेदेषु बुद्धिनानात्वेषु ते तव दृशः आलोका भान्ति शोभन्ते यान्येव प्रवादिनां भिन्नानि ज्ञानानि तास्त्वदीया एव दृश्य इति तात्पर्यार्थः । किंभूता दृशः । महिमाश्रयो माहात्म्यस्थानम् । त्वत्रिशिखस्येव भवत्रिशूलस्य यथा शिखानां कोटीनामसमा विषमास्तीक्ष्णा आश्रयो धारा भ्राजन्त एवम् । एतादृशा इत्यर्थः ॥ ८६ ॥

यचेष्टया तवे स्फीतमुदारवसु धामतः ।
यचेतो यात्यवहितमुदा रवसुधामतः ॥ ८७ ॥

(गोमूत्रिकाबन्धः । संदष्टयमकम्)

हे देवि, तव भवत्याश्चेष्टया व्यापारेण श्रवणचिन्तनाध्ययनलक्षणेन इन्द्रियादिनियमेन वा । यत एवंच धारणायाश्चेष्टा । यत उक्तम्—'मनस्सुभरतं कुर्यादक्षग्रामं बहिः स्थितम् । चित्तं मुर्दां विनिक्षिप्य सा बुद्धिर्ज्ञानगोचरे ॥ ज्ञानभावनया कर्म कुर्याद्वा पारमार्थिकम् ।' इति । अत एव तया चेष्टया स्फीतं विकसितं यचेतः अवहितं च सावधानं संयतं मनः अत एवोदारवसु परमनश्वरं धनं तचेतो मुदा हर्षेणोपलक्षितं सत् धामतो ज्योतिःस्थानान्मोक्षलक्षणात्स्थानात् रवसुधां शब्दामृतं याति प्राप्नोति । शब्दब्रह्मोदयं लभत इत्यर्थः । यदुक्तम्—'ओमित्येवाक्षरं ब्रह्म ।' तथा चोपनिषत्सु—'एतदेवाक्षरं ब्रह्म एतदेवाक्षरं परम् । एतदेवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥' गोमूत्रिकाबन्धोऽयं यमकश्च । प्रस्तारस्त्वेकदा दर्शितः ॥ ८७ ॥

गुरुदेशस्य ते कीर्तिं मण्डनत्वं नयन्ति ये ।
वरदे शस्यते धीरैर्भवती भुवि देवता ॥ ८८ ॥

(अर्धगोमूत्रिकाबन्धयमकम्)

हे देवि वरदे, अभिमतदायिनि, धीरैरविकृतचित्तैर्भवती त्वं भुवि भूर्लोके संसारे देवता शरणं शस्यते स्तूयते ते पुमांसः कीर्तिं प्रथां गुरुदेशस्य देवसदनस्य मण्डनत्वं भूषणत्वं नयन्ति प्रापयन्ति ॥ ८८ ॥

तत्त्वं धीतायततनुधत्त्वं ततवती ततः ।
विधं विधव विततत्त्वं धीतावीतवतां धन ॥ ८९ ॥ (द्व्यक्षरः)

हे देवि, धिन् धिदे, तत आयथे [illegible] । [illegible] च [illegible] । [illegible] ते [illegible] । [illegible] ततवती [illegible] । [illegible] इत्यर्थः । [illegible]

स्यात् तत् त्वं तत्त्वं ततवती तद्वती तत्त्वं परमार्थं परब्रह्मस्वरूपं ततवती विस्तारयन्ती। कीदृक्तत्त्वम्। वीतावततमुत् वीता विगता अवतता विस्तीर्णा मुदो व्यथा यत्र तत्। सांख्यानां त्वमेव सर्वप्रधानमिति तात्पर्यार्थः॥ ८९॥

तारे शरणमुद्यन्ती सुरेशरणमुद्यमैः।
त्वं दोपापासिनोदग्रसदोपा पासि नोदने॥ ९०॥

(पादगोमूत्रिकाबन्धद्वयेन तूणबन्धः)

हे तारे ताराभिख्ये विमले, त्वं भवती शरणमुद्यन्ती आश्रितत्राणायोत्तिष्ठन्ती उदग्रसदोपा उत्कटनिजबाहुना दोपापासिना दुरितविनाशकेन उद्यमैर्व्यापारैर्नोदने प्रेरणे काले सुरेशरणं शक्रसंग्रामं पासि रक्षसि। पालिता देवा भवतीं शरणमेत्य पुनः संग्रामासक्ताः संपद्यन्त इति वाक्यार्थः। प्राक्तनेन 'सुरदेशस्य ते कीर्तिं' इत्यनेनार्धेन गोमूत्रिकाबन्धेन सहामुना पादेनावृत्तिगोमूत्रिकाबन्धेन तूणबन्धोऽयम्॥ न्यासः॥ तत्र प्रकारत्रयकमत्र व्याख्यायते॥ ९०॥

सुमातरक्षयालोक रक्षयात्तमहामनाः।
त्वं धैर्यजननी पासि जननीतिगुणस्थितीः॥ ९१॥

हे सुमातः, शोभनजननि, जनानां लोकानां नीतेर्नयस्य गुणानां सच्चरितानां स्थितीः स्थैर्याणि पासि आयसे। विद्याप्रसादाद्धि जनानां नीतौ गुणेषु च स्थैर्यमुत्पद्यते। शास्त्रमार्गानुगुणो व्यापारो नीतिः। गुणाः क्षमादयः। कीदृशी त्वम्। अक्षयालोकरक्षया शाश्वतज्योतिस्त्राणेनात्तं गृहीतं महदुदारं मनश्चेतो यया। अविनाशप्रकाशरूपिणीत्यर्थः। तथा च धैर्यजननी धैर्यस्यानाकुलताया उत्पत्तिः॥ ९१॥

स्यातिकल्पनदक्षैका त्वं सामर्ग्यजुषामितः।
सदा सरक्षसांमुख्यदानवानामसुस्थितिः॥ ९२॥

(रेफविवर्तितकोऽयम्)

हे देवि, त्वं भवती इतोऽस्मिञ्जगति अनवानामकृतानां सामर्ग्यजुषां त्रयाणां वेदानामसुस्थितिः प्राणरूपा सती। वेदानां हि वागीशी प्राणरूपा जनानां च। तथा च बाह्वृची श्रुतिः—'चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधाबद्धो वृषभो रोरवीति महो देवो मर्त्यानाविवेश॥' इति। अतः सदा सततं सरक्षसांमुख्यदा निरपभ्रंशाभिमुख्यदायिनी। स्यातेः समृद्धेः कल्पने रचने दक्षा चतुरा। एका नापरा। वेदानां विपर्ययदोषपरिक्षिणी त्वमेवेति भावः। रेफविवर्तनेनायमपरोऽर्थः—सारक्षसां रक्षोभिः सहितानां मुख्यदानवानां सामर्ग्यजुषां सामर्थ्यं समग्रतां जुषन्ति सेवन्ते ये तेषाम्। गमनप्राणानामित्यर्थः। सदा स्यातिकल्पनदक्षा प्रयाणच्छेदनचतुरा भवतीत्यर्थः। रक्षोदानवयोरत्र

---

१. 'प्रकारत्रयकं व्यित्ययताम लिखितम्' इति पुस्तकान्तरे.

भेदः । अथवा दासानि भृत्यानि अप्रधानानि यानि रक्षांसि तानि दासरक्षांसि । सह तैर्वर्तन्ते ये ते सदासरक्षसः तेषां सदासरक्षसाम् । सपरिवाराणामित्यर्थः । अथवा सह दासैः रक्षोभिश्च वर्तन्ते ये तेषामिति । अत्र श्लोके र्यवर्णस्थरेफस्य विपर्ययात् र्य इति जायते तेन रेफविवर्तकोऽयम् ॥ ९२ ॥

सिता संसत्सु सत्वास्ते स्तुतेस्ते सततं सतः ।
ततास्तितेति तस्तेति सूतिः सूतिस्ततोऽसि सा ॥ ९३ ॥ (व्यक्षरः)

हे देवि, सा असि सा त्वं ततो हेतोः सूतिः शोभना ऊतिः रक्षा । अवतेः क्तिनि-पातनाद्रूपम् । यस्मात्ते भवत्याः संबन्धिन्याः स्तुतेः नुतेः हेतोः सतः साधोः सततं सदा संसत्सु सभासु सत्ता प्रशस्तता निर्मला आस्ते तिष्ठति । तथा तस्य सततता अस्तिता [illegible] विस्तीर्णा विद्यमानता आयाति । दीर्घमायुरारोग्यमैश्वर्यं च लभते आविर्भवतीति भावः । कीदृशी असिता । तस्तेतिसूतिः तसा क्षपिता ईतीनां व्याधीनां सूतिः प्रसवो यस्याम् ॥ ९३ ॥

त्वदाज्ञया जगत्सर्वं भासितं मलनुद्यतः ।
सदा त्वया सगन्धर्वं समिद्धमरिनुच्चितः ॥ ९४ ॥

(गोमूत्रिकाबन्धोऽयम्)

हे देवि, मलनुत् आवरणनिवारिणि, त्वदाज्ञया भवच्छासनेन जगत्सर्वं त्रैलोक्यं ग-[illegible] ([illegible])[illegible] भवतीति भावः । यतो यस्मात्कारणादरिनु-च्चितः शत्रुप्रेरणाद्विपक्षनाशादेतोः त्वया भवत्या जगदिदं संलब्धज्ञानं सगन्धर्वं सदेवनु-[illegible] प्रकाशितम् । मलं हि [illegible] विपक्षं तं च त्वं नुदसि । [illegible] प्रत्यय् ॥ ९४ ॥

यतो याति ततोऽत्येति यया तां तायतां यतः ।
मातामितोद्यमतमा समोर्तातां मतिं मम ॥ ९५ ॥

(श्लोकार्धं द्व्यक्षरम्)

हे देवि, मतिं बुद्धिं मम तायतां मे विस्तार्यताम् । कीदृशीम् । तमोर्तातां [illegible] [illegible] । यया मत्या यतो याति यतो निवर्तते ततोऽत्येति ततो निवर्तत इति भाव । कीदृशी मतिः । माता जननी । तथा अमिता अपरिच्छिन्ना । उद्यमतमा प्रकृष्टो-द्यमवती । एते श्लोकार्धं [illegible] । एवं एव च पुनरनुलोमतो [illegible] अन्ते [illegible] एवं द्व्यक्षरः ॥ ९५ ॥

[illegible] त्वं भिता दासजनं मोहच्छिदा [illegible] ।
[illegible] मनः पापमन्यस्य प्रसभं जय ॥ ९६ ॥

[illegible]

स्यात् तत् त्वं तत्त्वं ततवती तद्वती तत्त्वं परमार्थं परमब्रह्मस्वरूपं ततवती विस्तार-यन्ती। कीदृक्तत्त्वम्। वीतावततनुत् वीता विगता अवतता विस्तीर्णा नुद् व्यथा यस्य तत्। सांख्यानां त्वमेव सर्वप्रधानमिति तात्पर्यार्थः॥ ८९॥

तारे शरणमुद्यन्ती सुरेशरणमुद्यमैः।
त्वं दोपापासिनोदग्रस्वदोपा पासि नोदने॥ ९०॥

(पादगोमूत्रिकाबन्धद्वयेन तूणबन्धः)

हे तारे ताराभिख्ये विमले, त्वं भवती शरणमुद्यन्ती आश्रितप्राणयोगितिष्ठन्ती उदग्र-स्वदोपा उत्कटनिजबाहुना दोपापासिना दुरितविनाशकेन उद्यमैर्व्यापारैर्नोदने प्रेरणे पाले सुरेशरणं शक्रसंग्रामं पासि रक्षसि। पालिता देवा भवतीं शरणमेत्य पुनः संग्रामासक्ताः संपद्यन्त इति वाक्यार्थः। प्राक्तनेन 'सुरदेशस्य ते कीर्ति' इत्यनेनार्धेन गोमूत्रिकाब-न्धेन सहामुना पादेनावृत्तिगोमूत्रिकाबन्धेन तूणबन्धोऽयम्॥ व्याप्तः॥ तत्र प्रैकारप-श्चकमत्र व्याख्यायते॥ ९०॥

सुमातरक्षयालोक रक्षयाक्षमहामनाः।
त्वं धैर्यजननी पासि जननीतिगुणस्थितीः॥ ९१॥

हे सुमातः, शोभनजननि, जनानां लोकानां नीतेर्नयस्य गुणानां गणरितानां स्थितीः स्थैर्याणि पासि आयसे। विद्याप्रमादादि जनानां नीतौ गुणेषु च स्थैर्यमुत्पद्यते। शास्त्र-मार्गानुसारी व्यापारो नीतिः। गुणाः क्षमादयः। कीदृशी त्वम्। अक्षयालोकस्या शाश्वतज्योतिःप्रकाशेनात्तं गृहीतं महदुत्तरं मनश्चेतो यया। अविनाशप्रकाशरूपिणीत्यर्थः। तथा च धैर्यजननी धैर्यस्थानानुकूलतया उत्पत्तिः॥ ९१॥

ख्यातिफलघनदक्षैका त्वं सामर्थ्यमुपासितः।
सदा सारधनांशुस्पदानवानाममुष्मिनिः॥ ९२॥

(एकविंशतिवर्णनिरोधोऽयम्)

हे देवि, त्वं भवती [illegible] [illegible]। [illegible] भवती [illegible] सती। [illegible] प्रकाशका जनानां च। तथा च [illegible] श्रुतिः—'[illegible] ॥' इति। [illegible] [illegible]। [illegible]। [illegible]॥ [illegible] [illegible]। [illegible] [illegible]॥

1. '[illegible]' इति।

नन्निरां चाक्षरमादाय यथा लिखितदर्शनानुसारमङ्कचिह्नानि वीक्ष्य वर्णद्वात्रिंशतः श्लोकोऽयमुत्पद्यते—

देव्या स्वप्नोद्गमादिष्टदेवीशतकसंज्ञया ।
देशितानुपमामाधादतो नोणसुतो नुतिम् ॥ १०१ ॥

इत्यङ्कश्लोकोऽयमुत्पद्यते । अर्थोऽस्यायम्—एतामेवमुक्तप्रकारां नुतिं स्तुतिं नोणसुतो नोणाख्यस्य कस्यचित्पुत्र आनन्दवर्धननामा आधाद्विहितवानकार्षीत् । कीदृशीम् । देव्या वागीश्वर्या स्वप्नोद्गमे निद्राविर्भावे आदिश्य निरूपिता देवीशतकमिति संज्ञा तया देशितानुपमाम् । तल्लक्षणो देशो निदेश आज्ञा विद्यते यस्याः सा देशिनी तस्या भावो देशिता स्थानविशेषः तया देशितया अविद्यमानान्यप्रशंसामनुत्तमाम् । देवीस्तोत्रतया सर्वातिशायिनीमिति भावः ॥ १०१ ॥

हार्दध्वान्तनियन्तृभास्वरवपुः स्वर्वासिनां सर्वतो
दुर्वारारिपरिक्षयं विदधती ध्यातैव निर्वाणसूः ।
देहार्धे निहिता भवेन भुवनत्राणैकतानात्मना
देवि त्वं त्वमिवापरा जगति का सत्केसरीन्द्रस्थितिः ॥१०२॥
(प्रहेलिकेयम्)

हे देवि, त्वमिव जगति कापरा भवतीतुल्या त्रिभुवने कान्या विद्यते । त्वत्सदृशी त्रैलोक्येऽपि नान्या विद्यत इत्यर्थः । हार्दध्वान्तं स्वहृन्मोहतमस्य नियन्तृ प्रमाथि भास्वरं दीप्तिमद्वपुः शरीरं यस्याः सा तथाविधा । तथा स्वर्वासिनां दिवौकसां सर्वतः समन्तात् दुर्वारारिपरिक्षयमजेयशत्रुशमनं विदधती कुर्वाणा । तथा ध्यातैव निर्वाणसूः चिन्तितैव निर्वाणं मोक्षं सूते प्रयच्छति । अपरं देहार्धे निहिता भवेन (देवेन लोकनदीकेन) भवेन शिवेन शरीरार्धे नियोजिता स्वशरीरवामभागे स्थापिता । हरेण प्रभुणा कीदृशेन । भुवनत्राणैकतानात्मना भुवनानां त्रयाणां लोकानां त्राणे रक्षायामेकतान एकरसः सर्वदा प्रवृत्त (प्रवण) आत्मा प्रकृतिः स्वभावो यस्य तेन । त्वं च कीदृशी । सत्केसरीन्द्रस्थिति शोभनसिंहराजे स्थितिर्वसतिस्थानं यस्याः सा । अथ च त्वमिवापरा जगति का इति प्रश्ने कृते सत्केसरीन्द्रस्थितिरित्युत्तरम् । त्वत्तुल्या का इति पृच्छायां भगवत्सिंहमूर्तिरित्युत्तरदानात्प्रहेलिकेतीयमुच्यते । व्याख्या तु समाना सर्वत्र । केवलं देहार्धे निहिता भवेनेत्यत्रान्तरविशेषो व्याख्यायते । तथा अभवेनाविद्यमानसंसारेणाजेन भगवता विष्णुना देहार्धे शरीरोपरिभागे निहितेत्येतावान्स्तुतिविशेषः । प्रहेलिकेयम् ॥ १०२ ॥

क्लेशोन्माथकरी सतां भवहरानन्दैकहेतो गुरु-
र्माता त्वं जगतां भवन्ति विपदः सर्वे तवानुग्रहात् ।

ननाशिनि देवि, त्वं भवती महत्तां श्रिता माहात्म्यमाश्रिता सती यः शुद्धत्वं दासजनो गतः नैर्मल्यं प्राप्तः तमावस अभितिष्ठ। अन्यस्य सपापस्य पापं कल्मषं प्रसभं बलात्कृत्य निवर्तय ॥ ९६ ॥

त्वं साज्ञासु जगन्मातः स्पष्टं ज्ञाता सुवर्त्मसु।
प्रज्ञा मुख्या समुद्भासि तत्पृथुत्वं प्रदर्शय ॥ ९७ ॥

हे मातस्त्रैलोक्यजननि, सुवर्त्मसु सन्मार्गविषयास्वाज्ञासु निरूपणासु त्वं भवती मुख्या प्रधाना प्रज्ञा बुद्धिः स्पष्टं ज्ञाता मुव्यक्तं विदिता तदा तत्पृथुत्वं प्रज्ञापृथुत्वं बुद्धिविस्तारं समुद्भासि समुद्भासते यत् तत्प्रदर्शय प्रकटीकुरु ॥ ९७ ॥

अस्मादेव श्लोकादक्षराण्युद्धित्येयमार्या भवति—

आज्ञासु जगन्मातः स्पष्टं ज्ञाता सुवर्त्मसु प्रज्ञा।
भासि त्वं सा मुख्या समुत्पृथुत्वं प्रदर्शय तत् ॥ ९८ ॥

अर्थोऽस्याः—हे देवि, जगन्मातस्त्रिलोकजननि, शोभनं वर्त्म मार्गो येषां पुंसां तद्विषया या आज्ञास्तासु त्वं सा ज्ञाता विदिता मुख्या प्रज्ञा भासि। स्पष्टं समुत् प्रकटमानन्दरूपं तत्पृथुत्वं महिमानं प्रदर्शय ॥ ९८ ॥

हृन्यो रुपः क्षमा एता सदक्षोभास्तमुन्नतः।
सतेहितः सेवते ताः सततं यः स ते हितः ॥ ९९ ॥

हे देवि, क्षमा एतास्त्वं एताः प्रसिद्धा याः क्षान्तयो दर्पनिहतयस्ता भवती इति भावः। कीदृशाः क्षमाः। रुपो हृन्यः क्रोधविनाशिन्यः। तथा सदक्षोभाः सत्यार्थाक्षोभाश्च। श्रेष्ठा अधिकाश्चेत्यर्थः। ताः क्षमाः सततमजस्रं य उन्नतः प्रधानपुरुषः सता ईहितः शोभनेन मार्गेण व्यापारितः सन्सेवते आश्रयते स ते भक्त्या हितोऽनुकूलः ॥ ९९ ॥

करोपि तास्त्वमुत्खातमोहस्थाने स्थिरा मतीः।
पदं यतिः सुतपसा लभतेऽतः सशुक्लिम ॥ १०० ॥

हे देवि, *उत्खातमोहस्थाने, उत्खातान्युन्मूलितानि मोहस्थानानि मदादयो यया तस्या आहूतिः। यतस्त्वं स्थिरा मतीः मैत्र्यादिका धिषणा अचलाः करोपि संपादयसि। अतो हेतोः यतिर्मुमुक्षुः सुतपसा शोभनेन निर्दम्भेन व्रतादिना सशुक्लिम शुक्लिमा शुक्लगुणत्वं तेन शुक्लिम्ना सह वर्तते यत्तत्सशुक्लिम सत्त्वगुणसहितं रजस्तमोरहितं पदं स्थानं लभते प्राप्नोति। चत्वार एते नेमिश्लोकाः। एष्वथ प्रथमं (प्रथममक्षरं) त्रीणि त्रीण्यक्षराणि लिखित्वा चतुर्थमक्षरं श्लोकप्रान्ते च भवतीति नेमेर्द्वितीयमर्धं मीलितं भवति। एवमेव चान्तर्लिखिता मध्यामामिमीलनं भवति। एवं चक्रप्रस्तारः ॥ १०० ॥*

अत एव द्वात्रिंशतो नेमिस्थानात्प्रानितो वा अमं दत्त्वा तृतीयं तृतीयमेकोनत्रिंशमेको-

मत्रिसं चाक्षरमादाय यथा लिखितदर्शनानुसारमङ्कचिह्नानि वीक्ष्य वर्णद्वारेणैतरातः श्लोकोऽयमुत्पद्यते—

देव्या स्वमोद्गमादिष्टदेवीशतकसंज्ञया ।
देशितानुपमामाधादतो नोणसुतो नुतिम् ॥ १०१ ॥

इत्यङ्कश्लोकोऽयमुत्पद्यते । अर्थोऽस्यायम्—एतामेवमुक्तप्रकारां नुतिं स्तुतिं नोणसुतो नोणाख्यस्य कस्यचित्पुत्र आनन्दवर्धननामा आधाद्विहितवानकार्षीत् । कीदृशीम् । देव्या वागीश्वर्या स्वप्नोद्गमे निद्राविर्भावे आदिष्टा निरूपिता देवीशतकमिति संज्ञा तया देशितानुपमाम् । तल्लक्षणो देशो निदेश आज्ञा विद्यते यस्याः सा देशिनी तस्या भावो देशिता स्थानविशेषः तया देशितया अविद्यमानान्यप्रशंसामनुत्तमाम् । देवीस्तोत्रतया सर्वातिशायिनीमिति भावः ॥ १०१ ॥

हार्दध्वान्तनियन्तृभास्वरवपुः सर्वाशिनां सर्वतो
दुर्वारारिपरिक्षयं विदधती ध्यातैव निर्वाणसूः ।
देहार्धे निहिता भवेन भुवनत्राणैकतानात्मना
देवि त्वं त्वमिवापरा जगति का नगकेसरीन्द्रक्षितिः ॥१०२॥

(प्रहेलिकेयम्)

हे देवि, त्वमिव जगति कापरा भवतीतुल्या त्रिभुवने काप्या विद्यते । त्वत्सदृशी त्रैलोक्येऽपि नान्या विद्यत इत्यर्थः । हार्दध्वान्तं स्वहृन्मोहतमस्तस्य नियन्तृ प्रभासि भास्वरं दीप्तिमद्वपुः शरीरं यस्याः सा तथाविधा । तथा सर्वाशिनां दिवौकसां सर्वतः समन्तात् दुर्वारारिपरिक्षयमजेयशत्रुशमनं विदधती कुर्वाणा । तथा ध्यातैव निर्वाणसूः चिन्तितैव निर्वाणं मोक्षं सूते प्रयच्छति । अपरं देहार्धे निहिता भवेन (देवेन शंकरेण) भवेन शिवेन शरीरार्धे नियोजिता स्वशरीरवामभागे स्थापिता । हरेण प्रभुणा शंकरेण । भुवनत्राणैकतानात्मना भुवनानां त्रयाणां लोकानां त्राणे रक्षायामेकतान एकरस सर्वदा [illegible] एव (एकतान) आत्मा प्रकृतिः स्वभावो यस्य तेन । त्वं च [illegible] । नगकेसरीन्द्रक्षितिः शैलेन्द्रराजे स्थितिर्निवासस्थानं यस्याः सा । अथ च लक्ष्मीरपरा जगति का [illegible] इत्युत्तरम् । [illegible] । [illegible] । प्रहेलिकेयम् । १०२ ।

[illegible] समां भवद्रागानन्दैकहेतो सुर-
[illegible] जगतां भवन्ति विपदः [illegible] ।

दुर्गे न क्वचिदेव सीदति जनस्त्वद्भक्तिपूताशयः
स्तुत्या भर्तुरभिन्नयेति विबुधैस्त्वं स्तूयसे श्रीरिव ॥ १०२
(चतुर

इतिशब्दः पूर्वोक्तप्रकारापेक्षायां वर्तते । भर्तुरभिन्नया पत्युः सदृश्या स्तुत्या
त्वं भवती विबुधैर्देवैर्मनीषिभिर्वा श्रीरिव लक्ष्मीरिव स्तूयसे नूयसे । अर्थवशाद्विभ
चनलिङ्गविपरिणाम इति लक्ष्मीर्यथा भर्तुरभिन्नया स्तुत्या स्तूयते तथा त्वं स्तूयस
एवममूनि स्तुतिपदानि चतुर्णां भवभवानीकमलाकान्तकमलानां योज्यन्ते । तत्र
नयोः कमलाकान्तकमलयोस्तावत्स्तुतिप्रकारा व्याख्यायन्ते । हे श्रीः, भवहरा
हेतोः संसार(निवर्तक)स्य भगवतो विष्णोरानन्दे चित्ताह्लादने एकहेतो एकनि
त्वं भवती सतां साधूनां क्लेशोन्माथकरी अविद्याविनाशिनी करीति आनुलो
टीप् । तथा त्वं जगतां त्रयाणां लोकानां गुरुः प्रधानम् । माता जननी । तथ
सर्वे समृद्धिगुणाः सकलास्तवानुग्रहाद्भवत्प्रसादाद्भवन्ति संपद्यन्ते । अन्यत्,
ताशयो जनः भवत्सेवापवित्रीकृतमना लोकः दुर्गे दुर्गतौ न क्वचिदेव न कुत्र
दति मज्जति ।

भर्तुरभिन्नया स्तुत्येति तद्भर्तुः पक्षे योजना—हे भवहर संसारनिवर्तक । आ
आनन्दैकहेतो, त्वं सतां क्लेशोन्माथे अविद्याविनाशने करी हस्ती । त्रिभिः कर्मभि
न्मोक्षप्रद इत्यर्थः । तथा त्वं जगतां गुरुः माता मापकश्च । दुर्गे संसारबन्धने न
भवन्ति विभवाः सायुज्यादयः सर्वे तवानुग्रहात् । दुर्गे संसारबन्धने न
दति जनस्त्वद्भक्तिपूताशयः ।

उपमेययोरधुना संबन्धः । तत्र भवान्यास्तावत्—सतां क्लेशोन्माथकरी
मपुरुषैकवचनमेतत् । हे दुर्गे विन्ध्यवासिनि, हरस्यानन्दैकहेतो । शिष्टं श्री
एतद्भर्तुर्गिरिशस्याधुना—हे भव हे हर हे आनन्दैकहेतो, त्वं जग
हिंसिता । त्रैलोक्यसंहर्ता रुद्र इत्याम्नायः । मीनातेः कृतालस्य तृचि
तवानुग्रहात्सर्वे विभवा अणिमाद्या ऋद्धयो भवन्ति । शिष्टं श्रीपतिस्
एवमर्थचतुष्टयवाची ॥ १०२ ॥

येनानन्दकथायां त्रिदशानन्दे च लालिता वा
तेन सुदुष्करमेतत्स्तोत्रं देव्याः कृतं भक्त्या ।

अस्याप्ययमर्थः—तेन कविना नोणतनयेनानन्दवर्धनेन एत
नवनं भक्त्या सेवया आरिराधयिषया कृतं दृब्धं रचितम् । कीदृ
शोभना दुष्कराश्वकबन्धादयो यत्र सुष्ठु वा दुष्करं नान्येन केन
केन कविनेत्याह—येनानन्दकथायां विषमबाणलीलायां त्रिदशान
लालिता विनोदिता । विषमबाणलीलार्जुनचरितविरचयि

वल्लभदेवायनितचन्द्रादित्यादवाप्य जन्मेमाम्।
कय्यटनामारचयद्विवृतिं देवीशतस्तोत्रे ॥
एवं वागीश्वर्याः स्वरूपमाख्याय यन्मयावाप्तम्।
पुण्यं तेन जगत्स्यात्प्रतिजन्मावाप्तपरबोधम् ॥
वसुमुनिगगनोदधि(४०७८)समकाले याते कलेस्तथा लोके।
द्वापञ्चाशे वर्षे रचितेयं भीमगुप्तनृपे ॥
धर्मस्थानोदिता गाद्दिमवरनासमृद्धिचक्रान्तरस्थ-
क्षेत्रज्ञोद्बोधनाय प्रलयरविकरामामतेजोविरामा।
नित्यं मन्दाक्षिपोषा वचनतपयसालापिनी मध्यवाहा
बालाभाग्यपृक्स्वरूपा त्रिभुवनजननी पातु वागीश्वरी वः ॥
एवायनम्याच्युतनुत्यमूर्तेराचार्यनारायणगर्तनाम्नः।
शिष्येण दृब्धेयमनन्तशास्त्रवेत्तुः गरक्षेण च कय्यटेन ॥
इति नोणात्मजश्रीमदाचार्यानन्दवर्धनविरचितं कय्यटप्रणीतया टीकया समेतं देवीशतकम्।

काश्मीरिकश्रीमदवतारकविप्रणीतं

ईश्वरशतकम्।

गरीबम्।

स वः पायाद्येन निन्ये यामुर्विनिर्जह्राग्रताम्।
तपोपायाच्चनुं कोपाद्यः स्मरम्य जहार ताम् ॥ १ ॥

स वः पायादित्यादिग्रन्थारम्भे त्रिविधविघ्नोपघातार्थं कविना नमस्कारवाक्यदसुन्दिन

---

१. यदीश्वरशतकस्य प्रणेता श्रीमदवतारकविः कश्मीरेषु कदा समुत्पन्न इति न निश्चयः, किंतु स्तुतिकुसुमाञ्जलिटीकाकर्तुः राजानकरत्नकण्ठस्य [illegible] 'राजानकविपश्चिद्वर्यः [illegible]। [illegible]' इति स्तुतिकुसुमाञ्जलिटीकायाः [illegible] प्रदर्शितः. रत्नकण्ठेन च स्तुतिकुसुमाञ्जलिटीका १७१८ मिते विक्रमाब्दे प्रणीतेति तत्रैव स्फुटम्. [illegible] १६६९ [illegible]. [illegible]

सूचितम्। येन भगवता सतन्त्रेण धराधराणयोग्यो वासुकिर्हारतां नीतः। एतेन विश्वाधारत्वं ध्वनितम्। तथा तपोपायात्संयमविघ्नविधायित्वात् न त्वीर्ष्यया कोपात्तां विश्वस्य प्रसिद्धां स्मरस्य तनुं जहार ददाहेति प्रतीयते। तामित्यनुभवगोचराम्। अत एव यच्छब्दोपादानं न कृतम्। यदाहुः—'प्रक्रान्तप्रसिद्धानुभूतविषयस्तच्छब्दो यच्छब्दोपादानं नापेक्षते'। तत्र नमस्कारः स्वातन्त्र्यकर्तृत्वाद्भगवतः सर्वातिशायित्वादर्थादेवाक्षिप्तः॥ १॥

रक्षावतारं गम्भीरं भवमुग्रं हरेश्वर।
नय नीतिगुणं तं तु ममताप्रियतामिमाम्॥ २॥

हे ईश्वर परमात्मन्, तदुक्तम्—'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः'। तत्संबोधनम्। भवं संसारं गम्भीरं त्वं हर निवारय। कथंभूतं भवम्। उग्रं कठिनम्। त्वं भक्तानामवतारमवतरणं भवात्पुनःपुनरागमनं रक्ष। कविना च अवतारमवतारनामानं मां पाहीति स्वनाम ध्वनितम्। तु पक्षान्तरे। इमां प्रत्यक्षां सर्वेषां ममताप्रियतामहंकृतिहेवाकितां तं प्रसिद्धं लोकोत्तरं नीतिगुणं नय प्रापय। अत्र च रक्ष अव, तारं गम्भीरं, भवं उग्रं, हर ईश्वर, नय नीति, गुणं तन्तुं, अमत अप्रिय, इति द्वयोर्द्वयोः शब्दयोरर्थस्य पौनरुक्त्यमिवावभासते। भिन्नार्थत्वात्तु पुनरुक्तवदाभासः। 'आमुखावभासनं तु पुनरुक्तवदाभासम्' इति॥ २॥

वदामि ते स्वं रमयन्नमोऽहं वहामि संसारमयं न मोहम्।
तनुर्मुदायोगवता सितेन मुक्तः स्फुरद्योग वतास्मि तेन॥ ३॥

अहं ते तुभ्यं नमो वदामि नमस्कारं करोमि। अनेन कायवाक्चित्तानां प्रह्वीभावः सूचितः। अत एव स्वमात्मानं रमयन्नानन्दयन्संसारमयं मोहमज्ञानरूपं न वहामि। यदुक्तम्—'आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन' इति। हे भगवन्स्फुरद्योग, वत आश्चर्ये। अहं तनुस्तुच्छोऽपि मानुषपादज्ञानात् मुदां हर्षाणां निरतिशयप्रीतिरूपाणाम् आसमन्तात् योग आयोगः तद्वता मुदायोगवता स्वानुभवैकगोचरेण सितेन अणिमतप्राप्त्या हसितेनोपलक्षितः सम्मुक्तोऽस्मि। यमकम्॥ ३॥

सृष्टिस्थिती प्राग्भजता कृतापवर्गोद्यमेनाथ भवान्धकारे।
धृतं त्वया विश्वमतो हतारिवर्गोऽद्य मे नाथ भवान्धकारे॥ ४॥

हे नाथ हे अन्धकारे अन्धकासुररिपो, प्राक् सृष्टिस्थिती भजता कुर्वता त्वया अथानन्तरं भवान्धकारे संसाररूपान्धकारे कृतापवर्गोद्यमेन कृतो भक्तानामपवर्गार्थमुद्यमो येन तथाविधेन। त्रिविधकृत्यकारिणा त्वयैव विश्वं धृतम्। अतो ममापि अद्य हतारिवर्गो भव। हता अरयो मुख्याः कामादयो येन तादृशः। पादयमकम्॥ ४॥

सञ्जातसञ्जाततलोचनाभे संध्यात संध्यातपसा सुराधैः।
माधीनमाधीनपरिग्रहेण कालेन कालेन हतं कृथा माम्॥ ५॥

सन् अकृत्रिमं जातं जन्म यस्य स सज्जातः सज्जः संनद्ध आततो विस्तीर्णो विश्वव्यापित्वाल्लोचनाभिर्यस्य तदामन्त्रणं सज्जातसज्जाततलोचनाभे । तथा सुरैर्ब्रह्मविष्णुप्रभृतिभिर्देवसमूहैः संध्यातपसा त्रिसंध्यं समाधानेन संध्यात सम्यग्ध्यातः । कालेन असितवर्णेन । भयंकरेणेति यावत् । तथा आधीनपरिग्रहेण आधीनां मनःपीडानां ये इनाः स्वामिनो ज्वरादयो रोगास्तेषां परिग्रहः परिवारो यस्य स तादृशेन कालेन मृत्युना हतं सन्तं मां माधीनं कृथाः संपादय । (यद्वा) मायाः शोभाया आधीनमायत्तं माधीनम् । श्वेतराजर्षिवदित्यर्थः । आदियमकम् ॥ ५ ॥

भयोत्सुकानामसमाधिभित्त्वः कश्चिन्मदन्यो न समाधिभिन्नः ।
ये त्वां प्रशंसन्ति सदा सभार्यास्त एव जीवन्ति सदासभार्याः ॥ ६ ॥

त्वं नोऽस्माकमुत्सुकानां सोत्कण्ठानामसमाधिभित् असमा धनहेतवो ये आधयो मनोदुःखान्यभिनत्तीति तादृक् भव संपद्यस्व । यतो मत्सकाशात् अन्यो जनः समाधिभिन्नश्चित्तैकाग्र्यबहिष्कृतो नास्ति । ये त्वां सदा सर्वकालं सभासु मध्ये अथवा निर्णयाः प्रशंसन्ति स्तुवन्ति त एव सदासभार्याः सह दारैर्भार्यया च वर्तन्ते यन्ते सपरिवारा इत्यर्थः । जीवन्ति । पुनः संसारावृत्तिं न लभन्ते । अनश्वरपदप्राप्तेः । अन्ये तु संसारिणो नानाजन्मोपलब्ध्या जीवन्तोऽपि मृता एव । 'ब्रह्माण्डोदुम्बरान्तर्मशकवदपरे जन्तवो जातनष्टाः' इति यावत् । आदिमयकम् ॥ ६ ॥

दैत्यद्विषां त्वच्चरणावलीनामिवाम्बुजे भ्रमरणावलीनाम् ।
स्तुवन्त्यतो निःशरणा बलीनां त्वन्मूर्तिमीतेः सरणावलीनाम् ॥ ७ ॥

दैत्यद्विषां देवानां त्वच्चरणौ अलीनां भ्रमराणामिवाम्बुजे पद्मे भवनः विश्रान्तिस्थानं मनोभिलषितप्राप्तेः स्त इत्यर्थः । कथंभूतानां दैत्यद्विषाम्, भग्नाः पराजिता रणावलयः संग्रामसमूहा येस्तथाविधानाम् । अतो हेतोः निःशरणा मादृशा अपि ईतेः संसारोपद्रवस्य सरणौ मार्गे अलीनामस्थितां त्वन्मूर्तिं स्तुवन्ति । कथंभूताम् । बलीनां बलवतां स्वामिनीम् । तदधिष्ठातृत्वात् । सर्वपादान्तयमकम् ॥ ७ ॥

भवेतिभित्त्वः कुलपामराणां भवेऽतिभित्त्वः कुलपामराणाम् ।
सदासकान्ताय न मोदराय सदा सकान्ताय नमो हराय ॥ ८ ॥

हे अमराणां देवानां कुलप, त्वं नोऽस्माकं कुलमध्ये पामराणामयोग्यत्वदुर्दिनान्तर्गतिभिद् दुर्गतिभिदन्ता भव । अमरत्वमेव भवे संसारेऽतिभिन्न उत्तीर्णः । सह दारैर्वर्तते कान्तश्च सः । सर्वाभिलाषदायित्वात् । सदासकान्तः । हरं । तथा मोदं हर्षं ददाति मोदरः अज्ञानदायी । न मोदरः तस्मै न मोदराय । सदा सर्वकालं सकान्ताय निजर्षिपरिवृताय हराय नमः ।

यद

राजते विष्टपाकारा राकापाहिफणावरा ।
रावणाराधिताक्षारा राक्षाताम्राक्षि तेऽजरा ॥ ९ ॥

पद्मबन्धः ॥

तनुरद्रिसुताकान्त कान्तलावण्यवाहिनी ।
वाहिनीवामृतमयी मयीह विमलातनुः ॥ १० ॥

शृङ्खलायमकम् ॥ (युग्मम्)

हे अद्रिसुताकान्त पार्वतीश, तव संबन्धिनी तनुर्मूर्तिः राजते । कथंभूता । विष्टपाकारा विष्टपं जगत् तदाकारा । तथा राकापः पूर्णचन्द्रः तथा अहिफणाः ताभिर्वरा उत्कृष्टा । तथा रावणेनाराधिता सेविता । अक्षारा न क्षारा । (मधुरा) सौम्यस्वभावेत्यर्थः । तथा राक्षा लाक्षा तद्वत्ताम्रमक्षि यत्रेति क्रियाविशेषणम् । राक्षाताम्राक्षि राजते इत्यर्थः । तथा अजरा जन्मादिरहितत्वात् । कान्तलावण्यवाहिनी अमृतमयी वाहिनी नदीव । अतनुर्बहुला । युगलकम् । आद्यः श्लोकः पद्मबन्धः । द्वितीयः शृङ्खलायमकम् ॥९॥१०॥

दरवति वरदय भटभयदपणक्षणपथरथपर पुरशरसमरे ।
मदमयरणरय जय जय खमत क्षतमखसुरवरसुखद शिव ॥ ११ ॥

महादेवबन्धः । जागेश्वरबन्ध इत्यर्थः ।

हे शिव, त्वं जय जय । किंविध । दरवति सभये मादृशे वरदय वरा उत्कृष्टा दया यस्य । अन्धकादीनां विश्वकण्टकानामपि दुर्लङ्घयवा गाणपत्यप्रतिपादकत्वात् । तथा भटानां भयदः पणो व्यवहारो यस्य तादृशः । तथा क्षणं पन्था यस्य तादृग्यो रथस्तत्र पर उद्योगवान् तदामन्त्रणं भटभयदपणक्षणपथरथपर । तथा पुराणां त्रिपुराणां शरसमरे बाणयुद्धे मदमयः साहंकारो रणरयः संग्रामवेगो यस्य तदामन्त्रणम् । तथा खमत खानामिन्द्रियाणां मताभिप्रेत । तदधिष्ठातृत्वात्सर्वेन्द्रियाणाम् । तथा क्षतो मखो दक्षाध्वरो येन । तथा सुरवराणां सुखं ददातीति तत्संबोधनम् ॥ ११ ॥

क्रूरा नराणां भवता शोधनीयाविभागतिः ।
चराचराणां भवता बोधनीया शुभा मतिः ॥ १२ ॥

क्रूरा दुःसहा संसारे रता नराणां भक्तानां भवता स्वामिना अविभागतिस्तामसी मतिः शोधनीया । चराचराणां जङ्गमस्थावराणां शुभा मतिर्भवतैव बोधनीया । अयं गोमूत्रिकाबन्धः ॥ १२ ॥

नरकं कालमालभरणा हि तरसा श्रिताः ।
नरकङ्कालमालाभरणाहितरसाश्रि ताः ॥ १३ ॥

काञ्चीगोमूत्रिकाबन्धौ समुद्गयमकम् ॥

ततेतितति तांतैता मम मा मामिमाममाः ।
ललल्लोलालिलीलालैरुरुरोरारैररम् ॥ १४ ॥

पादैकाक्षरः ॥

यमवाराङ्गनाः कान्तैरवसादरतापदैः ।
समं त्रस्ता भवभक्तिरवसादरतापदैः ॥ १५ ॥

त्रिभिः श्लोकैर्वाक्यार्थतिलकम् ॥

हे तात पूज्य, ता यमवाराङ्गना मृत्युस्त्रियो भवद्भक्तिरवसादरतापदैः भवति विषये यानि भक्तिरवाणो सादरता तस्याः पदानि वाक्यानि तैः त्रस्ता भीताः कान्तैर्भर्तृभिः समं सह । कथंभूतैर्भर्तृभिः । अवसादरतापदैः अवसादं विनाशं रान्ति ददति तापं च ददति तादृशैर्भर्तृभिः साकं त्रस्ता भीताः । भवदीयभक्तजनस्तुतिवाक्यं श्रुत्वैव त्रस्ता इत्यर्थः । इमां मम संबन्धिनीं मां लक्ष्मीं मा एता न प्राप्ताः माशब्दो निषेधार्थः । अमा अभीकाः । पुनः कथंभूताः । तरसा बलेन हि निश्चयेन नरकं श्रिताः । तता विस्तीर्णा या ईतिततय ईतीनां विघ्नानां ततयः समूहा यत्र तथाविधं कृत्वा कालमालाभरणा कालस्य मा लक्ष्मीस्तल्लाभार्थं रणो यासां तथाविधाः । पुनः कथम् । नरकङ्कालमालाभराहितरसाब्धि । नराणां कङ्कालमालाभिर्यान्याभरणानि तैराहितः रसाब्धिः रसपर्यन्तो यत्र तथा । पुनः कथंभूतैर्भर्तृभिः । ललल्लोलालिलीलालैः ललन्त उल्लसन्तो लोलाश्च तेऽलयस्तल्लीलां लान्ति कृष्णत्वात् ये तैः । उरुरोरारैः उरु बहुलं च तत् रोरं दारिद्र्यं उरुरोरं तथा अरीणां समूह आरं उरुरोरं च आरं च तत् उरुरोरारं तं रान्ति ददति तथाविधैः । अरमलमर्थम् । अत्र वाक्यार्थतिलकेन प्रथमः समुद्गकयमकं काञ्चीगोमूत्रिकाबन्धौ च । द्वितीयः पादैकाक्षरः । तृतीयः पादयमकम् ॥ १३ ॥ १४ ॥ १५ ॥

प्रलापिनं मा रसेनाभयप्रद यमाकुलम् ।
आगत्य त्वरितं तीव्रप्रभावोचितविग्रह ॥ १६ ॥

हे तीव्रप्रभ, तथा उचितविग्रह, अभयप्रद, त्वं मा कर्मभूतं अव रक्ष । केन । रसेनादरेण । मा कीदृशम् । यमाकुलं यमादाकुलम् । तथा प्रलपति तच्छीलः प्रलापी तं प्रलापिनम् । त्वरितमागत्य । गूढकर्मक्रियोऽयं श्लोकः ॥ १६ ॥

चिरार्तिचिच्चेतितिचिंतैरिताराचराचराचारचरित्रचार ।
रैचारुता चित्रतराचिरार्चीरीतिं रतैररुचौररोरैः ॥ १७ ॥

द्व्यक्षरः ॥

हे भगवन् चराचराचारचरित्रचार, चराचराणां जङ्गमस्थावराणां यदाचारचरित्रं तस्य चारश्चरणं यस्य तत्संबोधनम् । रैचारुतायां धनानां चारुता ऐश्वर्यं चित्रतरा आश्चर्यां क्ष-

निकरपादचिरार्चितो विधुनो रीतिमिता प्राप्ता । कैः हेतुभूतैः । उरवो बहुला ये चौरास्तया रोरानि दारिद्र्याणि (तैः) उदर्पाररोरैः । कैः । रतारैः रतस्य चित्तविश्रान्तेरारानि आरं- रामूहा इव तैः । पुनः कथंभूतैः । चिरं या आर्तिस्तया चित्तेविथिचित्तबाधा च तया चि- तेर्म्यासैधिरार्तिचित्ततिचितैः । आरादूरतः । त्र्यक्षरोऽयं श्लोकः ॥ १७ ॥

मुदात्तसारा घुसभासमाना सभासमानाङ्गमुदात्तसारा ।
विभावसुस्थान भव प्रभा ते भवप्रभाते रविभावसुस्था ॥ १८ ॥

व्यावृत्तयमकम् ॥

हे भगवन् भव, विभावसोर्नेत्राश्रयस्य वह्नेः स्थान आश्रय, भवप्रभाते संसारोदये सति ते तव संबन्धिनी प्रभा रविभाववत्सुस्था सामस्थ(स्वास्थ्य ?)वती । यतः मुदा हर्षेणात्तं सारं यस्याः मुदात्तसारा । घुसभायां देवसदसि समाना सह मानेन पूजया वर्तते या । सभासनानानि रुचिराण्यङ्गानि यत्र तथाविधं कृत्वा उदात्तमुद्भटं बलं यस्याः॥ व्यावृत्तयमकम् ॥ १८ ॥

देहान्तकाले स्वरसेन पाहि यमात्प्रभो भास्वरलोचनाज ।
शमैकसर्वस्व सभूरिकामां मां यच्छ देवेश जहीहि मां मा ॥ १९ ॥

वज्रबन्धः ॥

हे भास्वरलोचन धामत्रयनेत्र, अज अनादे, शमैकसर्वस्व उपशमैकसाधन, त्वं मां देहान्तकाले मरणसमये स्वरसेन कृपया यमान्मृत्योः पाहि । तथा भूरयो बहुलाः कामा मनोरथानि यस्यां सा तादृशीं सर्वाभीष्टप्रदां मां लक्ष्मीं यच्छ वितर । मां च मा ज- हीहि । मा परित्यज ॥ वज्रबन्धः ॥ १९ ॥

तनुस्त्वदीया भगवन्स्मरारे रसासुखं मुक्तिसुखं सुसार ।
शुभावहा भक्तिपरायणानां सादान्तताक्छिन्नकृतान्तदासा ॥ २० ॥

हे भगवन् सुसार शोभनबल, स्मरारे, तव संबन्धिनी तनुर्मूर्ती रसायां सुखं लक्षणया भूतलस्थानां जनानां सुखदायिनी । तथा मुक्तिसुखम् । भोगमोक्षप्रदेत्यर्थः । अत एव भ- क्तिपरायणानां शुभावहा । तथा सादस्यावसादस्यान्ततविच्छेदस्तेन हेतुना छत्ताश्छिन्नाः कृतान्तदासा यमभटा यया । लड्डुकेभ्यस्ते निराशाः पलायन्ते नन्दिरुद्रवत् ॥ २० ॥

स्थिरासुरापक्षपरा सुरास्थिमालावरासन्नसरावलामा ।
वादे हिता मन्नमताहिदेवातिभाविता नुत्यनुता विभाति ॥ २१ ॥

प्रतिलोमानुलोमपादः । युगलकम् ॥

· त्वदीया तनुरित्यनेन पूर्वश्लोकस्थेनान्वयः त्वदीया तनुर्विभाति । कीदृशी । स्थिरा ऽसुरा अन्धकादयस्तेषामपक्षपरा प्रतिपक्षभूता । सुराणां ब्रह्मादीनां चास्थिमालादिभि-

र्थेरा उत्कृष्टा । तथा आसन्ना निकटा सरावा नादयुक्ता लामा उत्कृष्टरूपा देवता यस्यां सा आसन्नसरावलामा । तथा वादे चतुर्दशविद्यास्थानविशारद (विचार)विषये हिता । भक्तविद्वज्जनेभ्य इति शेषः । तथा मन्त्रैर्मननत्राणधर्मादिभिर्देवतोच्चारकपदैर्मता भाविता । यदाहुः—'मन्त्रमूर्तिस्तु देवता' इति । तथा अहिभिर्नागैर्देवैश्चातिभाविता अतिध्याता । तथा नुत्या स्तुत्या ये ब्रह्मादयस्तैरपि नुता नुत्यनुता । एवंविधा त्वदीया तनुर्विभाति । 'अमत्रमता' [इति पाठे] अमत्रेभ्यः पात्रेभ्यो मता अद्वयः सर्पा यस्यां तादृशी देवातिभाविता च । [इत्यर्थः] । युगलकम् । आद्यो युक्पादप्रतिलोमः । द्वितीयः प्रतिलोमानुलोमपादः ॥ २१ ॥

तनोति ते तात नुतौ नितान्तं नूनं नतानां तनुतां न नीतिः ।
नेनेन नो नूतनतां तु नीता तेनोन्नतानन्ततनो ततेतिः ॥ २२ ॥

द्व्यक्षरः ॥

हे भगवन्, तात पूज्य, उन्नतानन्ततनो, उन्नता अनन्ताः पृथ्व्यादयस्तनवो मूर्तयो यस्य तत्संबोधनम् । ते तव संबन्धिनी नीतिः नतानां भक्तानां नुतौ स्तुतौ सत्यां नूनं निश्चितं तनुतां लघुतां न तनोति । दार्ढ्यमेव पोषयति । तु पक्षान्तरे । तेन हेतुना इनेनार्यद्भवता स्वामिना नोऽस्माकं तता विस्तीर्णा ईतिः संसारबाधा नूतनतां नवत्वं न नीता । भवत्स्तुतिमात्रेण वयं मुक्ता इति सूचितम् । श्लोकोऽयं द्व्यक्षरः ॥ २२ ॥

हर प्रभो परं वन्द्य रक्षोभागेऽस्थिरो भव ।
प्रभावितदमो रोरं भोगातत्त्व सदस्थिप ॥ २३ ॥

अर्धभ्रमः ॥

हे प्रभो भव, त्वं रोरं दारिद्र्यं हर निवारय । परमत्यर्थं वन्द्य वन्दनीय । कथंभूतस्त्वम् । रक्षसां हिंसापराणामपि भागे संविभागेऽस्थिरश्चपलः । दानादावपि सर्वलो(प)कहितहेतुना कीलितः । पुनः कथंभूतः । प्रभावितः सर्वजनोपलक्षितो दम इन्द्रियजयो यस्य । तथा प्रभो कथंभूत । भोगातत्त्व भोगा अतत्त्वं यस्य । आभासमानत्वात् । पुनः कथंभूत प्रभो, सदस्थिप सन्ति शोभनान्यस्थीनि भूषणतया पाति रक्षतीति तादृश ॥ अर्धभ्रमः ॥ २३

काण्र्येन भगवन्नास्ति तव कण्टच्छवेः समा ।
कालिकाकालिकाङ्गलीलीलाक्ष परवीरप ॥ २४ ॥

त्रिशूलबन्धः ॥

परा उत्कृष्टा ये वीरास्तान्यः पाति तादृश परवीरप । 'वीतरागभयद्वेषो रहितः सर्वदोषतः । सर्वभूतानुकम्पी च वीर इत्युच्यते बुधैः ॥' इति । तव संबन्धिन्याः कण्टच्छवेः कान्त्या समा अस्ति । कीदृशी । कालयः तथा शावानामालयः पङ्कयः तथा कालानामाली च लास्यमिव लीला विविधास्तिर्यस्यास्तादृशी कृष्णत्वेन ॥ २४ ॥

मरमेरारमोराऽमरारामोऽरमोऽरिरः ।

मुराररामा रोरोऽरमुमारामो ममोरुराः ॥ २५ ॥ द्व्यक्षरः ॥

मन मेदः सर्वदेवताधिष्ठानस्थानमपि मरुर्निर्जलप्रायो देश इव नावर्जकः । मारः कामोऽपि सर्वजनमनःक्षोभोऽरिः शत्रुः । तथा अमराणां देवानामारामो विश्रान्तिप्रदो नन्दनादिप्रदेशः सोऽपि अरमः शोभारहितः । अतएव अरिरः अरीन् रातीति असुरसान्द्र इव । मुरारेर्विष्णो रामा लक्ष्मीर्भगवती रोरो दारिद्र्यम् । अरमलर्घ्यम् । उमारामो उमया सह योऽवश्यं रमते स पार्वतीवल्लभः स एव उरुराः महदुत्कृष्टं निधानभूतं धनम् ॥२५

विहाय सस्यसंपन्नां सेव्यः स्वामी शिवं भवेत् ।

येनाप्यो दिवि पन्थानो राजेनत्वं च तिष्ठति ॥ २६ ॥

अपशब्दाभासः ॥

नोऽस्माकं सस्यसंपन्नां धान्यादिसमृद्धिमत्त्वं विहाय स्वामी विश्वेश्वरः सेवनीयः । येन हेतुना शिवं कल्याणं भवेत् । दिवि च यः पन्थाः सचाप्यः प्राप्यः । राजेनत्वं राज्ञां मध्ये इनत्वं प्रभुत्वं च तिष्ठति । अत्र विहायस्स, संपन्नां, शिवं, स्वामी, सेव्यः, पन्थानः आप्यः, राजेन, त्वं तिष्ठति इति सर्वेऽपि शब्दा अपशब्दा इवाभासन्ते अतोऽपशब्दाभासोऽयम् । अर्थान्तरप्रतीतौ निर्दोषः ॥ २६ ॥

न भासते ते सभा न भाविताममता विभा ।

सता वदे देवतास ते मदेन नदेऽमते ॥ २७ ॥ सर्वतोभद्रः ॥

भग्ना वयं भवमये नोद्धृताः पशवस्त्वया ।

यास्त्ववस्था रुजां भामाभाजां रुद्र ता हर ॥ २८ ॥

परशुबन्धः ॥ युगलकम् ॥

द्वयोष्टीका—हेभगवन् देवतास, देवतानां ब्रह्मविष्णुप्रभृतीनामासनं स्थितिः रक्षणं क्षेपणं विनाशो वा यस्मात् तत्संबोधनम् । ते तव सभा न न भासते । अपि तु सर्वोत्तमा भासते एव । किंविधा । भावितानां नन्दिप्रभृतीनां अममता निरहंकारता तया विभा दीप्तिर्यस्याम् । सता सत्यरूपेण ब्रह्मणा वदे । वदे इति 'संभाषणोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः' इत्यात्मनेपदम् । ते तव वयं मदेनाहंकारेण नदे भवमये अमते अनीप्सिते दुस्तरे तडाके भग्ना त्रुडिताः सन्तः पशव इत्यज्ञानपरत्वात् त्वया नोद्धृताः । हे रुद्र रुजां दुःखानां भामः क्रोधः अमा अलक्ष्मीस्तद्भाजां रुजां या अवस्थास्ता हर निवारय । इति युगलकम् । एकः सर्वतोभद्रो द्वितीयः परशुबन्धः ॥ २७ ॥ २८ ॥

कलिकालकलालीककेलिः कलकलाकुले ।

कालेऽलिकोकिलाकाले कोऽलं लोले कुले किल ॥ २९ ॥

द्व्यक्षरः ॥

थो नामालं समर्थो भवति । अपि तु न कश्चित् । कुले गृहे । शरीर इत्यर्थः । कुले शरीरे लोले अस्थिरे गति यतः कलिकाले याः कलामासामियं दलीकं नटेव केलिः खेलनं यस्य । तथा कलकलैर्नानाविधोरवलिकामिराकुले क्षुभिते । तथा काले मृत्यौ आमदीदर्यः । तथा अलयो भ्रमगम्यया कोकिलाश्च तद्वत्काले तामसे ॥ २९ ॥

आमातिमाति भवतस्तव कालमार्कि
संचिन्तय स्मरहरोग्रतनुं कृशाङ्गम् ।
मां मास्य मुञ्च भव भीममलं कलङ्कं
हन्तातिकष्टममराधिप देव तेन ॥ ३० ॥

पुनरुक्तवदाभासः सर्वपदाश्रयः ॥

हे स्मरहर, हे देव, हे अमराधिप, हे भव, एतान्यामन्त्रणानि गीतोक्त्या च पुनरुक्तानि तवाभा शोभा अतिभाति अतिशयेन भाति । आर्कि उग्रतनुं रौद्रशरीरं संचिन्तय । कथंभूतमार्किम्, कालमतिमलीमसम् । तथा भवतो जन्महेतोः मां कृशाङ्गमतिभीत्या क्षामतनुं संचिन्तय । अतिदयालुतयेति शेषः । तेन हेतुना हन्ता वधकः तादृशानामुग्रशरीराणामपीत्यर्थः । त्वमस्य कालस्य भीमं भयदायकमतिकष्टं कलङ्कं मा मुञ्च । कलङ्कं सर्वथा जहीत्यर्थः । अत्र च आभाति भाति, भवतः तव, कालं आर्कि, संचिन्तय स्मर, हर उग्र, तनुं कृशाङ्गं, मां मा, अस्य मुञ्च, भव भीम, मलं कलङ्कं, हन्त अतिकष्टं, अमराधिप देवदेवेन, इति सर्वपदाश्रयत्वं पुनरुक्तवदाभासस्य । देवतानामिनो देवदेनस्तदामन्त्रणम् ॥ ३०

यजने वर धीसाररसामानससारस ।
सरसासनमासाररसाधीरवने जय ॥ ३१ ॥
दक्ष दासवरासारनद मत्तकृतारव ।
वरताकृतमदन रसाराव सदाक्षद ॥ ३२ ॥ युग्मम् ॥

हे भगवन्, त्वं जय । किंभूत । यजने यज्ञे वर उत्कृष्ट । तथा धीसाराणां योगिनां या रसा भूमिः सैव मानसं तत्र सारस हंस । तथा दक्ष निपुण । तथा दासानां निजभक्तानां वरा एव आसारस्तत्र नद सरोविशेष । तथा मत्तेषु कामाद्युन्मादयुक्तेषु कृत आरावस्त्राणवाग्रूपो येन । तथा वरतया उत्कृष्टतया कृतो मदनो येन तादृश । तथा रसो रसयुक्तः । अर्शआदित्वादच् । आरावः संजल्पो यस्य तदामन्त्रणम् । तथा सदा सर्वदा अक्षान्भवपाशरूपान् द्यूतपाशकान् द्यति हन्तीति तादृश सदाक्षद । कस्मिन् । सरसासनमासार रसाधीरवने । सरसमासनं स्थितिर्येषां ते मासा लक्ष्म्याः साराः रसायां भूमौ ये धीरास्त्वदेकताना भावुकास्तेषां वनं समूहस्तत्र । युगलकम् ॥ ३१ ॥ ३२ ॥

तवैव मूर्तिः शिव धर्मराजसुहृत्समानामसुहृत्समाना ।
शुभावहा तत्त्वजुषां निरस्तधनादराणां निधनादराणाम् ॥ ३३ ॥

हे भगवन् शिव, तवैव मूर्तिः असुहृत् प्राणहृत् भवति । केषाम् । धर्मराजसुहृत्समानां यमसुहृत्सदृशानां तत्प्रियलोकानां तत्किंकराणां वा । कथंभूता समाना सह मानेन पूजया वर्तते या सा । पुनः किंविधा । निरस्तधनादराणां दूरीकृतधनाभिलाषाणां तत्त्वजुषां सदेकतानानां जनानां अराणामश्रिसमूहानां भवपादरूपाणां निधनात्कर्तनाच्छुभावहा शुभदा । युक्पादाद्यन्तयमकोऽयं श्लोकः ॥ ३३ ॥

भूयाद्भक्तिस्त्वय्युमाकान्त तीव्रासारा दक्षामोक्षादरा सा ।
नो चेन्नैषा जीयते कालसेना या कालिम्ना नित्यनिम्नालिकाया ॥३४॥
युक्पादप्रतिलोमः ॥

हे भगवन् उमाकान्त, त्वयि सा भक्तिर्मम तीव्रासारा अविच्छिन्ना भूयात् । पुनः किंभूतः । दक्षा निपुणा । पुनः किंभूता । अमोघः सफलो मोक्षे आदरो यस्याम् । नो चेद्भक्तिस्तव स्यात् तर्ह्येषा कालसेना मृत्युचमूर्जन्ममरणादिरूपा न जीयते । केनापीत्यर्थः । एषा कालसेना का । या कालिम्ना मलीमसत्वेन नित्यनिम्नोऽतिनीचोऽलिकायो भ्रमरकायो यस्याः सा । भ्रमरकायादप्यत्यन्तमलिनेत्यर्थः ॥ ३४ ॥

न नानाघानि नूनं नो न ना नीनानना न नः ।
नानु नानेन नुन्नैना ननु नेनाननेन नौः ॥ ३५ ॥ एकाक्षरः ॥
दृष्टेन लभ्या भवता नयनानलसाधुना ।
मुक्तिरूपा भवाब्ध्यन्ता नयनानलसाधुना ॥ ३६ ॥
पादयमकम् ॥ युग्मम् ॥

नूनं निश्चये नोऽस्माकं नानाघानि नानाविधानि अघानि न भवन्ति । यतः नीनाः निर्गत इनः स्वामी येषां ते नीनाः स्वामिरहिताः । अननाः अविद्यमाना अनाः प्राणा येषां ते अननाः । निष्प्राणा एवेत्यर्थः । नानुना इत्यादि । अनेन हेतुना अनु अविद्यमाना नौर्यस्मिन्कर्मणि तत् । अनु न भवति काका भवत्येवेत्यर्थः । ना नरः स्वामी न भवति केषाम् । नः । ननु निश्चये । इनाननेन इनस्याननं मुखं यस्य स इनाननो लक्ष्मीवान् नेनाननो दारिद्र्यस्तेन नेनाननेन दरिद्रेणापि मुक्तिरूपा नौर्लभ्या । कदा । अधुना । केन हेतुना । भवता । कथंभूतेन दृष्टेन । पुनः कथंभूतेन । नयनानलसाधुना नयनानलेन साधुः प्रशस्यः(?) तेन । मुक्तिरूपा नौः कथंरूपा । भवाब्ध्यन्ता भवाब्धेरन्तो यस्याः सा । पुनः कथंभूताः । नयनानलसा नयने प्रापणे अर्थाद्भवोत्तारणे अनलसा सज्जा इति । मुक्तिरूपा नौः पुनः कथंभूता । नुन्नैनाः नुन्नं नोदितमेनः पापं यया (युग्मम्) इति सज्जनं प्रति । आर्यावृत्तिः । (अधुना इदानीम्) आद्य एकाक्षरः द्वितीयं पादयमकम् । इह शब्दपौनरुक्त्यभ्रान्तिर्भिन्नलिङ्गत्वान्न प्राप्ता । माघकाव्यकिरातार्जुनीयादिकाव्येषु बहुस्वपि पदार्थानां पौनरुक्त्यं दृश्यते तच्च पूर्वाचार्यैःसमर्थितम् । यथा—'यमकश्लेषचित्रेषु नातिरदर्शेऽदः कार्यः' इति । अस्य कवेः कवितौ नयकल्पादिषु कल्पतः (?) । चित्रकाव्यस्य दुष्करत्वात् ॥ ३५ ॥ ३६ ॥

सुसुररससभाभा स्वस्वदादाववक्र-
क्रममनुसुततत्त्वा स्वाततप्रप्रजाजा ।
ननव वधधनानाञ्चञ्चला लाभभव्य-
व्यस सततममन्दान्दाससङ्गङ्गते ते ॥ ३७ ॥ आवलिः ॥
मयि तनुमुचितां तां दर्शयस्वेदृशीं या
रविजजविरणत्रा त्राणरक्तातिभाति ।
जय जय जगतस्त्वं तत्त्वतज्ज्ञोऽसि भासि-
न्रसिक सदसदासस्ते भवे भर्ग भव्यः ॥ ३८ ॥

एतस्य श्लोकस्य प्रथमार्धेन त्रिशूलबन्धः, द्वितीयार्धेन गदाबन्धः । मालिनीवृत्ताभ्यां युगलकम् ॥

हे भगवन् भर्ग, न [नव] नव्य आदि [भूत] लाभभव्यव्यस लाभेन हेतुनोत्कृष्टो व्यसो विशेषेणासनं त्यजनं यस्य हेतोः । पदार्थानामनन्तफलदत्त्वात् । तथाविध । हे भासिन् भासनशील रसिक भक्तजनप्रिय, ईदृशीं तनुं मयि ते तव दाससङ्गं गते आशु त्वरितं दर्शयस्व । या तव तनुरेवंभूतातिभाति सातिशया शोभते । कथंभूता । सुसुररससभाभ सुष्टु सुराणां रसा यस्यां तथाविधाया सभायामाभा यस्याः । आदावादावेव स्वस्वदा मरुत्तादिभ्यो भक्तेभ्यः स्वमात्मीयं स्वं धनं ददातीति तथा । अवक्रक्रमं कृत्वा अकौटिल्येन अनु पश्चाच्छ्रुतं तत्त्वं यस्याः सा । तु पक्षान्तरे आतता विस्तीर्णा प्रकृष्टा प्रजा प्रप्रजा सप्तर्षिप्रभृतिसकलनिर्माणं यस्यास्तथाविधा । स्वयं पुनरजा जन्मरहिता । तथा वधधनानां हिंसाजीवनानामसुरादीनां चञ्चलास्थिरा । सततं सर्वकालममन्दां निरयोद्युक्ताम् । तां तनुमिति संबन्धः । तथा या च वे तनुः रविजस्य यमस्य ये जविनो वेगवन्तः । अर्थाद्दूताः । तैः सह यो रणस्तत्त्रायते तथाविधा । अत एव सर्वेषां त्राणरक्ता । अत एव त्वं जगतां तत्त्वविषये तज्ज्ञोऽसि विचारनिपुणः । जय जय । सदसतोर्नित्यानित्ययोर्यं आस आस्थाऽपरस्ते तव भवे संसारे भव्य उत्कृष्टः । सतः सत्त्वेन स्थितिर्भवता कल्पिता, रत्वेन । यदाहुः—'कस्तु भवतत्ता-
प्रत्यक्षवत्प्रमाणमभ्युपति-
त्र युगलके एक आवलिः ।
३७ ॥ ३८ ॥

चक्रोऽयम् ॥

असौ गिरिशो महादेवः, गिरीणामीशो मेरुः, गिरि वाचि ईशो बृहस्पतिश्चेति त्रय उक्ताः । तत्राद्येऽर्थे—गिरीशो महादेवो जयति । सु शोभनानि रदानि ददातीति सुरदः तथा अनवमत्वेनोत्कृष्टत्वेन सु शोभनानां वर्णानां ब्राह्मणादीनामक्षराणां वा आ समन्तात्कृतिः सृष्टिर्यस्मात्स सुवर्णाकृतिस्तादृशो विग्रहः शरीरसंनिवेशो यस्य । नागराजादीनां प्रथया प्रतिज्ञया लक्ष्यो विरहितः सर्वाङ्गभूषणत्वात् । तत्साहितः । एकोऽर्थः ॥ मेरुरपि—सु शोभनाः रदा गह्वराणि यस्य स सुरदः । नवोत्कृष्टा मा लक्ष्मीर्यस्य तद्भावेनोपलक्षितः । सुवर्णमयी आकृतिर्यस्य । विविधानां वस्तूनां ग्रहो ग्रहणं यस्य च । न अगराजप्रपालकः पर्वतराज एव । द्वितीयोऽर्थः ॥ बृहस्पतिः—नवमत्वेन सुरदः 'जीवः रासनवद्विरयमगतः' इति । तथा सुवर्णा शोभनवर्णाकृतिर्यस्य तथाविधो विग्रहः संनिवेशो यस्य । भासमानाकृतित्वात् । 'बृहस्पतिर्भ्राजस' इति श्रुतिः । विशिष्टो ग्रहो वा विग्रहः । नागराजस्य दन्तिनः प्रथया लक्षः । गजवाहनत्वात् । प्रथया अति अक्षो वा सर्वोत्कर्षेण वर्तनात् । इति तृतीयोऽर्थः ॥ ३९ ॥

भवभव्य भवातीत तत्त्वतज्ज्ञ तमोहर ।
रणे रक्त रसेनैहि हिताहिसहितार्थद ॥ ४० ॥
दयादक्ष दहाघानि निन्द्यानि त्वं विरामय ।
यमायत्तं यतित्वाव वर वन्द्य वरेण्य माम् ॥ ४१ ॥

द्वाभ्यां गदाबन्धः ॥ युगलकम् ॥

हे भवभव्य सर्वोत्कृष्ट । भवं संसारमतीत निर्मुक्त । तत्त्वेन परमार्थेन तज्ज्ञ सम्यक्परमार्थज्ञ तद्ब्रह्म जानातीति तज्ज्ञ । तमोहर सर्वजनानामज्ञानध्वान्तघ्न । रणे विश्वकण्टकोद्धरणार्थं रक्त हेवाकिन् । भैरवत्वात् । रसेन कृपाविशारद आदरेण एहि । हितसर्वजनेभ्यः, अहिभ्यः शेषादिभ्यः, सहितमरुत्तादिभ्यो भक्तेभ्योऽर्थद । दयायां दक्ष कुशल अघानि पापानि दह शान्ति नय । निन्द्यानि पापानि विरामय अधःकृतोरग । यमस्यायत्तं मा मरणधर्मित्वान्मर्त्यानां यतित्वा प्रयत्नपूर्वं अव रक्ष । वर वन्द्य वरेण्य इत्यामन्त्रणपदानि ॥ ४० ॥ ॥ ४१ ॥

न ततुतां दधती तततोदिता तुदति नीतिनिधे निधने तनुम् ।
निधिदनाथ ततं ननु नूतनं नुतिधनं तदिदं निददानि ते ॥ ४२ ॥

तवर्गबन्धः ॥

हे निधिदनाथ कुबेरस्य स्वामिन्, हे नीतिनिधे, तततोदिता तोदा रोगाः । तततोदिता बहुलरोगिता निधनेऽन्तसमये तनुं देहं तुदति व्यथयति । यतस्ततुतां न दधती । बहुलेत्यर्थः । ततोऽस्माद्धेतोरहं ते तुभ्यं नूतनमिदं नुतिधनं स्तुतिरेव वित्तं निददानि । नीतेर्विश्वस्थितिरूपाया निधे आस्पद । ततं विस्तीर्णम् । ननु संमुखीकरणे । द्रुतविल-

सा राजते तनुरलं वरदा परासा-
सारापदारहित सन्महहासदासा ।
सादासहाहृतभवोत्करकाविलासा
सालविकारपृथु साक्षततेऽजरासा ॥ ४३ ॥

अष्टदलपद्मबन्धः ॥

हे भगवन्, असारायोग्या चासावापत्तया रहित असारापदारहित, तथा सह अक्षतत्वाक्षमालया पाणिगया सह वर्तते यः स तदामन्त्रणं साक्षतते, ते तव संबन्धिनी सा तनुः राजते । वरान्ददातीति वरदा । परानस्यतीति परासा । परेषां शत्रूणामासः कोपो वा यस्याः सकाशात् । सन्मह उत्कृष्टोत्सवो हासः प्रमोदो येषां तथाविधा दासाः सेवका यस्याः सा सन्महहासदासा । तथा सादं न सहन्ते इति सादासहा मृदवस्ते- षामा समन्तादृतो भव एवोत्कः करकाणां वर्षोपलानां विलासो बाहुल्यं यया सा सादा- सहाहृतभवोत्करकाविलासा । कथम् । सालवदविकारपृथु निर्विकारप्रांशु कृत्वा । तथा अ- जरासा न विद्यते जराया आसा आस्था यस्याः ॥ पद्मबन्धोऽयं वसन्ततिलकेन ॥ ४३ ॥

वरा सारवरासारपराभवपरा भव ।
समुद्गृता समुद्गृतातनुस्तव तनुस्तव ॥ ४४ ॥

यमकावली ॥

हे भगवन् भव, समुद्गृतातनुस्तव सम्यग् उद्धृतानि छन्दांसि अनुष्टुप्प्रभृतीनि येषु तथाविध । अतनवो बहलाः स्तवाः स्तोत्राणि यस्य तादृश, तव संबन्धिनी तनुर्वरो- त्कृष्टा । तथा सारा मुख्या ये वरास्तेषामासारो बहलवर्षणं तत्र परोत्सुका सारवरासा- रपरा । तथा अभवं मोक्षं पिपर्ति पोषयति अभवपरा । तथा समन्तादुद्गता सैरवला- द्गुस्वरा ॥ ४४ ॥

साध्या मूर्तिर्गुणैर्या ते भावितत्वमतारसा ।
सारताबाधितविभा रविजस्य सदैव सा ॥ ४५ ॥

क्षुरिकाबन्ध ॥

सा तव मूर्तिर्दमनियमादिभिर्गुणैः साध्यासाध्या । सा का । या भावितत्वेन भ[illegible] भावितत्वमता । तथा अरसा वीतरागा । तथा सारतदोत्कृष्टत्वेन [illegible] विभा यस्या । कस्य । रविजस्य यमस्य । सदा सर्वदैव ॥ इति क्षुरिकाबन्ध ॥ ४५ ॥

सुरवे याते साव ममारेऽसम सुकुमार सदानव देव ।
अनवद्यार्चित भव मदनारेऽचल मत्प्रणतिसदने मयि देव ॥ ४६ ॥

सम्पूर्णचक्र[illegible]श्लोकः ॥

हे भव, कौ भूमौ रये सूर्यवत्प्रकाशद कुरवे, मदनस्यारे मदनारे, काले समये हे साव सद्भावेन रक्षणेन वर्तते यस्तत्संबोधनम्। अहं स्मरामि मद्भक्तं नयामि परमां गतिमिति यावत्। यमस्यारे यमारे। अरस संसारवासनोज्झित। सदा नित्यं नव तरुण। देव दिवु क्रीडाव्यवहारादिधात्वर्थवाचक। अनवदयया कृपया चित व्याप्त। अचल स्थिर। उक्षिपु यते उद्युक्ते उक्षियुक्ते मयि विषये। अत एव मामव। इति पुराणपुरुषसंस्कृतभाषार्थः॥ कुरवे काले काश्मीरभाषया सर्वे मारिताः। रसमुकुमाराः सदा नवा देवाः। अनवद भाषया निरवधीत्यर्थः। याचितभव प्रार्थितसंसार इति मदनारे इति मदवह्निना मुक्ताः। तादृशा अपि। इति काश्मीरभाषार्थः॥ एवं संस्कृतकाश्मीरापभ्रंशभाषाश्लेषः॥ ४६॥

सा रसावर सारम्भ तरसावरसारता।
तारसाररसा भक्तिस्थिर सावरसाभया॥ ४७॥
उल्लसद्विजरानन्द शिव सद्विजराज यत्।
मूर्तिराभाति ते भव्या सा स्थिराभातितेजसः॥ ४८॥

अयं तूणबन्धः॥ युग्मम्॥

हे शिव, सद्विजराज चन्द्रभूषण, रसायां भुवि वरो मुख्यः सहारम्भेण वर्तते विश्वकर्मणा वर्तते यस्तदामन्त्रणम्। तथा भक्तिस्थिर। तथा उल्लसन् विजरो जरारहितस्तरुण आनन्दो निरतिशयप्रीतिलक्षणो मोक्षपर्यायो यस्य स तथाविध। तव संबन्धिनी सा मूर्तिर्भव्योत्कृष्टा आभाति। अतितेजसः परमानन्दस्याभा स्फुरत्ता। यदाहुः—'देवः स कोऽपि जगतीप्रकाशः' इति, 'तदलं स्वात्मावबोधं पुष्णाति तेजोमयोऽमृतमयः पुरुषोऽयमेव सः' इत्यादि, 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति॥' इति रीत्या 'सूर्यनिर्मलपरमेष्ठिभिः' इत्यादिभिः संवादैः सर्वदर्शनेषु परमात्मनः सर्वतेजांस्यतिशय्य सर्वेश्वरत्वं विश्वकर्तृत्वमिति सुसिद्धम्। इह काव्यमात्रप्रस्तावेन किंचिद्ध्वनितम्। अत्र विस्तरभयात्प्रकृतानुपयोगाच्च न वितत्य प्रपञ्चितम्। दीप्तिः तरसा अव रसेष्ववगतरसेषु बालिशप्रायेषु अरतासक्ता। तारे संसारोत्तारणे सारः समर्थो रसो यस्याः सा तथाविधा। वरेषु साभया अभयदायिनी। एवंरूपा तवैवेति॥ द्वितीयस्तूणबन्धः॥४७॥४८॥

चर्चाशिक्षितमन्त्रतत्त्वविभवोदारप्रतीतिर्भृशं
सतां बन्धभवप्रदोऽसि विदितस्त्वं कृत्तवैरिन्भुवि।
विश्वस्तुत्य हिताय ते दिवि नमो धूतार्यजेयध्वने
नेत्राग्नौ च हुतस्मराय विभवे शर्वाय विद्यात्मने॥ ४९॥

कविनामगर्भश्चक्रबन्धः॥

'शिवस्तुतिरियमवतारकृता' इति श्लोकान्निर्गच्छति ॥ चर्चया पुनः पुनः पर्यालोचनया अन्यैः स्वतः शास्त्र इति लीला पारम्पर्यक्रमेण यः शिक्षितो मन्त्राणां तत्त्वस्य परमार्थस्य विभवः स्फाररूपो महिमा तेनोदारा प्रतीतिर्यस्य तथाविधोऽसि । विश्वगुरोर्गुरोः कविनामगर्भचक्रबन्धः 'शिवस्तुतिरियमवतारकृता' इति श्लोकान्निर्गच्छति 'स त्वं मानविशिष्ट–' इति माघचक्रबन्धवद्बहिस्तृतीयावर्ते 'शिवस्तुतिः–' इत्यादि द्वादशाक्षरी निर्गच्छति । भवान्स्वविमर्शो गुरुः । अतश्चर्चया, न तु शिक्षया । भृशं स्मरति भृशं स्मर्ता । भक्तजनानां धन्यं ज्ञानयुक्तं भवं जन्मभुक्तिमुक्तिसाधकं ददाति यः स तथाविधः । मनुष्यजन्मना हि बुद्धिबलेन सर्वं साध्यते । अत एव भुवि सर्वजनानां विदितः सम्यग्ज्ञातः । हे कृत्तवैरिन्, कृत्ता वैरिणः कामादय आन्तराः, बाह्याश्चान्धकासुरादयः । हे विश्वसुल विश्वस्मिन्सर्वोत्कृष्टलास्युल तुभ्यं शर्वाय विभवे विश्वात्मने नमः । दिवि देवभूमौ अर्थात् स्थितेभ्यो हिताय । सुराः सत्त्वप्रधानास्तदुपरि भगवतः सकृपत्वमुचितम्। धूता आकम्पिता अरयो येन स धूतारिः । तया अजेयो दुरवगाह्यो ध्वनिर्नादरूपो यस्य स तथाविधः । तया नेत्राग्नौ हुतः स्मरो येनैवंविधाय सर्वोत्कर्षवते । विद्या सम्यग्ज्ञानरूपाविद्यातिरस्कारिणी भगवतो रूपम् । 'विद्ययामृतमश्नुते' । सर्वागमेषु च 'महाविद्या ज्ञानयोगः' इति चतुष्टयं विद्या आत्मस्वरूपं यस्य तादृशाय ते नमः' ॥ ४९ ॥

मारासुमाविपक्षादरवरवरदक्षापविघ्ना सुरामा
सामासक्ता रणत्रा रिपुरसुरपुरि त्राणरक्तासमा सा ।
शापाकृष्टामृदुस्था बत सरस तव स्वादुमृष्टा कृपासा
नामा सत्या कृतज्ञा तनुरजरनुतज्ञातकृत्या समाना ॥ ५० ॥

प्रतिलोमानुलोमपादः ॥

हे भगवन्, सरस नित्यानन्दमय [illegible] नरण, बत आश्चर्ये तव संवन्धिनी तनुः मारस्य कामस्य [illegible] विपक्षा प्रतिपक्षवर्जिता । तया अदर नि [illegible] कुशला । अपविघ्ना निर्विघ्ना । सु [illegible] आसक्ता संनिहिता । रणात्त्रायते इति [illegible] अत एव त्राणे सकलरक्षणे रक्तानुरागवती । [illegible] अमृदुतां क्रूरा- [illegible] या आसः स्थि- [illegible] अविद्यमाना मा [illegible] अवयान्तरश । अज- [illegible] ः तेन [illegible] अत एव सह मानेन वर्तते [illegible] ॥

हे सदाशिव, त्वमेव तु सदा सर्वकालं क्षपितासुराणां मारितदैत्यानां सुराणां विष्णु-प्रभृतीनां संबन्धिनो विभवस्यैश्वर्यस्य पिता निर्माता भवसि । नूनं निश्चितम् । अनूनं कृत्वा खे आकाशे राजितानाम् । तथा मुखरैर्निन्दापरैर्वाचालैः प्रतिपक्षैरजितानां त्वमेव शिवत्वं शिवस्य भावः शिवत्वं कल्याणभावः ॥ सर्वपादाद्यन्तयमकम् ॥ ५१ ॥

अहीनभोगाभ रणादराय सदानयज्ञान्त कविग्रहाय ।
सुभूति चेतो हरवीरकाय वरायते सज्ज नमोऽक्षदाय ॥ ५२ ॥
अहीनभोगाभरणादराय सदानयज्ञान्तकविग्रहाय ।
सुभूतिचेतोहरवीरकाय वराय ते सज्जनमोक्षदाय ॥ ५३ ॥

महायमकम् ॥ युग्मम् ॥

हे हरवीरकाय, तथा पर उत्कृष्ट, अहीनभोगादिषु, राज्यादिषु आभा यस्मा-त्सोऽहीनभोगाभस्तदामन्त्रणम् । तथाविध । सर्वत्र भवद्दीप्तेरेव स्फुरणात् । तदु-क्तम्—'न सा जीवकला काचित्संतानद्वयवर्तिनी । व्याप्त्री विश्वकला यस्यामधिष्ठात्री न विद्यते ॥' इति । तुभ्यं नमः । अक्षाणीन्द्रियाणि दयते पलायते । मनःप्रभृतीनां सर्वेन्द्रियाणां बाह्यपदार्थानां च तदधिष्ठानमन्तरेण ग्राहकत्वग्राह्यत्वासिद्धेः । यदाहुः—'आत्मा मनसा युज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन' इति । रणादराय रणादेत्संग्रा-माददरो निर्भयस्तस्मै रणादराय सदालब्धजयत्वात् । सदानः सदक्षिणः यज्ञान्तः यस्य हेतोः । सर्वयज्ञसंपादनवेलायां त्वत्प्रीत्यर्थमेव दक्षिणादि यजमाना वितरन्ति । तावच यज्ञस्य पूर्णता न भवति । 'मृतो यज्ञस्त्वदक्षिणः' इति नीत्या यजमानमूर्तेः । कं जलं मूर्तिर्विग्रहो यस्य तथाविधाय, अष्टमूर्तित्वात् । शोभना भूतिरैश्वर्यं यत्र तत् सुभूति ऐ-श्वर्येण भोगः मनोज्ञ ईश्वरेच्छया प्राप्यते तथाविधं कृत्वा । चः समुच्चये । इतो लोकात् । चेतः, इति पदच्छेदः । आयते मुक्तिमार्गे सज्ज भक्तजननिस्तारेण संनद्ध, ते नमः । अक्षदाय । एकोऽर्थः ॥ अर्थान्तरं यथा—वराय वरार्थं सज्जनानां मोक्षदाय तुभ्यं अहीनामिना नागराजास्तेषां ये भोगाः शरीरसंनिवेशास्तदाभरणे आदरो यस्य । सदा सर्वकालं नयं संसारस्थितिं जानाति यज्ञार्थबोधनम् । अन्तकं प्रति विग्रहो विरोधो यस्य सः । तथा सुभूत्या भस्माङ्गरागेण श्वेतोदरो वीरको नाम गणो यस्य स तथाविधाय ॥ इति महायमकम् ॥ युग्मम् ॥ ५२ ॥ ५३ ॥

साध्यं सुकृतिभिर्धैर्यैरमरैर्नुनमञ्जसा ।
साहसानां निधिं गम्यं न दुराग्रहनेजसा ॥ ५४ ॥

साध्यार्चितं स्तुवे येन धरेयं भूषिता रसा ।
साधुवृत्तं साररूपं त्रिनेत्रमतिसादरम् ॥ ५५ ॥

द्वाभ्यां खड्गबन्धः ॥ युगलकम् ॥

सुकृतिभिः सत्कर्मभिः साध्यं यज्ञैर्ध्यानधारणातपोभिः अमरैर्ब्रह्मादिभिर्नुतं स्तुतम-ञसा सद्यं साध्यैर्देवविशेषैरर्चितं पूजितम् । येन भगवता इयं रसा भूर्भूषिता । तया साधु वृत्तं यस्य स तादृशम् । तथा सारं रूपं यस्य तथाविधं त्रिनेत्ररूपं व्यक्तं भक्तज-नेषु सादरं साहसानां त्रिपुरदाहादीनां निधिं स्थानम् । दुरासदेन तेजसा हेतुना सर्वैः कैश्चिदेव भक्तैरगम्यमेवंविधं सर्वोत्तममहं स्तुवे ॥ इति श्लोकाभ्यां खड्गबन्धः ॥ युगल-कम् ॥ ५४ ॥ ५५ ॥

सारज्ञं च सदाचारतापच्छिदमुमावरम् ।
रंहसा नौम्यधिपतारम्यं मुक्तिफलप्रदम् ॥ ५६ ॥

मुसलबन्धः ॥

सारं मुक्तितत्त्वं जानातीति तथाविधं सदाचाराणां समयिनां तापं त्रिविधं छिनत्ति यस्तमुमावल्लभत्वादुमावरं सर्वातिशायिनं रंहसा त्वरया अधिपतया सर्वेश्वरत्वेन रम्यम् । तथा मुक्तिफलं प्रददाति यस्तमहं नौमि ॥ मुसलबन्धः ॥ ५६ ॥

साधुचक्रनुतं वन्दे रेणुकोद्भवशौर्यदम् ।
दंष्ट्रा विपाटिता येन गजस्य विजिता रसा ॥ ५७ ॥

धनुर्बन्धः ॥

साधुचक्रेनुतं नियमिसमूहैः स्तुतम् । रेणुकोद्भवो जामदग्न्यस्तस्य शौर्यदम् । शस्त्रास्त्र-कर्मशिक्षाप्रतिपादनेन । येन दुर्जयस्य गजासुरस्य दंष्ट्रा विपाटितोन्मूलिता । अत एव रसा भूर्विजिता ॥ इति धनुर्बन्धः ॥ ५७ ॥

यावतां मित्रपरमाणवोऽपि कतमे स्थि(स्ति)सा (?) ।
सा भा नैकस्य तेभ्योऽपि देव मत्तनुरञ्जमा ॥ ५८ ॥

शरबन्धोऽयम् ॥

संसारे पितृपुत्रभ्रातृगुरुप्रभृतयः यावन्तो भ्रमन्तो नवनवाः कतमे तावत् अस्मदा पित्ताग्णामोरवलादगम्याः, तेभ्यो मध्यान्मत्तनुः एकस्यापि न सा भा सा दीप्ति- अ-स्मनो वा तेषां भवत्राणासमर्थैति (?) मित्रस्य वा परमाणवः ॥ ५८ ॥

सामर्थ्यद शुभूर्तिस्ते सदा जीयात्प्रभोऽग्सा ।
सा रसासार सारात्मिस्थिरासा विदिता भुवि ॥ ५९ ॥

विद्युद्बन्धः ॥

सामर्थ्यं संसारसागरमेतस्योत्तर्तुं इदानीं मममाशित, तव मूर्तिस्ते सर्वदाहं रमाधार रमायां मध्ये मार उत्कृष्ट, अथवा श्रीमदात्मा भारातिव कृत्वा स्थिर अ शिवंशाः । यथा भुवि भिविना ॥ इति भिदुरबन्धः ॥ ५९ ॥

सा विडम्बकृता नीत्वामवर्ता कूरतां विभो ।

विसारे कुरुते कामसेना दोषं मयि त्विरा ॥ ६० ॥

डमरुबन्ध

कामसेना मयि विसारे दुर्बंध विषये दोषं कुरुते । विडम्बकरं कृत्वा तामा डमरुबन्धः ॥ ६० ॥

सारा बन्धैर्नाज विभो भियार्ता मे मतिः परा ।

सा राजते विनैव त्वां भगवन्नेहि रंहसा ॥ ६१ ॥

हलबन्धोऽयम् ॥

सप्तबन्धात्प्रभृतिभिः सप्तभिरमीभिर्बन्धैः कविनामगर्भश्चक्रबन्धः चक्रमिदं बन्धैरवतारेण सप्तभिः' इति निर्गच्छति ॥

हे अज भगवन्, इयं मे मतिर्नैव विराजते । बन्धैरायबमायीबकामैनैः (!) यंत उपलक्षिता । सारा दुर्लभमनुष्यजन्मप्राप्त्या भव्या सती भिया यमभीत्या परा उत्कृष्टा त्वं रंहसा त्वरितं एहि । मां पाहीत्यर्थः ॥ इति हलबन्धः ॥ 'कृतं मिदं बन्धैरवतारेण सप्तभिः' इत्यक्षराणि चक्रादुषित्य निर्गच्छन्ति ॥ ६१ ॥

सो हेममग्गसग्गो सोहारोहक्खमो विसुद्धो सि ।

सिद्धो सुविमोक्खहरो हासोग्गो समाममहेसो ॥ ६२ ॥

प्रतिलोमानुलोमगाथा ।

एतस्याः संस्कृतीकरणम्—

'स हेममार्गसर्गः शोभारूपक्षमो विशुद्धोऽसि ।

सिद्धः सुविमोक्षहरो हासोग्रः संगममहेशः ॥'

स हेममार्गसर्गः मरुतं प्रति शोभारूपा क्षमा यस्य । सुविमोक्षः । वरः (?) । संबन्धी अट्टहास उग्रः । सङ्गमेत्यामन्त्रणम् ॥ ६२ ॥

पथेन साधुना माय कुसुमेषुस्यदक्षते ।

परमस्मै सतेजाय भोनमस्तेनमस्तव ॥ ६३ ॥

अपशब्दाभास

भो भगवन्, इन स्वामिन्, हे अनमस्तव न अमा अमंमाः सभीकाः स्वया यस्य र मिथ । अविद्यमाना मा लक्ष्मीर्येषां तेऽमाः । तथा कुसुमेषोः कामस्य यः स्वदो दर्प ॥

दायस्तस्य क्षते हानौ श्रमाय निष्प्रपञ्च, सुकरत्वात् । साधुना पथा उपलक्षित, ते तुभ्यं नमः । असौ अनुभवगोचरत्वात्संविद्रूपेण वर्तमानाय । 'पथेन' इति, 'साधुनामाय' इति, 'कुसुमेषुस्य' इति, 'दक्षते' इति, 'परमसै' इति 'नमस्ते नमस्तव' इति, एते आमुखे अपशब्दा भासन्ते इति अपशब्दाभासाः ॥ ६३ ॥

किन्ते[1] कार्यं भर्गमयं कामद काला-
चिन्तेयं मे मन्युममेयं जनयित्री ।
व्यङ्क्ते भालादग्निदलाभां तव दृष्टि-
र्भुङ्क्ते [नैनं मन्दमतिं] नैपुणतः किम् ॥ ६४ ॥

मत्तमयूरेण नन्दिकावर्तबन्धः ॥

हे कामद सर्वाभिलषितदायिन्, इयं मम चिन्ता अमेयं बहुलं मन्युं जनयित्री । जनयिष्यतीत्यर्थः । इयं का । यत्कालाद्भयं कार्यं छिन्ते तव संबन्धिनी दृष्टिर्भालाल्ललाटात् अग्निदलाभां वह्निखण्डद्युतिं व्यङ्क्ते प्रकाशयति सा दृष्टिरेनं मन्दमतिं तुच्छहृदयं नैपुणतो दार्ढ्येन किं न भुङ्क्ते । किमिति भस्मसान्न करोतीत्यर्थः ॥ मत्तमयूरेण नन्द्यावर्तबन्धः ॥६४॥

गिरिभिद्विधिजिद्विद्धि द्विपि च्छिन्द्धि स्थितिं गिरि ।
श्रियि सिद्धिर्धियि विधिर्विच्छित्तिरिति चिद्भियि ॥ ६५ ॥

इकारान्त एकस्वरः ॥

हे गिरिभिद्विधिजित् गिरिभिदिन्द्रः, विधिर्ब्रह्मा तौ भुजस्तम्भेन शिरश्छेदेन च जितवान् । तत्संबोधनम् । त्वमिति विद्धि जानीहि । किम् । द्विपि वैरिणि या गीस्तस्यां स्थितिं संनिधिं छिन्द्धि विदारय । अत एव नोऽस्माकं श्रियि सिद्धिः, धियि प्रज्ञायां विधिर्विधानम् । चिद्भियि चितोऽपरिमितज्ञानाया भीतिः संसारभ्रमणात् तस्यां विच्छित्तिर्विच्छेदः । भवतीति सर्वत्र योज्यम् ॥ इकारान्तस्वरोऽयम् ॥ ६५ ॥

शर्व नयः शुभो वितरणे गुणे रत विभो
तिष्ठति ते श्रियेऽजर परं चिरं परजये ।
तत्कृपया सुचारुरव मा क्षमावररुचा
दर्शय सद्धिते परसुखं सुखं सुरपते ॥ ६६ ॥

सुरबन्धः ॥

हे शर्व विभो, गुणे रत, अजर जरारहित, ते तव नयो नीतिराचारः शुभस्तिष्ठति । वितरणे दानविषये परमत्यर्थं चिरं श्रिये पर उत्कृष्टो यो जयस्तस्मिन्सति । तस्मात् हे सुर-

1. आदर्शपुस्तकयोस्तु 'किन्ते' इत्येव पाठ उपलभ्यते, परंतु टीकायां 'छिन्ते' इति व्याख्यानस्योपलभ्यमानत्वात् 'छिन्ते' इत्येव पाठः स्यात्.

परो, त्वं कृपया सुचारु रमणीयः । मा अव मामव रक्ष क्षमया सामर्थ्येन सा व
या रुचया सद्यो हिते विषये यत्परमनिर्गाम्यं तथाविधं सुखं सुष्ठु खानीन्द्रियाणि
तर्दय ॥ स्फुरयन्धोऽयं श्लोकः ॥ ६६ ॥

कालाक्रान्ता तनुरमरनुत ग्रस्तेयं मे विदितहित दिवि-
नश्यत्यग्रे तव सरस बत ग्लानिः सेयं वशिदमद शिव ॥ ६
प्रतिलोमानुलोमपादार्धः ।

हे अमरनुत, हे दिवि विदितहित, हे सरस लब्धात्मविश्रान्ते, हे वशिनां जि
याणां दमद सर्वसहलदायिन्, मम संबन्धिनीयं तनुः कालेनाक्रान्ता ग्रस्ता । बत आ
तव प्रभोरग्रे नश्यति सेयं ग्लानिः शिव सर्वेषां श्रेयस्कर ॥ भ्रमरविलसितं वृत्तम् ॥

दानासन्ना पवित्रानुतजनितरणत्रा रिपुत्वे न जेया
माराभिख्यासचर्याविरतकृदरमद्यापि दक्षा पराका ।
शापाकृत्यायनज्ञावनमनजनिमुक्तारगत्यानपाया
या सा रम्यागदत्वा शिवतनुरमदत्वातिहृत्तापरासा ॥ ६८ ॥
सारापत्ताहृतित्वादमरनुतवशित्वादगम्यारसा या
या पानत्यागरक्ता मुनिजनमनवज्ञा नयत्याकृपाशा ।
कारापक्षादपि द्यामरदकृतरवियां च सख्याभिरामा
याजेनत्वे पुरि त्राणरतनिजतनुत्राविपन्ना सनादा ॥ ६९ ॥
प्रतिलोमानुलोमाभ्यां स्रग्धराद्वयम् ॥ (युग्मम्

सा शिवतनुः एवंविधा सती मुनिजनं भक्तलोकं कारापक्षात्संसारबन्धादपि द्यां न
यति । यतः । दाने आसन्नाभ्यर्णवर्तिनी । तथा पवित्रा । आ समन्तान्नुतं स्तवनं येष
तथाविधैरानतैर्भक्तजनैर्जनितो यो रणो विपक्षैः सह कलहस्ततस्त्रायते आनुतजनितरणत्रा
रिपुत्वे सति असुरादिभिर्न जेया । मारस्य कामस्य याभिख्या रूपलावण्यकान्तिमत्त्वा
च्छोभा तया समानचर्या । तद्युक्तेत्यर्थः । विरुद्धं यद्रतं रमणं संसारासक्तिस्तत्कृन्तति
छिनत्तीति विरतकृत् । अरमत्यर्थं अद्यापि अविच्छिन्नप्रवाहेण दक्षा पचक्लृत्यकुशला ।
परान् शत्रून् अकति कौटिल्येनोल्लङ्घयति पराका । शापोऽकृत्यं यस्याः शापाकृत्या कृ-
पया वरदायिनीत्वात् । अयनं मुक्तिगमनं जानातीति अयनज्ञा । अवनमनेन नमस्कारेण
जनेर्जन्मनो मुञ्चति अवनमनजनिमुक् । तारगत्या विस्तारकेणोपायेन अनपायाविन-
श्वरी । एवंविधा या प्रसिद्धा सा रम्यमगदत्वमारोग्यं यस्याः सा रम्यागदत्वा । तथा अ-
मदत्वं दीनतामतिशयेन हरति यस्तस्य भावोऽमदातिहृत्ता तेजःप्रसादस्तेन परानस्यति
क्षिपति परासा अमदातिहृत्तापरासा एवंविधा । सारा बहुला या आपदस्तासां भावः

सारापत्ता तस्या हृतित्वं हरणभावस्तस्मात्सारापत्ताहृतित्वात्, तथा धर्मैरद्भुतवशित्वाद्भुतजितेन्द्रियत्वादगम्या दुष्प्रापा । अरसा वीतरागा च । या च पाने रक्षणे त्यागे च भक्तजनाय इष्टदाने रक्ता हेवाकिनी । तथा अनवज्ञा न विद्यतेऽवज्ञा भक्तजनं प्रत्यवहेला यस्याः । तथा आ समन्तात् कृपया आशा यस्याः सकाशात् । तथा—अरदः कृतो रविर्यया पूष्णो दन्तदलनादरदकृतरविः । या च तनुः सख्या सेवयाभिरामा भक्तानभिरमयति । या कारापक्षादपि अर्थात्संसाररूपात्कारागृहाद् द्यां स्वर्गं नयति । या अजा आद्या शक्तिः । इनत्वे सति प्रभुत्वे सति पुरि भवने प्राणरता पालनोद्युक्ता या निजतनुः क्षित्यादिरष्टविधा तामपि त्रायते परेण रूपेणाधितिष्ठते । अत एव अविपन्ना कल्पान्तावप्यनश्वरी । सनादा सशब्दोल्लासा । यतः 'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते । अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥' इति वचनाच्छब्दात्मकं परं ब्रह्मरूपम् ॥ युगलकम् ॥ ६८ ॥ ६९ ॥

सुरद्विषां धामनिवारणाय तुभ्यं समिद्धामनि वारणाय ।
नमोऽस्तु भव्याय भवाकुलाय संसाररक्षाप्रभवाकुलाय ॥ ७० ॥

यमकम् ॥

हे भगवन्, तुभ्यं नमोऽस्तु । सुरद्विषां दैत्यानां धामनिवारणाय तेजोग्लापनाय । तथा समिद्धामनि वारणाय समिद्धामनि दन्तिनो(?) क्षोभकत्वात् । भव्याय सर्वोत्कृष्टाय । अकुलाय जन्मरहितत्वात् । संसाररक्षाप्रभवैराकुलाय व्यग्राय ॥ ७० ॥

रसारसासारसार सारसाररसार सा ।
रसा रसासारसारसारसाररसारसा ॥ ७१ ॥
मरुस्थलीत्वं त्वदृते मयीह सति धामनि ।
अतो मां यमसेनेर्ष्यामही हसति धामनि ॥ ७२ ॥

अत्राद्यो द्व्यक्षरो द्विस्वरोऽसंयुक्ताक्षरोऽर्धभ्रमः सर्वतोभद्रः, समुद्गयमकम्, मालायमकम्, आवृत्तयमकम्, गूढचतुर्थः, गूढतृतीयः, गूढद्विरदक्षरो वा, गोमूत्रिकादयश्च बहवो बन्धा अत्र श्लोके पृथक्प्रस्तार्य प्रेक्षणीयाः । द्वितीयः पादयमकः ॥

हे भगवन्, रसारस रसेभ्यः शृङ्गारादिभ्योऽरसो विमुखस्तदामन्त्रणं हे रसारस, तथा असारसार असारात्संसारान्सारः तादृश हे असारसार । अर्राणां समूहमारम्, सह आरेण वर्तते सारम्, सारं च तत्सारं बलं तत्र रसो यस्य सः । तद्विधा सा लोकोत्तरा रसा भूमिः आर जगाम । मरुस्थलीत्वं मयि विषये धामनि स्वे तेजसि सत्यपि इह संसारे । यतः । वीरवती भूः । रसासारसारसारसाररसारसा । रसस्य जलस्य ये असारास्ते

साराणि येषु तानि रसासारसाराणि, तथा सारसानां हंसानामार गमनं
एवंविधानि सारसानि सरःसमूहा यस्यां यादृश्या जलपूर्णा तथाविधापि
अतो देतोर्यमसेना ईर्ष्यामयी मां हसति । धामनि गृहे ॥ ७१ ॥ ७२

अक्षय्यं क्षीणसादं नृबुधहृतमयं सत्फलं धीरचित्तं
तुङ्गं श्रीसाररक्षोसुरहतिरभसं त्वां सगङ्गं श्रितं वा ।
चर्यालक्षेण लोकक्षममलयमहासंक्रमं सैरसज्जं
स्थाणो सावद्धसर्वाहवगरिमगुणं के तु नेह स्तुवन्ति
अयं श्लोको ग

हे स्थाणो, इह संसारे के त्वां न स्तुवन्ति, अपि तु सर्वे एव ।
शक्यः क्षय्यः न क्षय्यः अक्षय्यः, तादृशम् । 'जिक्षेः शक्ये' इति य
सादः संसारावसादो यस्मात्, तादृशम् । तथा नृणां बुधानां देवानां
स तादृशं च । सतां फलं भुक्तिमुक्तिरूपं यस्मात् । धीरं स्थिरं भक्त
यस्य । तुङ्गमत्युन्नतं सर्वोपरिवर्तित्वात् । श्रिया सारा ये रक्षोसुरास्तेष
दरो यस्मात् । चर्यालक्षेण बहुलचर्याभिः सर्वदर्शनानां पृथक्प्रस्थ
श्रितं सेवितम् । सगङ्गं गङ्गाधरम् । लोकेषु सप्तसु मध्ये तु क्षमं सर्वस
नश्वरः महान् संक्रमो यस्य । स्वैरं स्वातन्त्र्येण सज्जं पञ्चकृत्यसंनाह
आवद्धाः सर्वाहवेषु दैत्ययुद्धेषु गरिमगुणा येन दुरासदत्वात् । एवंवि
यम् ॥ गाथा यथा—'अग्यं णदबुहममलं रत्तङ्गं सारमुहरसासङ्गम्
समं रज्जं णो वसहगमण तुह ॥' इति । अस्य संस्कृतीकरणम्—'
रक्ताङ्गं सारशुभरसासङ्गम् । तव चरणकमलमसमं राज्यं नो वृषभग
अस्या गाथायाः सप्तोऽर्थः ॥ ७३ ॥

सुरासुराजये जयेऽदरादरादमादमा ।
सदा सदारतारता विभो विभोगता गता ॥

सुरासुराणामाजये संग्रामाय जये विषये अदरो निर्भय आदरो
रादर हे विभो विभोगता । विशिष्टभोगता इति यावत् । सदा
गार्हस्थ्ये रतासक्ता । अमा अविद्यमाना लक्ष्मीर्यस्याः [निः]श्रीका
गता ॥ आवली ॥ ७४ ॥

जय प्रसन्न तत्त्वद सतत्रसर्गतत्पर ।
जगत्त्रयप्रवर्धन क्षतसर प्रहर्षद ॥ ७५ ॥
अयमेक

हे हर हर रोराहो होरां रंहोहरारिराहुहरे ।
रोहाहारैरहरहरहिहारेहाहरां हा हा ॥ ७६ ॥

अयं श्लोको घ्यक्षरः ॥ आर्यावृत्तम् ॥

हे हर, अहि[हार] वासुकिभूषण, त्वं होरां क्रमस्थितिं रोराहो दारिद्र्यावहां हर निवारय । रंहोहर रणे वेगहारो योऽरिः शत्रुः स एव राहुस्तस्य त्वमेव हरिः शिरोहरत्वात् । तदामन्त्रणं रंहोहरारिराहुहरे, रोहाः कन्दमूलादयस्तेषामाहारैर्भक्षणैरहरहः प्रतिदिनम् । हा कष्टे । ईहां चेष्टां हरति तथाविधां होरां हर ॥ घ्यक्षरः ॥ ७५ ॥ ७६ ॥

सारतास्थिरवरस्थिता रसाभारसौम्य गणगम्यसौरभा ।
राजते स्तुतिमतिस्तुतेऽजरा दक्ष मान्य धनधन्यमाक्षद ॥ ७७ ॥
स्वर्गमार्गद निरर्गलतनुः सा मताचक्कृतकृत्ततामसा ।
इन्दुमण्डितशिरःस्थजाह्नवीतीरभाव्यभयभव्य भारती ॥ ७८ ॥

प्रतिलोमानुलोमपादार्थः ॥ युगलकम् ॥

हे स्वर्गमार्गद, तथा हे इन्दुमण्डितं च तच्छिरस्तत्र तिष्ठतीति तादृशी या जाह्नवी तस्यास्तीरभावि यदभयं तेन भव्य उत्कृष्ट । तथा हे दक्ष सर्वत्र कुशल, हे मान्य पूज्य, तथा हे धनधन्यम धनेन मरुत्तादिभ्यो दत्तेन धन्या मा शोभा यस्य तादृश, तथा हे अक्षद अक्षाणि दिव्येन्द्रियाणि दूरदर्शनश्रवणयोग्यानि ददाति यस्तादृश, तथा हे रसाभारसौम्य रसाभारे भूभारोद्वहने सति············असौ निर्विकारा ते तव भारती राजते । कीदृशी । सारतास्थिरवरस्थिता सारतया स्थिराश्च ते वरास्तेषु स्थिता । पुनः कीदृशी । गणगम्यसौरभा गणैर्नन्दिप्रभृतिभिर्गम्यं प्राप्यं सौरभं यशःपरिमलो यस्याः तथा किंभूता । स्तुति(मतिः) स्तुतौ मतिर्यस्याः । तथा निरर्गला निर्निरोधा । अजरा नित्यतरुणा । पुनः कथंभूता । मतात्तकृतकृत्ततामसा । मतेन आत्तं च तत् कृतं पुण्यं तेन कृत्तं छिन्नं तामसं यया । पुनः कीदृशी । अननुप्रासत्वा ॥ रथोद्धता ॥ युग्मम् ॥ ७७ ॥ ७८ ॥

समाधिकारा सुरसारसादरा समाधिकारासुरसारसादरा ।
समाधिकारासुरसा रसादरासमाधिकारासुरसारसादरा ॥ ७९ ॥
सुदर्शनस्येव युधि द्विषां वधे मतिः सुतीक्ष्णा भवतो जयत्यसौ ।
नमामि शंभो शमिमानवाभयं नयं भवानर्थजितं भवाततम् ॥ ८० ॥

आद्यः पादाभ्यासयमकम् । द्वितीयस्त्रिशूलबन्धः ॥

हे शंभो, कीदृश । समाधिकार समाधि चित्तैकाग्र्यं करोति समाधिकारसादरा, भवतो मतिरसौ सुतीक्ष्णा जयति । कथंभूता । समाधिकारा सह मया वर्तते यः स समः सर्वांशोऽधिकारो यस्याः सा । तथा किंभूता । सुरसारसादरा सुरसारेषु विष्णुप्रभृतिषु सादरा सानुग्रहा । पुनः कीदृशी । समाधिकारासुरसारसादरा समाधिकाराः तुल्यबलैर्दैः,

तथा अधिकः अरो गमनं यत्पादौ देवो तादृशः गेऽसुराभेदो गारम्भ यत्स्य यादं कदं तारि ददाति तादृशी । तथा [ ]स्था । [आ]गुणो नरेषु [गमनात्] शोभनस्य । पुनः [ ]स्था । रमादरा रसायां भूमौ अदरा निर्भया । तथा असुनाधिकारसुमार- गात् अदत्ता आश्रयः तथा भारा बन्धनगृहं येषु ते तादृशा ये भगवत्स्तेषु यो रमो हेयावमान आरे अरीणां समूहे आरे सर्वसारसारत्र आरमात् द्विषो यथेन तेषामेव अरा भारा गुरुर्धनस्येव । सा च अरिभटानां यथे गुर्विस्ता संचार आरात्परिसमूहा इव अहं तव नयं नमामि । त्वं हि दानिमानवा भयदमिनो मानवास्तेषां अभयमभयप्रदत्वात् । आगुधं तनिता न्यायेन यतो भयाविर्जितः । नयं कथंभूतम् भवानर्थजितं संसारानर्थने- दिनम् । आततं विस्तीर्णम् ॥ ७९ ॥ ८० ॥

कृतानवतनुप्राज्ञ साभासुरसमाधिकृत् ।
स्थिताज्ञाहिसितत्वाप्य दमासक्ताव मा व्यरि ॥ ८१ ॥
सुरमात्व स्थितिसम संतताथाद्वयस्वन ।
सरसारमना माक्षामतिसारतमोद्यम ॥ ८२ ॥
द्वाभ्यामष्टदलपद्मबन्धः ॥ (कुलकम्)

हे कृतानवतनुप्राज्ञ कृता अनवा आयाखनवः पृथ्व्यादयो येन तथाविधश्चासौ प्रा- ज्ञश्च तादृश । तथा हे स्वाभ शोभनदीप्ते । तथा असुरसमाधिकृत् । असुराणां समाधिं कृन्तति छिनत्ति तद्विघ्नकारित्वात् । तथा हे स्थिताज्ञाहिसितत्व स्थिता आज्ञाश्चाहयश्च सितत्वं च यस्य तद्विध । आप्य भक्तजनैः प्राप्य । तथा हे दमासक्त दमे आसक्त, मा मामित्यर्थः । त्वमव रक्ष । कथम् । व्यरि विगता अरयो यत्र तथाविधं कृत्वा । तथा हे सुरमात्वस्थितिसम शोभनं यद्रमात्वमैश्वर्यं तत्र या स्थितिस्तस्यां सम अनुद्रिक्त । तथा हे संतत अविनश्वर । तथा हे अद्वयस्वन अद्वयः स्वन आज्ञारूपः शब्दो यस्य स तथा हे माक्षामतिसारतमोद्यम मया लक्ष्म्या तथा अक्षैरिन्द्रियैरा समन्तात् आदृ तादृश । तथा हे माक्षामतिसारतमोद्यम मया लक्ष्म्या तथा अक्षैरिन्द्रियैरा समन्तात् आदृ मतिसारतम उद्यमः कर्तव्यता यस्य तादृश । त्वं कथंभूतः सन् । रससारमना आर्द्र सुराचित्तः सन् ॥ युगलकम् ॥ ८१ ॥ ८२ ॥

वरतास्थिरसामन्त सारतातिसमाहित ।
सुकृताक्तासन स्वाज्ञादमाससुमतावसि ॥ ८३ ॥
त्वमद्य भव्य साज्ञत्वानुकृतामाप्य सद्वर ।
नाम सुस्थिर मोक्षाय ममाधिरिति सा तथा ॥ ८४ ॥
एतदुक्तचतुरङ्गाश्वपादपूरणश्लोकयुगलकम् ॥.

हे शंभो, वरतया प्राधान्येन स्थिराः सामन्ताः सेवका यस्य स तादृश वरतास्थिरसा- मन्त । तथा हे सारतातिसमाहित सारतयोत्कृष्टत्वेन अतिसमाहित । तथा हे सुकृता

१. 'समाधि' क-ख.

·कासन सुकृतेन धर्मेणार्क सेवितमासनं यस्य तद्विध । तथा हे खाह्लादमासमुमत शो-भनाश्च ते आह्लादमाश्च तेषां य आसस्तेन शोभना मता यस्य तादृश । अव । मामित-र्थात् । समवसि रक्षसि । तथा हे [सा]ह्वलानुकृतप्राप्य [सा]ह्वलस्य यदनुद्भतमनुक-रणम् । नपुंसके भावे क्तः । तेन प्राप्य । सतां वर । नाम संभावनायाम् । इत्यतो हेतो मो-क्षाय मम । तथा य आधिर्मनोरुक् । नय समवसीति स्पष्टीकृतं पुनः ॥ ८३ ॥ ८४ ॥

कृतानतज्ञसुरमाहितत्वाप्यवताद्वय ।
रसारक्षासारतम कृतज्ञ सुर माप्यव ॥ ८५ ॥

अष्टापदाभिर्गतसमञ्जसबोधो गूढचतुर्थः

कृतमानतं जानन्ति ये तादृशाः कृतानतज्ञा देवा योगिनस्तेषां या सुरमा शोभना चासौ रमा लक्ष्मीस्तस्यै हितत्वं यस्य तथाविध हे कृतानतज्ञसुरमाहितत्व, तथा हे आप्य भक्तिगम्य । तथा हे अद्वय । तथा हे रसायां रक्षतया सारतम कृतज्ञ हे सुर देव म अपि मामपि समव ॥ ८५ ॥

सुप्रज्ञानतसारज्ञ सकृतान्ततनुव्यय ।
रक्षावतारमद्य त्वमतिभासुर सुस्थिर ॥ ८६ ॥

अष्टापदनिर्गतः कविनाम्ना कुसुमोच्चयबन्धः ॥

हे सुप्रज्ञ शोभनश्चासौ प्रज्ञस्तथाविध, तथा आनतसारज्ञ आनतानां भक्तानां सार-मुत्कर्षं[1] जानाति यस्तद्विध, तथा हे सह कृतान्ततनुव्ययेन वर्तते तद्विध, अवतारे र-क्षेति कविरादास्ते आत्मनि । हे अतिभासुर दीप्तिमन् । हे सुस्थिर अविनश्वर ॥ अष्टा-पदाभिर्गतकविनाम्ना कुसुमोच्चयबन्धः ॥ ८६ ॥

वेद वेदविदां वादविद्देवो दिवि दावदः ।
वादो वादेवदेवादिविधो वादिवदे विदम् ॥ ८७ ॥

एकान्तरितद्व्यक्षरः ॥

हे देवदेव, अहं वदे व्यक्तं वदामि । देवः देवादिवत्सुभावि वेद जानातीत्यर्थः । वेदविदां मध्ये वादवित् दिवि दावमुपतापं देत्यकृतं दाति खण्डयति यः स दावदः । आदिवित् सर्वेत्वात् । देवीविदं अहं न झटितिर्विदम् ॥ ८७ ॥

कथाभोगजडो मूढवया आरोपणामुखः ।
आधा पत्नायदिशतो नाहं झटिति चाबुधः ॥ ८८ ॥

अपुनरुक्तव्यञ्जनः ॥

अहं कथाभोगजडः, मूढं व्यर्थं वयो यस्य, आ समन्तात् रोपणया आमुखः, अधि-रणआवासाप्रदिशतः । अबुधश्च ॥ ८८ ॥

[1] 'सारकृत' क-ख

सिर सुरवरगुमसाद क्षमोपेत हा मोपमोहातपे मोक्षद त्वामजं
दिवि भुवि च विभुं कृपादे(धे)शर्हीनाविर्भो कालकामी विनार्हीशदेहाङ्गद
जेतरणगुणरत्न तौ रौरवीयाधिदौ मा किमादौ धिया धीररौद्रौ यतः
किमु भव भवभक्तदोपागते पाशवे साधुसावेशपाते गदा मन्त्यलम्॥८९

चण्डव्यष्टिमपातदण्डकेन नन्दिकावर्तबन्धः ॥

स्थिर अविनश्वर, गुरवरेषु मद्मविष्णुप्रभृतिषु शोभनः प्रसादो यस्य तथाविध, क्षमं न क्षान्तियुक्त, हा कष्टम्। मोपे निष्फले मोहातपे अज्ञानतापे मोक्षद, त्वामजं दिवि भुवि च विभुं द्यावापृथिव्योः स्वामिनम्, अहीशानां नागराजानां देहा अङ्गदा यस्य तथाविधम्, विना इमौ तौ कालकामौ विना रौरवीयाधिदौ रौरवीया आधिः पीडाप्रदौ, धिया प्रज्ञया धीररौद्रौ किं मा मादोद्यताः (?) खण्डयतः। किमु तव जितरणगुणरत्न हे भव भवभक्तदोपागते पाशवे पशोरयं पाशवस्तस्मिन्पाशवे, तथा साधुसावेशपाते सति गदा रोगा जरादयो मन्त्वलं तत्सर्वं देवदेव देवो देवी वा इति ॥ चण्डव्यष्टिप्रपातदण्डकेन नन्दिकावर्तबन्धः ॥ ८९ ॥

तुभ्यं जगत्त्रयत्राणससंपज्जयते नमः।
शिव संयत्सभाशील जय सज्जनवत्सल ॥ ९० ॥

'जय सज्जनवत्सल' इति चतुर्थः पादः समञ्जसेन प्रतिलोमेनैव पाठेन निर्गच्छति भ्रान्तिसमञ्जसबोधो गूढचतुर्थः ॥

हे शिव, जगत्त्रयत्राणे सह संपद्भिरष्टाभिर्ऋद्धिमयीभिर्वर्तते यस्तत्संबोधनम्। जगत्त्राणससंपद् तुभ्यं जयते सर्वोत्कृष्टाय नमः॥ संयत्सभाशील संग्रामपर्यन्तपरायण सज्जनवत्सल त्वं जय॥ तुभ्यमित्यस्मात् 'जय सज्जनवत्सल' इति चतुर्थः पादः समञ्जसेन प्रतिलोमेनैव पाठेन निर्गच्छति॥ समञ्जसबोधो गूढचतुर्थः ॥ ९० ॥

सुधीसारज्ञताभव्यजय मासामगक्षम।
सुसाज्ञ भज मामक्षधीरताव्यय सागम ॥ ९१ ॥

प्रथमार्धादेकान्तरितान्यक्षराण्युच्चित्य तृतीयपादः, शिष्टाक्षरैस्तथैव चतुर्थपादः ॥

सुधिया शोभनप्रज्ञया या सारज्ञता तया हेतुभूतया भव्य उत्कृष्टो जयो यस्य तद्विध। शोभा तया सामगा सान्त्वगा क्षमा यस्य तद्विध, सर्वंसहेत्यर्थः। सुसाज्ञ शोभनश्चासौ ...र्थ तदामन्त्रणम्। अक्षैर्या धीरता तया अव्यय। सागम सर्वागमसम। [मां भज।] प्रथमार्धादेकान्तरितान्यक्षराण्युच्चित्य तृतीयपादः, शिष्टाक्षरैस्तथैव चतुर्थपादः ॥ ९१ ॥

नूनं नमन्मेनमनिम्नमेनमुमामनोमाननुन्नमौनम् ।
मानं मिमानं मुनिमानिनीनामनूननामानमिनं नमामि ॥ ९२ ॥

द्व्यक्षरः ॥

अहमेनमिनं स्वामिनं अनूननामानं नमामि । अनन्ताभिधानम् । 'असंख्यातः सहस्राणि' इति वेदश्रुतेः । तथान्यत्रागमेऽपि—'नवकोट्यस्तु चामुण्डा तावद्रूपाणि शंकरः । कृतवांस्तांश्च भजते पतिरूपेण भैरवः ॥' इति नीला भगवतोऽनूनानि [नामानि] । नूनं निश्चितम् । [नमन् प्रणमन्] माया इनो मेनः लक्ष्मीपतिर्यस्य तथा । अनिम्नमत्युन्नतम् । तथा उमाया मनोमाननार्थं चेतोरञ्जनाय नुन्नं निवारितं मौनं येन तम् । मुनिमानिनीनां मानं भर्तृविषय [कं] संयमं मिमानं हिंसन्तम् । देवदारुवनप्रवेशात् ॥ ९२ ॥

हृदि लसमान समा नो ह्रियते [ते] शाश्वती समान समानः ।
कान्न समानसमानः करोष्यतस्त्यान्धकास मानसमा नः ॥ ९३ ॥

पादान्तयमकम् ॥

सर्वेषां हृदि लसमान, 'तथा स्थानं हृत्पङ्कजसमुद्गकम्' इति नीला । हे अन्धकास, अन्धकदैत्यमस्यति यस्तत्संबोधनम् । कैश्चिदपि ते तव संबन्धिनी समान पूज्य शाश्वती समा अनन्तकालं न(नो) ह्रियते नापलप्यते । समः आनः आननं जीवनं [यस्य] तथाविधः । कान् न समान् सश्रीकान् करोषि । यतः [अ]समानः अतुल्यः । [नः] अस्माकं मानसमा मानसस्य चेतसः मा शोभा मानसमा चेतःशोभा अतस्त्या अत आगता ॥ सर्वपादान्तयमकम् ॥ ९३ ॥

चित्ते सद्वोसमत्ते समिदपरमहोऽजो गदासंकरोसा-
वाहेमासारवाही कदवरसमहामोहसत्तापहारी ।
पातादोजोगसत्तोऽविरलसुरणदोऽसच्चलासोऽकलङ्को-
ऽकाले कामेऽन्तको वोऽवितरततरसासज्जसंपत्तिदो वा ॥ ९४ ॥

अयं श्लोकः संस्कृतप्राकृताभ्यां भाषाश्लेषः ॥

असौ अकाले असमये । असंग्रामे इत्यर्थः । कामे विषये अन्तको वो युष्माकं पाताद्रक्षतु । अवितरः, विगतः तरः तरणं यस्मात् स वितरः, न वितरः, ततः अवितरततः । अथ च रसायां भूमौ सज्जा चासौ संपत्तिश्च, तां ददाति रसासज्जसंपत्तिदः । तथा ओजोगसत्तः । ओजोगानां तेजोगामिनां सत्ता अस्तित्वं यस्य । परप्रकाशरूपत्वात् । तथा अविरलसुरणदः । अविरलं कृत्वा सुरू शोभनान् सुरदायिनो रणान्ददाति । तथा असच्चलासः । असत्सु वेदादिषु चला अस्थिरा आसा आस्था यस्य । अत एव अकलङ्कः ।

---

१. 'समूर्ते' क.; 'ससते' ख.

चित्ते चेतसि मदागमने गर्ता गम्‌ हासो विकासः तेन सह गर्ता । समीरणस्य [illegible] सु [illegible] ग्रहः सह उत्पादः । भगवतः [illegible] सर्वेषां [illegible] यतः जन्मान्तरितः । तथा मदागोचरः । न विद्यते गर्वः सह गौरवो यस्य । दम [illegible] समन्तात्‌ ईशः सुरनरैर्न पर्यन्तं यदि । माहेन्द्रागारवाही । [illegible] हारी । चन्द्र कुङ्कुमः धवलो मदामोदः यस्य सत्ता [illegible] ॥

संस्कृतभाषाश्लेषः—

[चित्ते अद्धारसमाशी शमितपरमखो यो गताशङ्करोपा-

द्वाधे मासारवाहिः कृतवरसुमहामोपसत्तामथारिः ।

पातादो योगसक्तो विरलसुरनतः सत्यलास्यः कलाङ्कः

काले कामेऽन्तको वा वितरतु तरसा सद्दृशं प्रासिदो वा ॥]

चित्ते आश्चर्यवति अद्धारसमाशी आदरनिरूती । शमितपरमखः [शमितः परमखो दक्षाध्वरो येन । तथा गताशङ्करोपात्‌ । बहिर्बाधे सति मासारवाहिः, मया शोभया उप लक्षिताः सारया अद्रयः वायुस्यादयो यस्य । तथा कृतवरसुमहामोपसत्ताप्रथारिः । कृतवरः सुमहा आत्मोत्सवात्‌ मोपसत्ता या प्रथा तस्या अरिः । पातादो(दु)पनतादेतो विरलैः कतिपयैः सुरैः ब्रह्मादिभिर्नतः सम्यक्प्रार्थनया नमस्कृतः । यदाहुः—'पूजक यद्वः सन्ति भक्ताः सन्ति सहस्रशः । प्रसादपात्रमाश्वस्ता द्विता एव न पञ्चषाः ॥' इति नीला । योगसक्तः । सत्यलास्यः । सत्यं लास्यं नटनं यस्य स सत्यलास्यः । कल्पान्तादौ नृत्यति । तथा कलाङ्कः । कला चान्द्री अङ्को यस्य सः । काले कामेन्तको वा । काले क्रमेण कोपः । वितरतु । तरसा वेगेन । सैंजसदृशं प्रासिदो वा । इति प्राकृतभाषाश्लेषेण संस्कृतप्राकृतभाषाभ्यां श्लेषोऽयम्‌ ॥ ९४ ॥

कमलभ्यमलीकविधौ कमलं वय आननशोकमलं कमलम्‌ ।

कुरुपे न विशङ्कमलं कमलं सवितेव लसत्कमलं कमलम्‌ ॥ ९५ ॥

सर्वपादान्तयमकं तोटकवृत्तेन ॥

त्वं कं जलं गाङ्गमलभ्यं दुस्तरं अलीकविधौ मुकुटचन्द्रे, न तु नैर्मल्यात्‌ । कं ब्रह्माणं आननशोकमलं वयः सुखभगा (?) तथा कं न [कमलं] जलं कुरुषे । अपि तु सर्वं सुखयसि । अलं विशङ्कं कृत्वा । कमिव । सविता रविः कमलमिव । कथंभूतम्‌ । लसन्ती कमला लक्ष्मीर्यत्र तथाविधम्‌ ॥ ९५ ॥

---

१. '(सज्जसं) सदृशं' इति पाठो भवेद. २. इतः प्राक्‌ 'विभो प्रसभास्य नितान्तदीप्तयोऽजां प्रपद्यस्वतुलप्रताप । धिया दरिद्रस्य कृतावसाद दयार्द्र विश्वाधिपते प्रसीद ॥' इति श्लोको दृश्यते; स चाचमत्कारतया क्षेपक इति प्रतिभाति.

भीमारारा रामा मारा माराराराा माराराामा ।
[रामाराराराामा] मारारारामामा मा मारा ॥ ९६ ॥
मारारातेराघाते सातेऽयासातेसा मा सेना ।
नादे नासादेनामानानादे सानाशादेशा ते ॥ ९७ ॥

आद्यः श्लोकस्तुरगपदद्व्यक्षरः । द्वितीयो गजपदबन्धः । गजपदबन्धस्यासंयुक्तद्विस्वरत्वम् ॥

हे भीम भगवन्, रामा नायिका । अरा कुटिला आरा गतिर्यस्याः तथाविधा रती मारा मारणं मारस्तत्सहितेत्यर्थः । मारणपरैव यतः । तथा मारस्य आराश्चकधाराः ता राति तादृशी माराराारा इत्यर्थः । मारारामा मारस्यारामा विश्रान्तिस्थानं रामा भवति घनेनेति यतः आरामा । भीम कीदृश । रामारार । रामस्य जामदग्न्यस्य आरं शत्रुसमूहः तस्य आरः भीमः । नाशकत्वात् तत्संबोधनम् । मा लक्ष्मीस्तां रातीति तादृशी [मारा] इत्यर्थः ॥ हे अनादे, तव संबन्धिनी सा भा दीप्तिः भासुरता मे मम मारा । अरातेर्वैरिण आघाते गते सति । अनाश[ः] अविनाश[ः] आदेश आज्ञा यस्याः सा । तथा सेना नादे सति सासास्था अयासा अयति(?) असाति निवारयति सद्द(?) आशया आदेशः तस्य आशा दिक् । तवादेशेन मुक्तिरित्याशयस्थानम् ॥ विद्युन्मालाभ्यां युगलकम् ॥ ९६ ॥ ९७ ॥

स्फूर्जन्महाः प्रसन्नास्ते क्षणादेव त्वयि स्तुते ।
स सन्महानमुत्रास्ते यस्त्वां देव नमोऽस्तु ते ॥ ९८ ॥

काञ्चीबन्धः ॥

स्पष्टोऽर्थः ॥ ९८ ॥

[1]निजजानिं नुन्नानाजीं नूनं नानाजनानजान्नानि(?) ।
निजानेनजानिनानुजज्ञानूनानिजजनैः(?) ॥ ९९ ॥

द्व्यक्षरः ॥

हे इन स्वामिन्, ननु ऊनान् जनैर्जन्मनः हेतोः एतान् । कान् निजजानिं स्वां भार्यां, तथा नुन्नानीन्(?) नाना जनान् सुभटान् अजाद्यन्द्रागा(?) अन्नानि च अननं जीवनम् । अजिनानि राङ्कवादीनि प्रावरणानि । अनुजाः स्वपरादयः निजा मित्रादयः । [नूनं] निश्चितम् । ननु प्रश्ने । एतानि जनैः पुनः पुनः संसारभ्रमणात् । ऊनानुजनेनिः शरर्तीत्यर्थः (?) त्वत्पादसेवां विनेति प्रतीतिः ॥ ९९ ॥

येन मौञ्जो विभिन्नः कमवनतगताः के दिनेशस्य तीक्ष्णा
अन्तस्थाघक्षरं किं द्विजकुलमधिकां वक्ति कां जातिमग्र्याम् ।

---

1. 'निजजानिं ननु निजापूनं नानाजनानिं न ।
जानेननाजिनाज्ञानि नुन्नेनो जनर्नाजनैः ॥' इति स्यात्.

भृत्यानां कुत्र भक्तिः किमुचितमजयन्क्ष्मां नरेन्द्राः किमर्थं
कस्मै भक्ता अजस्रं प्रविदधति नमः स्वामिने शंकराय ॥ १००॥

प्रहेलिकान्तर्लापिकाख्येनेति स्वामिने शंकरायेति पदच्छेदेनोत्तरम् ॥

यथा—केन क्रौञ्चः शैलो विभिन्नः । अत्रोत्तरम्—स्वामिना इति कुमारेण । कं श
वनलगताः । कं नला गताः । लोकाः इति शेषः । अत्रोत्तरम्—ईशं महादेवम् । कं
दिनेशस्य रवेस्तीक्ष्णाः । अत्रोत्तरम्—कराः रश्मयः । अन्तस्थानां आद्यक्षरं किम्
अत्रोत्तरम्—य इति । द्विजकुलं ब्राह्मणवर्गः अधिकां श्रेष्ठामम्यां कां जातिं वक्ति
अत्रोत्तरम्—स्वाम् । भृत्यानां कुत्रभक्तिः । अत्रोत्तरम्—इने स्वामिनि । किमुचि
युक्तम् । अत्रोत्तरम्—शं कल्याणम् । राजानः क्ष्मां भूमिं किमर्थमजयन् । अत्रोत
रम्—कराय प्रजाभ्यो ग्राह्यबल्यर्थम् । भक्ताः कस्मै नमः अजस्रं प्रविदधति । अत्रो
त्तरम्—शंकराय महादेवाय । इति स्पष्टः प्रहेलिकार्थः ॥ १०० ॥

रिपुरोपारोपपर प्रोरुपापपरैररम् ।
रोरैरपाररूपैरापपे पुररिपो पुरा ॥ १०१ ॥

द्यक्षरः ।

हे पुररिपो । कथंभूत । रिपुरोपारोपपर शत्रुकुन्तारोपणे उद्युक्त । पुरा पूर्वं प्राग्ज
न्मनः प्रभृति अपाररूपैः अनन्तैः दौर्गत्यक्लेशैः प्रोरुपापपरैः प्रकर्षेण उरूणि यानि पा
पानि तान्येव परं परमार्थो यत्र तथाविधैः पापैः प्राक्कर्मवैचित्र्यादेव जन्मादिदौर्गत्योप
लब्धैः । अरमलर्थम् ॥ १०१ ॥

अपरुपो गतनिर्विभवासवः स्वयमिनः श्रितसत्यकलादयः ।
क्षततमा असुहृत्कलितापदस्त्वमसि नाथ वयं [च] तवार्थिनः॥ १०२॥

हे नाथ, त्वं अपरुपः, न परुषः अपरुषः । पारुष्यरहितः । वयं च संसारे प्रति
अपगतरुपः । तेनैव बाधितत्वात् । त्वं गतनिर्विभवासवः, गतो निर्विभः निष्कान्तिः
वासव इन्द्रो यस्मात् । त्वत्सकाशाद्वासवः······त्स्म्मनाभिप्रतिभव्यं गतः । इन्द्र ई·
त्यर्थः । वयं च गतनिर्विभवासवः, गता अस्मभ्यं पशुभ्य इव इति शेषः । निर्विभवाः
असवः प्राणाः येषां ते । तथा त्वं स्वयमिनः सर्वेश्वरः । वयं च स्वयमिनः । त्वं श्रित·
सत्यकलादयः, सत्यकला च दया च [श्रि]ते सत्यकलादये येन सः । वयं च श्रिताः ,
सत्यकलादयः कश्चिद्व्यवहारार्थं सत्यं कश्चित्त कलादयो यैः तादृशाः । तथा त्वं क्षत·
तमाः, क्षतं तमो येन सः । वयं च क्षततमाः, अतिशयेन क्षताः । त्वं असुहृतां यम·
भटानां सुहृत्त्वेन कलितापदं ददाति सः । वयं च असुहृद्भिर्यमैः कलिता आपदो
येषां तादृशाः वयं च तवार्थिनः याचकाः भिक्षवः पालनीयाः इति प्रार्थयमाना [ः]
इतिः । इत्येकवचनबहुवचनश्लोकः । उक्तं चालंकारिकैः श्लेषलक्षणे—'वर्णपदलिङ्गभा·
षाप्रकृतिविभक्तिवचनानामभिदः श्लेषः' ॥ १०२ ॥

माविदासहिते साररसा ते हि रमामय ।
यममारतनुत्यागगत्या नुत सदा विभा ॥ १०३ ॥

हे रमामय लक्ष्मीमय तव संबन्धिनी विभा सातिशया दीप्तिः भाविदासेभ्यः भाविभ्यो दासेभ्यो हिते सारः उत्कृष्टो रसो [यस्याः सा] यममारयोः तनुत्यागेन या गतिर्विच्छित्तिस्तया हेतुभूतया । सर्वैर्नुत स्तुत ॥ भद्रकावर्तबन्धः ॥ १०३ ॥

सादासन्ना रिपूणां परमुखसुरपक्षोतितत्स्वस्थिरासा
सारास्थिस्वच्छभावा विभवनवभवित्राणभव्योत्तमासा ।
सामात्तव्योमरूपा तनुरमरनुतत्वात्पुरस्ताद्विलासा
सालाद्विस्तारलभातियजन जयति स्वःप्रसन्ना सदासा ॥ १०४ ॥

भद्रकावर्तबन्धः अष्टदलपद्मबन्धः, षोडशदलश्च ॥

हे अतियजन, तव तनुर्जयति । अतिशयितानि सर्वोत्कृष्टानि यजनानि यस्य तादृश । सर्वयज्ञेषु रुद्रस्य मुख्यत्वात् । कीदृशी । रिपूणां सादे विनाशे आसन्ना सादासन्ना । पुनः कीदृशी । परमुखे सुरपक्षे च तत्स्वन्तेन (?) स्थिरासा । सारः अस्ति (स्थि) स्वच्छभावो यस्याः तथा विभवेन ऐश्वर्येण नवभविनां नूतनसंसारिणां त्राणे रक्षणे भव्या उत्कृष्टा अग्ररूपा । सामात्ता(?) आत्तं व्योमरूपं यया । अमरनुतत्वात् । सर्वदेवस्तुतत्वात् । पुरस्तान्निहिता विलासा यस्याः । तथा सालाद् देवदारोरपि विस्तृता, सालप्रांशुः । स्वः देवानां प्रसन्ना । सह दासैर्वर्तते या सदासा ॥ १०४ ॥

भव जलवायुनभोजनरुचिकर-
म(मृ)दनलराजरमा(सा)मयदेह ।
अव मामतिमोहकमारसहर
हर नम इह ते पुरभयदेह ॥ १०५ ॥

हे भव, जलवायुनभोजनरुचिकर, म(मृ)दनलराज र[सा]मयदेह । जलधि (लादि) रसान्तानां चार्थे द्वन्द्वः । तेषामष्टानां मूर्तिरूपा या प्रकृतिस्तन्मयदेह । जनशब्दो यजमानवाचकः । तद्रूपशरीर । त्वं मामव रक्ष । यतः कीदृश । अतिमोहकोऽयं मारसो लक्ष्म्यभिलाषः तन्निवारक । हे हर, इह सर्वत्र भुवनान्तरे ते तुभ्यं नमः । तथा कथंभूत । पुरभयदेह, पुराणां भयं ददाति । तथा ईहा यस्य तत्संबोधनम् । इति संस्कृतकश्मीरापभ्रंशाभ्यां श्लेषः ॥ १०५ ॥

[1]विविधपररसाभाभ भव्य व्यसासा-
धुधुतवनन सासादद श्व सासा ।

---

1. मालिनीवृत्तगन्धि वृत्तान्तरमेतत्.

ततमुसुर रसासारर सस्व सासा-
यवननररसासावव न्यन्यसासा ॥ १०६ ॥
जयसि जलमनन्तं नन्दनं चाम्बुधेर्वा
नवमनमव धृत्वा देवदेवेशमृत्यः ।
जयसि जनमनन्तं नन्दयंश्चाविधेये
अनवन नत कस्ते देवदेवेश भृत्यः ॥ १०७ ॥

आवली । युग्मम् । एकेन एकावली द्वितीयेन छत्रबन्धः ।

विविधधररसायां सर्वमयपद्गुरूपपर्यंतभूमौ साभ रादीप्ते । मव्य उत्कृट । नव शेषेण असो गमनं यस्य । असाधूनां धुतं धूतं तननं येन तथाविध । अवादं रणं ददाति तथाविध । ज्ञा देवास्तेषां मध्ये त्वमेव ज्ञः । देवदेव इति । सासा । आसेन आस्थया वर्तते सासा सास्था । एवंविधा तनुर्जयति । ततमुसुराः [ततः] भन देवा येन हेतुना तद्विध । रसायां भूमौ सारं सुवर्णवर्षणं राति । सासी स्व स्वस्व आत्मधन । अवनेन रक्षणेन नरेषु विषये रसो यस्याः । असौ । इयमेवेल अवनौ भूमौ अन्येषु दैत्येषु विषयेषु विरुद्धेषु सासासासा सास्था ॥ हे अनवम उत देवानां मध्ये देव, स त्वं जयसि । गङ्गाजलमनन्तं यथा अम्बुधेः समुद्रस्य नवं न चन्द्रं धृत्वा धारयित्वा अनन्तं जनं च नन्दयन् । अविधेये दैत्यसार्थे अनवन नत । सर्वे त्वां नताः । त्वं न कंचित् । इह हि तेनैव देवदेवेश भृत्यः ॥ छत्रब गोमूत्रिकाबन्धश्च ॥ १०६ ॥ १०७ ॥

यमादजावद्व्यमादिदेव वदेयमे यद्धवितार्थिनोऽज ।
जनोऽर्थिताविद्धविता ततो हि हितोऽव तावद्धवजादमाय ॥ १०८
यमागताकृत्यमवेहि येन नयेन वै सत्यसदासमेत ।
तमे सदासत्यनुते मिमान नमामि ते नुत्यकृतागमाय ॥ १०९ ॥
यदा तमोपेततया ज्ञ चारुरुचाज्ञया तत्त्वमतोवधान ।
न धावतोऽमत्तनुमोनतेन नते नमोनुत्तममोक्षदाय ॥ ११० ॥
यताकृते पर्वतजे निवासे सेवा निजेतर्वशताकृतेन ।
न ते कृताशंस(मान)मदा मयाभिभिया सदा सर्वपते कृताय ॥ १११

चतुर्भिः श्लोकैः प्रस्तारः ॥

हे आदिदेव, मम यमाद्भयमस्ति । अजावच्छागलीवत् । दुर्बलवत् दुर्बलत्वात् । अ र्थिनस्त्वामर्थयन्ते इति भावः । हे अज, यतः रणन्तो जनः अर्थिताविद्धविता ममत्वं

अर्थित्वस्य अन्तरज्ञो भविष्यतीति । भवजात्संसारजात् । ततः तमव रक्ष । हितः
।अमाय मायावर्जित । सत्यानुतिर्यस्य तत्संबोधनम् । यमं मिमान हिंसन् । यमा-
ितं यदकृत्यं तदवेहि । येन नयेति, विचारयेत्यर्थः । तुभ्यं नमामि । नुत्याकृता आ-
ताः सर्वजनोपदेशार्थं शास्त्राणि येन तस्मै । वै सत्ये चैश्वर्ये च । एत कर्बुरवर्ण, हे
गवन्, इ अनन्त स्वामिन् । ततः सात्वतं(?) आज्ञया चारुरुचा मणिप्रदीप्त्यालयर्थव-
ान । यमनियममयेत्यर्थः । अतो हेतोर्यदा समुत्तया यत्कारितेन क्षमैमत् (?) सतः
कादाद्रावतः भ्रमणात् अन्यः ततुमः अल्पश्रीकः नास्ति । तुभ्यं (न) ते नम्रे विषये
ग्युत्तममोक्षदाय उत्कृष्टमोक्षदायिने एवंविधाय नमः । हे शर्व (सर्वपते) यताकृते सं-
युतात्मन्, निजेतः निःशेषेण जयनशील, इन स्वामिन्, मया वराताकृता आपत्तता-
रिणा, पर्वतजे निवासे सेवा न कृता । अमितः समन्तात् भीर्यस्य तथाविधेन ।
सदा कृताय पुष्पसंचयायार्थम् । न विद्यते मदो यस्यां तादृशे[वि]क्रमपि मां कृपया
अवेति पूर्वोक्तवाक्यार्थः । चतुर्भिः कुलकम् (कालापकम्) ॥ १०८ ॥ १०९ ॥
११० ॥ १११ ॥

महामते मन्त्रपते परं पदं विना विभुं विन्दति कोऽतिभूतिमान् ।
कृपाकृते कृचयमाय मायते नमो नमो नम्रहिते हि पाहि माम् ॥ ११२॥

हे महामते विशुद्धरणे दक्ष, तथा मन्त्रपते 'सप्तसप्तिकोटीनां मन्त्राणां प्रभुरव्ययः'
इत्यागमे । त्वां प्रभुं विना परिहृत्य को जनः परं पदं मुक्तिरूपं विन्दति लभते । अति-
शयेन भूतिमान् । अष्टविधैश्वर्ययुक्तः । नम्रहितप्राण ······यदा त्वमेव मां पाहि रक्ष ।
(मा) यते, तुभ्यं कृपाकृते करुणापराय । कृत्त[य]माय छिन्नकालाय नमः । चतुर्महा-
देवस्वस्तिकबन्धः ॥ ११२ ॥

भो भो भविभुमावीभविभावैभव भीभुवः ।
भवाव भववा भाविभयाभिभवभावभित् ॥ ११३ ॥

भो भो भव महेश्वर, भानां नक्षत्राणां विभुः चन्द्रः । जूटेन्दुरित्यर्थः । तस्य [आ]
भा दीप्तयः, ताभिर्विगता इभस्य गजासुरस्य विभा वैभवं यस्मात्तादृश, समव रक्ष ।
मामित्यर्थः ।······'अर्थः प्रवरणं लिङ्गम्' इत्यलंकारः । भावीयः भवाभिभवः संसा-
रपराभवस्तस्य यो भावः सत्ता तद्भित् । भव शब्दो विवर्तते । 'भो भोः' इति प्र-
धानामन्त्रणं । भव [र]क्ष । कृतान्तान् । भियो भयस्य (भवस्य) भूरुत्पत्तिस्थानम् ॥
यक्षरोऽयं श्लोकः ॥ ११३ ॥

इति श्रीमहाकाव्यवतारकृतमीश्वरशतकं सटीकं समाप्तम् ।

श्रीमधुसूदनकविप्रणीतम्।

अन्यापदेशशतकम्।

कालीयाहिफणाली क्रमणकरालीभवन्नघक्षाली।
गोपालीकरतालीनर्तनशाली पुनातु वनमाली ॥ १ ॥

पद्मालयासादरदृक्चकोरीपेपीयमानाननचन्द्रबिम्बः।
विघ्नौघविध्वंसविधिं विधत्तां राधामयूरीमुदिरो मुकुन्दः ॥ २

विद्वन्मनोविनोदाय सद्युक्तिपरिशीलितम्।
अन्यापदेशशतकं करोति मधुसूदनः ॥ ३ ॥

मर्यादानुपमैव शीलममृतोत्पत्त्यैव निर्वर्णितं
नैर्मल्यं निजधर्म एव वचसां पारे तु गम्भीरता।
किं वाच्यो महिमा तवार्णव रमाप्रेयानपि प्रार्थने
तादृक्कौस्तुभभाजनेन भवता वैदग्ध्यमध्यापितः ॥ ४ ॥

हे पीयूषमयूख भूषणमणिः शंभोस्त्वमम्भोनिधे-
रुत्पन्नोऽसि तवैव दैवतकुलं प्रीणाति साध्वी सुधा।
विश्वेषामुपरि स्थितिर्ननु तनुस्तत्तत्कलाभाजनं
किं वाच्या विभुता धराध्वरभुजां राजा त्वमाजानिकः ॥ ५

उन्मीलन्ति कियन्ति न क्षितितले पुष्पाणि नानाविधा-
न्युन्मीलन्तु परंतु निर्भरमिदं किंचिद्वदामो वयम्।
धन्यं जन्म तवैव चम्पकतरो यत्कोरकाणां पुरो
हेम्नः श्रीरपि जायतेऽतिमलिना गण्या किमन्या रुचिः ॥ ६

भाभिर्भासितमम्बरं वितिमिरं क्षोणीतलं निर्मितं
चक्रे चक्रकुलव्यथाहृतिरथादिष्टाः क्रतूनां क्रियाः।
अम्भोजानि विकासितानि भवता सद्यो ननु द्योमणे
निर्बीजं वत कैरवोपरि परिक्षिप्तं किमन्धं तमः ॥ ७ ॥

---

१. अस्य श्रीमधुसूदनकवेर्देशो मिथिला, जनकः पद्मनाभः, माता शुभदा, इत्युपा-
न्त्यश्लोकात् 'दुजती(उचिती) कुलम्' इत्यन्तिमश्लोकात्प्रतीयते. कालस्य तु न निश्चयः.
२. अस्य काव्यस्य पुस्तकमेकमेव १८२२ [illegible] श्रीम[illegible] पीटर्सने[illegible]
[illegible]गरात आनीय काव्यमालार्थं दत्तमिति तदाभ[illegible]

लक्ष्मीं लेभे मुरारिः समलभत सुधां स्वर्गिवर्गः समग्रां
 तत्तद्वस्तूनि वास्तोष्पतिरपि सहसैरावतादीन्यवाप ।
पाथोधे त्वत्त एव प्रमथपतिरथ प्रापदापत्करं य-
 त्क्ष्वेडं तद्युक्तमेवाजनि जनिदिवसादेष यद्वामदेवः ॥ ८ ॥

पाण्डित्यं त्वयि ताण्डवानि तनुते शेते स नारायण-
 स्त्वामध्यास्य कृतस्त्वदेककलया शीर्णः प्रलम्बासुरः ।
धन्योऽसि त्वमनन्त संततमसौ यत्रातिसौख्योदया-
 द्विश्रामं लभते चराचरभराक्रान्तान्तरा मेदिनी ॥ ९ ॥

माकन्दा मकरन्दबिन्दुविधुरा व्यग्रो गजग्रामणी-
 रप्यन्तर्मदशोषदोषकलितं चक्रे हरेर्हुंकृतैः ।
त्वं हे कल्पतरो करोषि नहि चेदन्तः कृपाकोमलं
 कुत्रायं भ्रमरो मनागपि मनो विश्राममालम्बताम् ॥ १० ॥

त्वं तावन्निरुपाधिरम्बुद सुधासारानुकाराः पयो-
 धारा मुञ्चसि विश्वमोदजननीः सर्वत्र साधारणीः ।
छिन्ना एव पतन्ति यत्पुनरमुष्यान्तर्मुखे बिन्दव-
 स्तद्वादं जयतीह चातकशिशोर्दैवदुग्धेप्सितम् ॥ ११ ॥

चापल्यं परिमुञ्च चातकशिशो नैवार्तनादं वृथा
 कुर्याश्चिन्तय निश्चलेन मनसा धाराधरानन्वहम् ।
एषां जीवनमुन्नतिं च सहजामन्यार्थमेवासृज-
 द्धाता त्वं पुनरेतदेकशरणस्तद्धैर्यमालम्ब्यताम् ॥ १२ ॥

नोच्चैर्जल्पति वारिदो यदधुना कासार तन्मा मनो-
 मालिन्यं समुपेहि हन्त महतां नैसर्गिकोऽयं क्रमः ।
काले वर्षितुमुद्यतो यदि भवेदेकक्षणार्धं तदा
 युष्माकं कियती कृपा त्रिजगती पूर्णा भविष्यत्यसौ ॥ १३ ॥

श्रीखण्डाचलगण्डशैलशिखरप्रान्ताटवीसंस्थिताः
 पाटीरा निवसन्ति शाल्मलिमुखा निःसारभूमीरुहाः ।

मालत्याः स्रजि गुम्फितानि कुटजान्यप्याप्नुवन्ति स्फुटं
विद्वद्वृन्दशिरोधिरोहणकृतामुच्चैस्तरामुन्नतिम् ॥ १४ ।
अङ्के किं न कलङ्कतामपि गतं धत्ते मृगं चन्द्रमाः
किं वा शल्यमिवान्तरा वहति नो मैनाकमम्भोनिधिः
त्रायन्ते तरवो दहन्तमनलं वृष्टेः स्थितं कोटरे
किं किं नाश्रितपालनाय सहते कष्टं शरण्यो जनः ॥
स्फीता शीतांशुकान्तिर्मुदमथ कुमुदान्यापुराशा विकाशा-
नाजग्मुर्वारिमुग्भिः प्रखरमुखरता दूरतो द्रागपास्ता ।
नैर्मल्यं वारि भेजे शरदुदयदिनारम्भ युष्मत्प्रसादा-
त्स्रोतः स्रोतस्वतीनां कथय कथमहो क्षैण्यमभ्येति भूयः
विश्वोपकारकरणाय गुरुप्रयत्ना-
त्सृष्टः सरोरुहभुवा स्फुटमम्बुवाहः ।
धाराः स्वयं पुनरयं परितो विमुञ्च-
न्किं नाभिषिञ्चति लतां विपिने विपन्न ॥ १७
चञ्चू चारुतरे चिराय विहिते मञ्जिष्ठरागारुणे
पक्षौ चापि कृतौ हरिन्मणिनिभौ दूर्वाद्रवालेपनैः ।
काकैवं भवता शुकस्य समता निर्बन्धतो निर्मिता
सा संसारमनोविनोदजननी वाणी क लभ्या पुनः ॥ १८
यस्मिन्नम्बुरुहाणि जातसुहृदप्रेमाणि यस्मिन्घना-
नन्दं विन्दति चक्रवाकपटली यस्मिन्प्रसन्ना दिशः ।
तस्मिन्विश्वविकाशितेजसि रवौ रज्यत्युलूको न चे-
द्धानिः कैव तदा रवेः परमसौ हास्यास्पदं जायते ॥ १९
म्लानान्भूमिरुहोऽभिषिञ्च परितः शुष्काः स्रवन्तीः पुन-
र्धाराभिः परिपूरय प्रतिदिशं संप्लावयोर्वीमिमाम् ।
अम्भोवाह परं त्वकीर्तिदमिदं पानीयपानाशया
स्तोकोऽसौ भवदेकवृत्तिरनिशं यद्रारटीत्याकुलः ॥ २० ॥

उच्चैरुत्पथगा नदीः प्रकुरुषेऽनच्छं च नीराशयं
पन्थानं मलिनीकरोपि परुषं मौखर्यमालम्बसे ।
प्रावृष्येव कियन्त्यहान्यधिकृतस्त्वं वारिदैवं क्रिया
नो जाने चिरमेपि चेदधिपतां स्यात्कस्तदोपद्रवः ॥ २१ ॥

कान्तिः काञ्चनरूपदर्पदमनी सौरभ्यमभ्याहतं
मध्यं चापि न धूलिधूसरतरं रोचिष्णुरुच्चैः स्थितिः ।
सर्वे विश्वविलक्षणास्तव गुणाः किं चम्पकैतावता
नो चेत्त्वय्यनुरज्यते क्षणमपि क्षीणोऽपि पुष्पंधयः ॥ २२ ॥

कः संबन्धो यदभिरमते वीक्ष्य मेघं मयूरी
कैवासक्तिर्यदमृतरुचौ सानुबन्धा चकोरी ।
को वा हेतुः पतति परितो यत्कृशानौ पतङ्गः
प्रायेणैवं विधिपरवशा प्राणिनां चित्तवृत्तिः ॥ २३ ॥

मन्दारो विविदे व्यलोकि वकुलं संशीलितश्चम्पकः
पर्यालोचनयावधारितमिदं वन्दस्तु चाम्पेयकः ।
येनैकेन विधीयते मधुभराकृष्टालिमालागरु-
द्वातोद्धूतपरागसौरभभरैरामोदिता मेदिनी ॥ २४ ॥

कुन्दं वारिभिरश्च यच्छ सुमना(नो)मूले मृदं यूथिका-
पर्यन्ते रचयावृतिं कुरु गुहुर्मल्लीतले कर्षणम् ।
मालाकार विशेषतः पुनरसौ सेव्यो रसालस्त्वया
सर्वेषामुपयोगिनी फलवती वृद्धिर्यदस्यैव हि ॥ २५ ॥

दत्त्वा स्कन्धतले पदं विनमितां कृत्वा तु शाखाशिखां
सर्वेषां कुसुमावलीमवचिनु स्वच्छन्दमुर्वीरुहाम् ।
किं त्वलिन्यनपाल केतकतरौ यत्नैर्निदध्याः करौ
स्यातां कण्टककोटिभिः कवलितौ नो तावदेतौ यथा ॥ २६ ॥

आरोहो गिरिशातुङ्गेन कनिधा कुम्भं भिनत्ति क्रुधा
पश्चाद्धरावचैरयोमयमुखैर्निघ्नन्ति चान्ये जनाः ।

क्वापि स्थैर्यमुपागतस्य सहजेनाग्रे पदान्यर्पितुं
स्वेच्छाचारपरस्य पेचकिपते रोमापि न स्पन्दते ॥ २७ ॥

फेत्कुर्वन्त्यपि फेरवोऽतिपरुषं चेत्पार्श्वयोराश्रिताः
काकाश्चेदुपरि स्थिताः प्रतिदिशं कुर्वन्ति कोलाहलम् ।
मन्दं मन्दमुपान्तमीलितदृशो मार्गे पदं न्यस्यतः
किं भेदं समुपैति कुञ्जरपतेर्मानोन्नता भ्रूलता ॥ २८ ॥

यद्यूथाधिपपालितेन भवतारण्या वने निर्जिता
हे दन्तावलडिम्भ किं भवति ते तत्कीर्तये पौरुषम् ।
यूथेशे समयेन कालवशतां प्राप्तेऽथ कुत्रापि चे-
त्किंचित्सेत्स्यति ते बलं तदमलं कर्ता यशोमण्डलम् ॥ २९ ॥

चन्द्रस्तावदलंकरोतु रजनीं भासां भरैर्मुद्वतीं
व्याधत्तां च कुमुद्वतीं विनयतु ध्वान्तोपरोधं दिशाम् ।
किं च क्लान्तचकोरचेतसि मुदं पुष्णातु किं तावता
यच्चेता मलिनीकरोति पुरतस्ताराः सुदारानपि ॥ ३० ॥

माकन्दे कुरु मञ्जरीमिरशनं कर्णे सुधावर्षिणीं
वाणीं व्याहर किंतु कोकिल शुकस्पर्धां वृथा मा कृथाः ।
योऽसौ काञ्चनपञ्जरे परिलसन्नाकर्णितान्युच्चर-
न्देवीभिः समुपास्यते सविनयं दुग्धौदनप्राशनैः ॥ ३१ ॥

स्वच्छन्दं कलहंस संचर सुखं निद्राहि पारावत
त्वं चोच्चै रट हे शिखावल शिखामारुह्य भूमीरुहाम् ।
अस्माभिः शुक एव केवलमिहारण्ये समन्विष्यते
यस्मै राजनितम्बिनी स्पृहयति श्रोतुं गिरां पाटवम् ॥ ३२ ॥

अङ्गीकृतः प्रसवबन्धनतो वियोगः
सोढानि तानि करजक्षतिपीडितानि ।
उद्यानपाल तदिदं तु मनो दुनोति
प्राप्तासि यत्कुलवधूः सह मालतीं माम् ॥ ३३ ॥

त्वङ्गि द्रागङ्गीकुरु सुरभितामाहर मन-
स्त्वमप्यम्भोजश्रीः कुमुद मुदमाधेहि हृदये ।
नमस्या सा कापि स्फुरति पुनरन्यैव लतिका
गतव्रीडं क्रीडन्पिबति मधु यस्यां मधुकरः ॥ ३४ ॥

कियत्यः श्रीमत्यः कुसुमकुलसौरभ्यसुभगा
दृगानन्दं यूनां जगति जनयन्त्येव हि लताः ।
परं त्वासां मध्ये सफलजनिरेकैव सुमना
विना सङ्गं यस्या दलति हृदयं हा मधुलिहः ॥ ३५ ॥

धन्याः स्पृशन्ति मधुपास्तव पल्लवाली-
मन्तर्निविश्य मधु किंतु पिबन्ति पुष्पे ।
एतावतैव सफलं मम जन्म जात-
माकस्मिकं यदिह मालति वीक्षितासि ॥ ३६ ॥

रे काक कालवशतो यदि सौधपृष्ठ-
मारूढवानसि तथापि हि काक एव ।
जम्बालजालपतितोऽपि मरालबालः
कैर्नाद्रियेत रमणीगमनोपमायाम् ॥ ३७ ॥

स्पर्धां जातिकृतां भजन्तु भवता सार्धं परे सागराः
किंवा दुग्धपयोनिधे तव तुलामभ्येतुमेते क्षमाः ।
त्वं तादृग्महिमाढ्यो विजयते तथादृशं ते यशो
देव्या सिन्धुभुवा समं यदुदरे निद्राति दामोदरः ॥ ३८ ॥

केऽमी दिक्करिणो रणोद्धुरतरश्चेदस्ति कासिश्च वा
शक्तिस्तादृगिहास्ति यस्य न भयं जागर्ति मद्गर्जिते ।
एवं केवलमात्मनैव गुरुतामात्मन्यभिद्योतय-
न्साहंकारगिरस्ततो विहरते कूपोदरे दर्दुरः ॥ ३९ ॥

छिन्नाम्भोधरवारिबिन्दुजटिले गर्ते स्थितः स्वां तनुं
वीक्ष्य स्वर्णसमां किमित्यतितमां जल्पन्मुधा मोदसे ।

रे रे बर्बर दर्दुर स्फुटमिदं जानीहि वर्षात्यये
　　यत्नेनापि गवेषितः कुतुकिभिः कुत्रापि न प्राप्स्यसे ॥ ४० ॥

तुङ्गः साहजिकोऽसि नम्रतरतामभ्येषि भूयः फलैः
　　पुष्पामोदभरेण कस्य न मनोमोदं विधत्सेतराम् ।
कस्ते हे बकुलान्यजन्मदुरितोद्रेको गरीयानयं
　　येनेयं वनितावितीर्णमदिरागण्डूषपानस्पृहा ॥ ४१ ॥

सोढा श्रीविगमव्यथातिविषमा कल्लोलकोलाहलै-
　　रन्तस्तापभरा न याभिलषिता दत्ता मणीनां चयाः ।
उच्चैर्मन्दरमन्थनेन हृदये व्यालोलितेऽतीव भू-
　　मर्यादा न विलङ्घिता तु भवता वन्द्योऽसि वारांनिधे ॥ ४२ ॥

यः सख्यौ सुरसिन्धुनीरनिकरे नित्यं निदाघार्दितो
　　हेमाम्भोजवनीपरागपटलैश्चक्रे रजःक्रीडनम् ।
निःशङ्कं समवाप नन्दनवने स्वेच्छाविहारोत्सवं
　　सोऽयं कालविपर्ययात्करियुवा शुष्कं सरः सेवते ॥ ४३ ॥

यत्राजायत कौस्तुभो हि ककुभो भासा समुद्दीपय-
　　न्नुत्पन्नो हिमदीधितिस्तरुवरो जज्ञेऽथ कल्पद्रुमः ।
शम्बूका अपि संभवन्ति शतशस्तत्रैव पाथोनिधौ
　　विख्यातस्त्रिजगत्सु तस्य महिमा किं तावता हीयते ॥ ४४ ॥

मा खेदं समुपेहि चेतसि सखे पद्माकरोष्मागमे
　　शुष्कोऽसीति [illegible]
भावी कोऽपि स वासरः पुनरपि [illegible]
　　यत्र त्वं भवितासि वारि[illegible]

अग्रे कूप इतीव लोकमुख[illegible]
　　पास्यामीह यथाभिलाष[illegible]
धावित्वाथ समागतोऽस्य [illegible]
　　पाताले विनिवेश्य [illegible]

काकुं चातकपोत नाकुलतया कुर्या वृथा शारदे
यावद्वारिभरव्ययेन नितरां रिक्तीकृते वारिदे ।
त्वत्तृष्णा न विराममेष्यति परं काका पयोविप्रुषो-
ऽप्युत्सर्गे हतशक्तिरेष भविता व्रीडां मजः केवलम् ॥ ४७ ॥

स्थाने स्थाने सुमेरुप्रभृतिगिरिवराः सन्ति नोर्व्यां कियन्तः
किं तैरेको············मलय महिमा पूजनीयस्तवैव ।
चञ्चत्पाटीरवाटीप्रभवनवनवामोदसंपत्समृद्ध्या
यस्त्वं शश्वत्समामोदयसि निरुपधिः सर्वतो दिङ्मुखानि ॥ ४८ ॥

सद्वृत्तोऽसि गुणान्वितोऽसि विमलच्छायोऽसि पृथ्वीपति-
त्रस्यच्चारुचमूरुशावकदृशामप्येपि दन्तोपमाम् ।
मुक्ताहार परं त्वरुंतुदमपि ब्रूमो वयं यद्भवा-
नन्तःशून्यतरोऽसि तत्प्रतिपलं चेतः समुत्ताम्यति ॥ ४९ ॥

भूयांसो जलबिन्दवो जलमुचा स्वातौ विमुक्ताः परं
निःपीता खलु शुक्तिकाभिरिह ये ते बिन्दवो बिन्दवः ।
तद्गर्भे परिणामतः परिणता मुक्ता नृपप्रेयसी-
पीनोत्तुङ्गपयोधरोपरि सुखं खेलन्ति हारस्थिताः ॥ ५० ॥

भ्रातः षट्पद यत्र तत्र कुसुमे तृष्णातुरो न भ्रमः
स्वल्पादेव विरामभेष्यति सरोजानां विपच्छैशिरी ।
अन्तास्फुटबिसप्रसूनमुकुलामोदैरिदं सूच्यते
द्वित्रैरेव दिनैः प्रफुल्लकमलाकीर्णं सरः स्यादिदम् ॥ ५१ ॥

भ्रमर भ्रमतोऽपि केतकीनां विपिनं नैव कदाचिदप्युपेहि ।
रसलब्धिरिहास्तु वा न वास्तु नियतः कण्टकसंकटे निपातः ॥ ५२ ॥

दूषणान्यपि महान्ति धीमतां संवृणोति समुपार्जितो गुणः ।
सन्निलुम्पति गुणेन केवलं मौक्तिकी मकरन्दप्रमातलनः ॥ ५३ ॥

मोहितो मधुप रूपसंपदा कर्णिकारकुसुमं किमीहसे ।
नेह सौरभसमागमस्तव व्यक्तिमेष्यति परं तु मूढता ॥ ५४ ॥

सिन्धुवन्धुमगुमम्बुलिप्सया सेवसे किमु निदाघबाधितः।
सेवनस्य परिदेवनं फलं लप्स्यसे न कणमप्यपां पुनः ॥
यत्र नैव कलहंसकूजितं नाथ पङ्कजसमूहसंभवः।
नापि कापि जलखेलनक्रिया तत्किमम्बुजलमुच्यते जलम् ॥ ५६
यद्दिशालजघनाङ्गनागणस्नानधौतकुचकुङ्कुमारुणम्।
उल्लसज्जलपतत्रिचित्रितं तत्सरोवरपयः पयः स्मृतम् ॥ ५७ ॥
हंसैर्मौनमकारि वारिजकुलैरासादितं मुद्रणं
शोकः कोकमवाप कामपि दिशं भेजे दिनश्रीरपि।
अस्ते भास्वति हा दिगम्बरतलं व्याप्तं तमोभिर्दिशो
भीमाः फेरवफू(पू)त्कृतिव्यतिकरैर्नृत्यन्त्यमी पेचकाः ॥ ५८ ॥
ज्योत्स्नाभिः ककुभो विभूषय तमोमालाजटालाम्बरं
द्रागुल्लासय वासयापि कुमुदामोदैर्महीं त्वं विधो।
सर्वं सम्यगिदं तथापि किमपि ब्रूमो वयं कुप्य मा
यादृक् श्रीर्जगतां रवौ न तु पुनस्त्वय्येव सा भाविनी ॥ ५९ ॥
वासन्ती न विलोकिता कमलिनी नालिङ्गिता नेक्षिता
यूथी नापि कुमुद्वती परिचिता नापेक्षिता मालती।
युष्मद्दानसमीहया मधुलिहा हन्त त्वयायं पुन-
र्दूरादेव निवार्यते गजप किं कर्णस्य विक्षेपणैः ॥ ६० ॥
यावन्नृत्यं कलयितुमलं सज्जते नीलकण्ठे
यावच्चञ्चूमपि च विवृणोत्यम्बुने चातकोऽपि।
संनद्धोऽयं वियति जलदस्तावदुत्पातवातै-
रागत्योच्चैरहह सहसा क्वाप्यपाकृष्य नीतः ॥ ६१ ॥
एकत्रैव कुलायकोपकुहरे वृद्धिं परां प्राप्तयो-
रेकाकारजुषो रसालशिखरे साकं समासीनयोः।
इत्थं कोकिलकाकयोः कथमहोत्पद्येत भेदग्रहो
नो चेज्जातिनियन्त्रितेह वचसां व्यक्तिर्भवेद्भेदिका ॥ ६२ ॥

यः प्रासूत सुतं सुधाकरमुमाप्राणेशचूडामणिं
लक्ष्मीर्यस्य सुता हरिप्रियतमा यः कालकूटाश्रयः ।
पातुं पाणिपुटे कृतस्य मुनिनागस्त्येन तस्याम्बुधे-
र्जाताः केऽपि न रक्षणक्षमतमा दैवं ततो व्येतु कः ॥ ६३ ॥

यो दिङ्मण्डलमुद्धरत्युरुतमोग्रासादनायासतो
येनानन्दमनिन्दितेन लभते चित्ते कुमुद्वानपि ।
यं चाश्रित्य जगज्जयत्यतनुरप्येवंगुणोऽसौ विधू
राहोरास्यकरम्भतामुपगतः कस्मै किमावेदताम् ॥ ६४ ॥

कैरविणीकुलबन्धो हिमकर सिन्धोरवाप्तजन्मासि ।
इति तव महदयशस्यं मलिनयसि यदम्बुजश्रेणिम् ॥ ६५ ॥

संगम्य दुग्धनिवहैरविशेषबुध्या
किं वारिपूर बहुदूरमुपेहि मोदम् ।
दुग्धाभिलाषिणि विवेकिनि राजहंसे
हा हा क यास्यति पदं भवतोऽभिमानः ॥ ६६ ॥

यो मन्दारमरन्दबिन्दुनिवहैः संवर्धितः शैशवे
तारुण्ये मदमाचचाम बलभिद्वेतण्डगण्डस्थले ।
सोऽयं जीर्णतनुर्निनीषति जनुः कार्पासपुष्पेष्वलि-
र्दुर्दैवव्यवसायतोऽद्य तदपि प्रायोऽभवद्दुर्लभम् ॥ ६७ ॥

नादत्तेऽनुचरोपनीतकवलं सर्पिःसिताप्लावितं
यत्नेनापि न पातुमिच्छति मनोहारीणि वारीण्यपि ।
विन्ध्यागमवनीवियुक्तकरिणीचिन्तादुरन्ताधिवा-
न्मूर्धानं विधुनोति बन्धनगतः स्तम्बेरमः केवलम् ॥ ६८ ॥

देशोऽयं मरुरङ्कतो विधिवशादस्मिन्डगोल्लक-
मध्येऽप्याजनि मल्लिकालिनिकरभ्राम्यन्मनः षट्पदी ।
तावुन्मूलयितुं समुद्यतकरस्त्वं तावदुत्कण्ठसे
हे दन्तावल ते कथं न यतते दृष्टिः कृपाकोमला ॥ ६९ ॥

कली दैन्यमुपैतु काननतले कोऽन्यो गरीमानितो
यं चालम्ब्य करेण कर्षति वपुर्नारि न तादृक्वरः ।
गृध्रैर्योऽसि शिवागणैर्भुवि मुहुर्भिन्नासितामुष्ययो
हा धिक् पङ्कपराभवे निपतितो दन्तावलो हीयते ॥ ७०

परपर्षेऽञ्जनपर्वतेन सह यन्नन्वा तदन्वाययौ
साधर्म्यं श्रुतसप्तधामदपयःसारेण धारामृताम् ।
दिग्दन्तावलराजिभाजिषु रदाघातैर्जिगायौजसा
सोऽयं दैवनिबन्धनं विपहते दन्तावलो बन्धनम् ॥ ७१ ।

अजनि रजनिजानिर्यद्यपि क्षीरसिन्धो-
रलभत पदमुच्चैर्मूर्ध्नि कंदर्पशत्रोः ।
तदपि यदि जडात्मत्वात्कलङ्कावगुण्ठं
वहति हृदयमध्ये कस्तदा किं करोति ॥ ७२ ॥

शरद्धने गर्जति वारिवाञ्छा कदापि रे चातक नैव कार्या ।
इदं तु निर्व्यूढमवेहि तत्त्वं गर्जन्ति ये ते न फलोपलब्ध्यै ॥

रे काक किं रटसि कर्णभिदः कटूक्ती-
र्वाचालता नहि विदग्धविनोदभूमिः ।
पश्येति कोकिलयुवा समये कदाचि-
त्सूक्तिं लपन्नभिमतो न जनस्य कस्य ॥ ७४ ॥

वैदग्ध्यमन्दिर मनोहररूपमात्रा-
दिन्दिदिर भ्रमणमिच्छ न कर्णिकारे ।
अस्मिन्नुदेष्यति न कोऽपि रसोपलम्भः
सौरभ्यदुर्भगमिदं जगति प्रसिद्धम् ॥ ७५ ॥

अकाले संनद्धो नभसि मुदिरो मेदुरतरः
परीतस्तोयाशाविवृतवदनैश्चातकगणैः ।
तथानेनारब्धं किमपि चरितं येन करका-
निपातैरेतेषां सपदि शतधाभिद्यत शिरः ॥ ७६ ॥

यद्यपि सन्ति बहून्यपि कुसुमानि तथापि वारिजं वन्दे ।
निशि निशि मधुपयुवायं यन्मधुने बन्धनं सहते ॥ ७७ ॥

तुल्यैव रूपरचना गणनापि धातु-
मध्ये समैव समता घटते तथापि ।
हेम्ना समं न दहने प्रविशारकूट
व्यक्तीभविष्यति यतो भवतो विशेषः ॥ ७८ ॥

द्रुमानतिक्रामति पल्लवश्रीः प्रवालशोभां हरति प्रसूनम् ।
तरोरशोकस्य तथापि नाभूद्दुर्दैवतः साधुफलोपलब्धिः ॥ ७९ ॥

नैव त्वत्सदृशी परागपटली कुत्रापि पुष्पान्तरे
नो वा सौरभमुग्रमीदृशमथो नैतादृशी सुच्छविः ।
अन्यस्मै स्पृहयन्ति किं मधुलिहो हित्वा भवन्तं तदा
भ्रातः केतक कण्टकैः कटुमुखैस्त्वं स्या न चेदावृतः ॥ ८० ॥

स्निग्धं न वीक्षितमसिक्षितिलास्यमास्यं
मुग्धे मुधा हलिकनारि कुचेष्टितेन ।
अन्यानि तानि ललितानि विलासिनीनां
यैराहतानि हृदयानि हरन्ति यूनाम् ॥ ८१ ॥

एकः स एव धरणीधरचक्रवर्ती
भूभृत्तु वन्यमहिमा हिमवान्न चान्यः ।
योऽसौ तपोभिरधिगम्य सुतामपर्णा-
मर्धीचकार सुरसारमपीन्दुमौलिम् ॥ ८२ ॥

इतस्ततः श्रावणवारिवाह किमूषरे वारिभरव्ययेन ।
त्वमुर्वरां शश्वदिमां निषिञ्च जीवातुभूता जगतां यदेषा ॥ ८३ ॥

उपरि चरणपातं कुर्वती मौक्तिकानां
हरिहतकरिकुम्भप्रच्युतानां समन्तात् ।
वनमटति किराती चिन्वती सञ्जु गुञ्जां
हसति किमु महत्त्वं येन मुक्तामणीनाम् ॥ ८४ ॥

उच्चैर्विरौति परितो यदि सारमेय-
स्तस्मिन्भवन्ति किमु केऽपि कृतावधानाः ।
धीरं ध्वनत्यवनिभृत्कुहरे हरीन्द्रो
दिग्दन्तिनां सपदि शुष्यति दानधारा ॥ ८५ ॥

ध्वनति मधुरमम्भोमुक्शरद्येप भावी
झटिति जलनिपातोऽपीत्यनन्दत्कुमुद्वान् ।
तदिह पुनरनेनाकारि येनास्य जाता
रुचिरपि हिमरश्मेर्दुर्लभा सैव वृष्टिः ॥ ८६ ॥

कतिविधा विलसन्ति मधुछुताः कुसुमभारनता न लता वने ।
कमलिनीविरहव्यथितो रतिं वितनुते किमु तासु मधुव्रतः ॥ ८७ ॥

नैवासन्कति सन्ति नैव कति वा के के न वा भाविनो
राजानो जनकस्य जातु किममी कर्तुं तुलामीशते ।
सीताकल्पलताप्रतिग्रहमिह क्षोणीभुजामग्रतः
स्वस्तीत्युक्तवते त्रिलोकपतये रामाय योऽयं ददौ ॥ ८८ ॥

रे हंस संचर सरोरुहवृन्दमध्ये
त्वं चापि चक्र चर चंक्रमणं ततः किम् ।
योऽन्तर्निगूढमकरन्दरसोऽस्य हृद्यो
गृह्णाति तं परमसौ रसिको द्विरेफः ॥ ८९ ॥

वन्ध्ये किमन्ध शुक सीदसि काञ्चनारे
पुष्पश्रिये पटुरसौ न फलागमाय ।
उड्डीय गच्छ फलितं तरुमन्यमाशु
भ्रातर्न चेत्पुनरुपेष्यति तेऽनुतापः ॥ ९० ॥

एधन्तां त्वयि पीनमीननिवहग्रासैकका निर्भरं
पङ्केरुट्फलमूलशैवलगणानश्नन्तु कारण्डवाः ।
अन्ये चापि चिरं चरन्तु विहगाः स्वच्छाश्च पद्माकर
भ्रातर्या पुनरभ्युदेति सुषमा हंसैरमीभिर्न सा ॥ ९१ ॥

स्थाने स्थाने विकचकमलश्रेणिगुञ्जद्द्विरेफा
न भ्राजन्ते किमिह सलिलोदीर्णरागास्तडागाः ।
उत्प्लुत्यायं तदपि कुधियां दर्दुराणां समूहः
कस्मात्कूपे निपतति वयं तत्र बीजं न विद्मः ॥ ९२ ॥

चेदेकदा न सरसीषु न वा नदीषु
वारीण्यवाप दुरवग्रहदूषितासु ।
तत्किं तृषार्तिविभवाकुलितोऽपि तोय-
पानाय कूपमनुधावति वारणेन्द्रः ॥ ९३ ॥

नास्मै हस्तिपते प्रसारय करं कूपाय तृष्णातुरो
भावी नैव तव प्रसारितकरस्याप्यम्बुलाभोऽप्यतः ।
द्वित्राणीह दिनानि धेहि हृदये धैर्यं भविष्यन्त्यमी
द्राग्धाराभिरितस्ततो जलमुचां पूर्णास्तु पद्माकराः ॥ ९४ ॥

किं गर्वमुद्वहसि कच्छप गाधतोये
पद्माकरे समवहेलितदिव्यकूर्मः ।
स्यादेष चेत्पुनरवग्रहदोषशुष्क-
स्तत्रावधारय विधिं निजजीवनस्य ॥ ९५ ॥

निदाघे छायार्थं तरणिकिरणोत्तापिततनु-
र्यदं यावद्विन्ध्येऽनुसरति समृद्धं करिसुता ।
तथा गुल्मश्चायं दवदहनकीलैः कवलितो
यथाभूदामूलं दहनसहसा भस्मनिचयः ॥ ९६ ॥

यदृच्छा जाताभूदुपवनतटे काचन शमी
समृद्धिं योऽपानाधिकृतपुरुषैः प्रापि कृपया ।
तथाकस्माचस्यां हुतभुगुदियायान्तरगतो
यथाभूदासन्नद्रुमनिवहदाहाय कुशला ॥ ९७ ॥

संतोषयाहि मकरन्दभरेण भृङ्गा-
नम्भोज संपदि यतो हि परोपकारः ।

दोषागमोऽयमतिसंनिहितो यदलि-
न्कान्तिर्न तेन मधुना गमनं त्वमीपाम् ॥ ९८ ॥
अन्येऽपीह लसन्ति किं न कुसुमश्रेणीसमृद्धश्रिय-
स्ते ते चम्पककाञ्चनारवकुलाशोकादयो भूरुहः ।
हे माकन्द तथापि भेदविदुषामिन्दिन्दिराणां मनः
सान्द्रानन्दमहर्निशं रसवति त्वय्येव विश्राम्यति ॥ ९९
यज्जातोऽपि चतुःपथेऽत्र विपये निःशाखिभूमण्डले
शाखाभिर्निविडाभिरुन्नततरच्छायोऽसि यत्त्वं पुनः ।
तं न्यग्रोधतरो सहस्व वहलच्छायाभिलाषाय त-
त्पान्थानामुपरोधखेदमधुना नैदाघमध्यंदिने ॥ १०० ॥
विश्वेषां त्रिदिवौकसामपहरन्नार्तिं हृदामन्वहं
यद्यप्याकुल एव तिष्ठति भवाज्ञानाम्यहं तत्त्वहो ।
हंहो कल्पतरो परोपकृतये सृष्टोऽसि यद्वेधसा
तत्त्वचोऽहमपीप्सितामुपकृतिं किंचित्समीहेतमाम् ॥ १०१
तिष्ठामो विपिने सरःसु सलिलं स्वैरं पिबामस्तृणा-
न्यद्मो यद्यपि सर्वतो भयपराधीनाश्च वर्तामहे ।
निर्बीजं प्रहरन्ति हन्त तदपि व्याधा इमेऽस्मान्मृगा-
नीदृश्येव विधातृनिर्मितिव(र)तः किं कुर्म एते वयम् ॥ १
धन्या रोहणभूरियं सहजतो यस्यां मणिश्रेणयः
पर्यन्तेषु लुठन्त्यकुण्ठितरुचिव्यालिप्तदिग्भित्तयः ।
किं त्वस्याः पुनरन्य एव महिमा श्लाघ्यः समन्तान्मणी-
न्यो गृह्णाति निजेच्छयैव सरसं गृह्णातु ना संमतिः ॥ १०३
मातङ्गाश्चलताप्यतस्त्वमपि हे शार्दूल दूरं भज
त्वं चान्यत्र वराह निःसर पुरो यावत्स्थितं तत्स्थितम् ।
सोऽयं दीर्घकरीन्द्रकुम्भनखरक्रोडस्थमुक्तावली-
भासा दन्तुरयन्दिशो निविशते पञ्चाननः कानने ॥ १०४ ॥

चेदङ्गीक्रियते न मत्तकरिणा भृङ्गीयुवा गौरवा-
द्भूयादस्य गुणालयस्य तदपि चित्तव्यथा किं वृथा ।
सौरभ्यस्रवनिर्झरभ्रमदलिभ्राजत्प्रसूनप्रभा-
स्तास्ताः सन्ति लवङ्गिकाप्रभृतयश्चेतोमुदे चेल्लताः ॥ १०५ ॥
करटिकठिनदन्तोल्लेखसंकर्षिताया-
मविरलघनधारासारसेकाप्लुतायाम् ।
अपि सुभगमुहूर्ते यत्नतो बीजमुप्तं
गिरिशिखरशिलायां रोहते किं कदापि ॥ १०६ ॥
एतस्यां वनसीम्नि यद्यपि वसत्युग्रोऽपि कण्ठीरवो
निःशङ्कं करिशाव संचर तथाप्याकर्ण्य वार्तामिमाम् ।
अन्ये ते करिणो मदोत्कटकटस्थानभ्रमच्छ्वापद-
श्रेणीगुञ्जितरञ्जितेषु हरयो येषु प्रहारमदाः ॥ १०७ ॥
रे रे शूकरयूथनाथ महता तारुण्यदर्पोष्मणा
दन्ताभ्यामिह पातनाय यतसे शालद्रुमस्यास्य किम् ।
जग्मुर्यत्र कठोरपर्वतशिलातुल्यत्वचि प्रांशवो
दन्ता निष्ठुरवज्रकोटिकठिना दिग्दन्तिनां कुण्ठताम् ॥ १०८ ॥
लेभे यं शुभदा तपोभिरमलैः श्रीपद्मनाभात्सुतं
यद्देशो मिथिलाखिलावनितलालंकारचूडामणिः ।
तेनेदं मधुसूदनेन कविना विद्यावता निर्मितं
श्लोकानां शतकं मुदे सुकृतिनामन्यापदेशाह्वयम् ॥ १०९ ॥
निरवद्यमद्य शतमेतदतिप्रकटार्थवर्णपदसंवलितम् ।
दुज(उचि)तीकुलाम्बुजवनीरविणा मधुसूदनेन कविना रचितम् ॥ ११० ॥

इति मैथिलमधुसूदनकृतमन्यापदेशशतकं समाप्तम् ।

---

[1]श्रीलक्ष्मणाचार्यप्रणीता
[2]चण्डीकुचपञ्चाशिका।

श्रियं नौमि देवीं परां पारिजातां पदाम्भोजरेणूपसेवापराणाम्।
यदाद्याक्षरस्याभिधेयेन शूली मलीढोऽपि मृत्युप्रजेता गरेण ॥ १ ॥

आशादासीभिरूर्ध्वं करविधृतचतुष्कोणभागाभखण्डैः
खण्डैराढ्या पटानां विधुरविघटिता शुष्कताव्रासयेया।
स्वात्मानाधः पतन्ती सजवमसकृदाकर्षणक्लान्तिपङ्क्ति-
श्वासोद्धासौघपूर्णा हिमगिरिदुहितुः पातु वोऽपूर्वकन्था ॥ २ ॥

आसीद्विरिञ्चिवरदा सुरसार्थतीर्थे
तेजोमयी मखभुजामखिलास्ति शक्तिः।
एवं भविष्यति पुरोऽपि पुरारिपत्नी
त्रैकालिकं यदिति तन्महं आद्यमीडे ॥ ३ ॥

मध्ये पीयूषसिन्धोर्घनकुसुमलसत्कल्पवृक्षान्तराले
दिव्ये मण्यन्तरीपे त्रिदशपरिवृढप्रौढगीर्वाणवर्ण्या।
शर्वाणी पूर्णमण्याभरणरणरणत्पाणिनाभ्यर्णवाणीं
तूर्णं चिन्तामणेर्मामपि सदसि सदाश्लिष्य सिंहासनेऽस्ति ॥ ४ ॥

वन्दारुवृन्दारकसुन्दरीणां सीमन्तभृङ्गाञ्चितपादपद्मा।
संस्तोतृपद्मापतिपद्मजन्मस्मारात्पिकाल्याग्रगुणा विभाति ॥ ५ ॥

यत्रोद्यद्धरिन्मणिप्रविलसत्सौधाङ्कुराणां गणै-
रुद्दीर्णैर्निजगर्भतश्च चणकैः साम्यं गतानां नवैः।
मुक्तानाममृतद्युतेरपि भरं वीक्ष्य स्थितानां हृदि
भ्रान्त्याखू रभसोत्पपात हृदये सारङ्ग एतन्मुधा ॥ ६ ॥

---

१. राधावेणीमाधवयोस्तनूजन्मा सामगोपनामकोऽग्निवंशमुक्तामणिर्दाक्षिणात्यप्रकाण्डं लक्ष्मणाचार्यः सह्याद्रिप्रान्तवर्तिनि वांईसंज्ञके नगर आसीदित्यादि सर्वं प्रकृतनिबन्धस्यैकादशद्वादशत्रयोदशश्लोकैरुपसंहाराच्च व्यक्ततरमास्ते. भाति चायं नवीनः. २. अस्याः पञ्चाशिकाया एकं पुस्तकं राजगुरु-पर्वणीकरोपनामक-भट्टश्रीनारायणशास्त्रिभिः स्वहस्तेन विलिख्य काव्यमालार्थमस्मभ्यं दत्तम्, तदाधारेणैतन्मुद्रणमजनीति तेषां विद्वन्मणीनां महान्तमुपकारमुरीकुर्मः.

पादारविन्दस्य पुरंदरोऽपि सेवां विधातास्म्यहमेव देव्याः ।
नार्हस्त्वमसीति वज्रपाणिर्व्याक्षिप्यते यत्र गणैर्विचित्रम् ॥ ७ ॥

बिडौजसि पदाम्बुजे निबिडतेजसि त्र्यम्बक-
स्त्रियाः प्रणतिमीप्सितप्रतिपदाप्तये निर्जरैः ।
हरावपि हरे विधौ प्रणतिकर्मकार्मीणके
जयाम्ब जगदम्बिके जयजयेति यत्र ध्वनिः ॥ ८ ॥

तत्रैकदा निखिललोकचरित्रविद्भिः
संप्रार्थिता भगवती प्रणिधीनवर्गैः ।
विज्ञाप्यमस्ति किमपीति रहस्यमस्य
दृग्यायिनः कविवरस्य कृतेर्विचित्रम् ॥ ९ ॥

किं कुङ्कुमोऽस्ति कलितामरभोज्यवीची-
सारप्रसारवचसां प्रमुखः कवीनाम् ।
यत्काव्यमन्यकवितां विधुनोति जीर्णां
जायामिवाभिनवमुग्धवधूस्तनश्रीः ॥ १० ॥

अगम्यभरसह्यभूधरमणौ महाराष्ट्रके
महाबलजटाट्यनिष्प्रथितकृष्णवेणी धुनी ।
तदम्बुलहरीप्लुता जयति याज्ञिसंज्ञा पुरी
स लक्ष्मणकवीश्वरो वसति तत्र वृत्त्या स्वया ॥ ११ ॥

वेणीमाधव एव यस्य जनकः प्रख्यातकीर्तिस्तथा
राधा यज्जननी सती गुणवती रामोऽपि यत्सोदरः ।
अत्रिर्गोत्रपुमांश्च यस्य कविता चेतोहरा सामगो-
पाढ्यो यः किल राजते चरणयोर्देव्या भवान्याः स्वयम् ॥ १२ ॥

यस्य गुरवो जातो दण्डकराभिख्यपर्वतान्वयतः ।
रघुनाथमन्दराद्रिर्मथितुं सर्वादिशास्त्रपयसाम्बुधिम् ॥ १३ ॥

स स्वकलापदपद्मप्रस्फुरदमन्दानन्दसन्दोह-
स्यन्दन्मञ्जुमरन्दसुन्दरमधुस्यालोलरोलम्बकः ।

सत्पोतेतरताविनीतवनितासंभोगशून्यः पुन-
र्योऽसौ संप्रति कथ्यते मम गुणप्रौढिप्रबद्धात्मकः ॥ १४

तस्यैव चेत्किमपि काव्यमकव्ययेच्छो-
रस्मत्सभापरिसरे पठनीयमस्ति ।
यन्मत्पदाम्बुजमधुप्रतिषेचनेऽस्य
मृद्वीकयापि न कयापि न मृद्विकासः ॥ १५ ॥

श्रुत्वादेशं दूतवर्गैर्भवान्या न्यासान्धन्यान्वीक्ष्य वाचः कवेस्तान् ।
न्यस्तो मूर्धा स्वामिनीपादपद्मे कर्त्रेत्युक्तं तत्कृतेर्यत्कृतेऽत्र ॥ १६ ।

सावधाना ततो देवी काव्यश्रवणकर्मणि ।
जातेत्यालोच्य सहगवर्गैः काव्यं प्रवर्ण्यते ॥ १७ ॥

यद्यपि पदनुतिरादौ कार्या मातुस्तथापि विश्वस्य ।
मुख्यमिति स्तनपानं लक्ष्मणबालेन तत्स्तुतिर्विहिता ॥ १८ ॥

प्रालेयशैलजनुषः सुहिरण्यवल्या
गौर्याः पयोधरविचित्रफलं पिबामि ।
यत्स्पर्शनादपि बभूव स शूलिनोऽपि
मृत्युंजयत्वविभवैकपदेऽभिषेकः ॥ १९ ॥

कल्याणावलिमातनोतु नितरां कर्पूरपूराधिक-
प्रालेयं तुहिनालिशैलदुहितुस्तुङ्गं तदङ्गं हृदः ।
येनाकारि पुरारिभालनयनज्वालाकरालावली-
वाढोलीढतनुस्तदीयहृदि सोऽनङ्गोऽपि रङ्गे नटः ॥ २० ॥

आजीवं तदुपास्महेऽद्रिदुहितुः कर्पूरगौरं कुच-
द्वन्द्वं नीलगलं सुचन्दनयुतं तत्प्राङ्खेन्द्वङ्कितम् ।
यद्वीक्ष्यैव ममर्द किं नवमिदं जीवत्यदोपे मयि
प्रारूढं शिवयुग्ममन्यदचलाच्छन्मगर्णतीर्ष्यया ॥ २१ ॥

प्रत्यूहावलिमाशुनातु दयया यश्चार्धनारीकुच-
प्रान्तोद्गुप्तपटीरपङ्कमदनीमीनैकमुद्राङ्कुरः ।

यं कृत्वा स्वयमेव मन्मथरिपुः पाणिश्रितस्वेदतो
यातः सात्त्विकतां हि तत्कज इति ध्यात्वा स्मरार्तोऽभवत् २२

शर्वाणीकुचकूलमूलविलसत्कर्पूरकस्तूरिका-
काश्मीरत्रितयावलेपरचनाचातुर्यचर्यावतात् ।
यामुद्दिश्य महेशमानसमहाहंसः प्रयागस्थिता
वेण्येवेत्यवधारयन्निव ममज्जानन्यवृत्तिश्चिरम् ॥ २३ ॥

नित्यं पायादपायाज्जगदिह तु शरच्चन्द्रगौरप्रभासौ
गौर्या वक्षोजयुग्मद्वयशिखरचरत्तारहीरालिमाला ।
चण्ड्या मे नाथचेतोविहरणनिपुणेतीर्ष्यया तत्र बद्धां
गङ्गां निश्चित्य भर्गः करमपि च ददौ यत्पदे मोक्षकामः ॥ २४ ॥

नुमोऽपर्णारामस्थलहृदयकासारतटग-
प्रवल्गद्वक्षोजच्छलमिलितचक्राह्वयुगलम् ।
दरालोकाच्छंभोः शिशिरशशिरेखान्तगता
स्मरन्ती सापत्न्यं व्यथयति नितान्तं यदिह सा ॥ २५ ॥

वन्दे तरकुसुमायुधान्नकवधूतुङ्गस्तनाब्जद्वयं
दुग्धामन्दमरन्दमन्दिरमिदं भूपालिलीदं परम् ।
नित्याम्येन्दुविकासनान्मुकुलितं पङ्कजवक्राम्बुजैः
पीतं किं विगिरीशस्य मनसो येनाभवद्विस्मयः ॥ २६ ॥

मल्लीसवफणिभोगभूषणमणिश्रेणीविदूरोल्लस-
न्मैनाकाचलसोदरी कुचरसाधारद्वयी मञ्जुला ।
यस्याः स्पर्शनतस्त्रिलोचनमनोमानव्यपायोऽभव-
त्सा यात्वा निखिलं हि निष्फलतां संसारसन्तानिताम् २७

तुषारगिरिकन्यकाकुचतटीपटीरावटी-
विपाटयतु षट्टोद्भवकठोरतापं हि सा ।
यदीयदरदर्शनादपि गतस्मृतिर्वो हरः
सुरेश मनसा रति स्मरारिपुरंहोऽप्यः शिवः ॥ २८ ॥

रचयतु शिवं वक्षोजन्मद्वयं द्रुहिणोज्ज्वल-
त्कनककलशत्विड्वीजं तन्निशुम्भरिपोश्चिरम् ।
तदपि च मुहुर्दर्शे दर्शे कपालिकरोच्छ्रित-
प्रखरनखरप्राञ्चचन्द्रोदयोऽपि भवत्यहो ॥ २९

दूरीकरोतु दुरितानि पुरारिदार-
वक्षोजशैलमिथुनं जितमन्दराद्रि ।
येनाभवद्भवमनोऽर्णवतः प्रमोद-
पीयूषमत्र हुतमन्मथजीवनाय ॥ ३० ॥

अपारां संपत्तिं दिशतु कुचरत्नक्षितिधरः
समुत्तुङ्गस्थानं सुमनस उमे ते मम चिरम् ।
यदीये मूर्ध्नि श्रीगलकरनखालिद्युतिभर-
स्फुरद्गङ्गाभङ्गा इह हि विहरन्त्येव सततम् ॥ ३१ ॥

तं कासरासुरविमर्दसमुत्थशोण-
शोणार्द्रशोणितकणं स्तनमम्बिकायाः ।
वन्देऽमरेन्द्रकरिणः कृतशिल्पचित्रं
यच्चुंमुहुश्चपि कटं स्मरणीयमूव ॥ ३२ ॥

उद्दामद्विपकुम्भदर्पदमनं प्रालेयशैलात्मजा-
वक्षोजद्वयमत्र भद्रमनिशं धत्तां ममामाहृतम् ।
यच्छ्रीकण्ठकठोरकोटिनखरश्रेणीगुणनिस्यन्दन-
मदोव····धुमाजनं गमभवत्पुत्रागुणापोषणे ॥ ३३ ॥
गीर्वाणीचल्गानुमर्दिनि [illegible] भवान्याः स्तनः
[illegible] ।
[illegible]
[illegible] ॥ ३४ ॥
[illegible]
[illegible] ।

यद्भोगैकदृशः पिशाचनृपतेर्वक्षःस्थले जाग्रती
चित्रा कापि विसंस्थुला नमत तत्कण्डूरखण्डाभवत् ॥ ३५ ॥

दिग्दन्तावलकुम्भमौक्तिकमणिश्रेणीकमेणीदृशः
शर्वाण्याः कुचगुच्छयुग्ममवतात्संसारतापाद्भुतम् ।
यस्योपान्तसमुत्पतत्पशुपतिव्यालोलसाभिस्फुर-
ल्लीलापाङ्गतरङ्गभृङ्गयुगलैः शृङ्गाररङ्गायितम्(?) ॥ ३६ ॥

स्मरारातेः स्वान्तप्रकटकुमुदं मोदयति यो
दृढाकामप्यस्मद्दहननयनाब्जं मुकुलयन् ।
दधत्पूर्वं लक्ष्म प्रकटयति चक्राह्वयुगलं
निदग्ध्वद्रेः कन्याकुचविधुरपध्वान्तपटलीम् ॥ ३७ ॥

प्रालेयाचलकन्यकाकुचतटीपाटीरमोद्दायितां
पापाटोपकठोरकण्ठपटलान्याशाटयन्ती शुभ ।
यत्रापीनपिनाकपाणिकठिनोरःपीठकण्ठोत्कट-
व्यालालीवलयावलेख्यमकरोदालिङ्गनेऽन्योन्यतः ॥ ३८ ॥

मातः पर्यनिवाद्ये गुरुपुरोयानान्तरालोलस
त्कुजन्यप्रसवासवावरसधगुञ्जत्तोजकोपद्रवम् ।
यस्यान्तः परमेश्वरस्य करतः शोमर्दनव्यापृतौ
मतिः संक्षरति क्षपापरिवृढार्धमिन्दवचूडामणेः ॥ ३९ ॥

परिपीमरिते शुचमालौ गजिकान्तिगुनदीनगःस्थलेषु ।
शिवपाणिनखेन्दुगण्डली निजमौलौ विनिधाय का स्थिता ॥ ४० ॥

गोधरौ त्रिजगनागारम्भकुम्भौ शुभौ
[illegible] [illegible]क्षो शम्भदर्शं भद्रे ।
यहै

[illegible]दे विरह् । ४१ ।
[illegible]
[illegible] हे [illegible]

[illegible]
[illegible] ॥
[illegible]
[illegible] ।
[illegible]
[illegible] ॥ ४३ ॥
[illegible]
[illegible] ।
[illegible]
[illegible] ॥ ४४ ॥
मनोज्ञौ शैलाभ [illegible]
दधीचिका [illegible] ।
महादि[illegible]
यथा [illegible] शैलनिभौ ॥ ४५ ॥
उदयन्तौ मानसार कुचहरौ हरित्रिसा-
रुरक्तानां ताभ्यां निग्रहदन्तीसीमनिहिताम् ।
निहत्य नःशेनीनरदुरधिरोहदिशपति
प्रकुर्वाणौ मुक्तावलिमयमिदं यौ त्रिभुवनम् ॥ ४६ ॥
तमेगौ यशोजौ वृजिनहरणौ दिव्यहरिणा-
यहं ध्याये मातर्दितिजवृणरादयचरवरौ ।
विरूपाक्षसान्तोपयनवरयाभा चिरतरं
ययोरस्ति साराभिधशबरधाटीव्यतिकरे ॥ ४७ ॥
इदं कूर्पासेन प्रतिपिहितमुर्वीधरसुते
भवानि त्वद्वक्षोरुहयुगलमीडे तदनिशम् ।
सरन्तं वैरं तं सरमपरमासाद्य सुहृदं
स्थितं संलीयेति व्यथयति हरो यत्पटगृहे ॥

वक्षस्तटक्षुवरसंस्थमुमे कुचं ते
तं नीलकण्ठपरिलिङ्गितभोगमीडे।
यत्रेश्वरस्य मनसस्तव रूपमेवे-
त्याकल्पकल्पनमभूत्प्रविलोकनेन॥ ४९॥

घनं वक्षोजं ते नव[न]वहिरण्याकृतिधरं
नुमस्तं प्रह्लादावलिजनकमद्रीश्वरसुते।
यदीयाभोगेऽस्मिन्ननुपमनखालिव्रणततिः
स्फुरत्याकल्पं श्रीगलकपटकण्ठीरवकरैः॥ ५०॥

वर्धिष्णुर्बलिमस्तकस्थितपदो वक्षःकृतश्रीः सुखं
कुर्यात्तुहिनावनीधरसुते वक्षोजविष्णुस्तव।
विष्णुः शंभुहृदीति वाक्यममलं सत्यं विधातुं स्वयं
यस्तूर्णं कृतसंस्थितिर्विजयते तस्यैव हृन्मन्दिरे॥ ५१॥

मनस्तिमिरशान्तये प्रतिपदं कुचार्कद्वयं
भवानि तव चिन्त्यते हृदयदेववर्त्मस्थितम्।
विकासयति संततं शिवमनःसरोजं परं
यदेव दिवसे कथं व्यथयतीह कोकानहो॥ ५२॥

स्मरान्तकवल्लभे तव पयोधरश्रीफल-
द्वयं स्मरति यो जनः स भवतीह सच्छ्रीफलः।
इतीव किल बोधयन्स्मृतभवत्कुचश्रीः स्वयं
समुद्रमथने पपावपि गरं हरः श्रीफलः॥ ५३॥

[illegible] कुचद्वयी तुहिनशैलबाले हर-
[illegible]मे नृभिः कैरपि।
[illegible]शिरोविभेदोद्भवं
[illegible]लिवः कपाली ध्रुवम्॥ ५४॥
[illegible] वर्धयत्येव [illegible]
[illegible]

नदीशाभिः कपर्दी भगणपरिवृतो भेल्लभृधिः कपाली
सोऽपि श्रीमान्विचित्रं सपदि च जगतामीश्वरोऽभूत्सुखेन ॥ ५५

वक्षःस्थं दितिजरिपोस्तवाभिवन्दे
तारुण्योदधिजमुरोजकौस्तुभं तम् ।
यत्स्थाने स्तनजनकं महो हि किंचि-
त्संमोहं सपदि महेशितुश्चकार ॥ ५६ ॥

तारुण्याम्भोधिजन्मा दलितनुमकरः कामदसे सकामं
कामं यच्छत्वपर्णे पृथुहृदयजनुः पारिजातद्रुजातः ।
दैत्यमातातपाः पदगतजगतीं छायया स्वे रसौघे
रक्षंस्तृप्तिं च कुर्वन्भवहृदयमहानन्दने नन्दते यः ॥ ५७ ॥

मातः सान्यमधु स्तनस्तमनघं यच्छत्वजस्रं तव
मौढोल्लासमखण्डितं पशुजनुःपाशच्छिदं सुन्दरि ।
यत्पानं गणपे मकुर्वति शिशौ चेतोदृशौ पश्यतः
शंभोर्मुग्धममूद्भूवतुरहो व्याघूर्णिते च क्षणात् ॥ ५८ ॥

शैलेलापालबाले नुम इह विबुधप्राणजीवातुमूर्तिं
क्षीरोदन्वत्प्रभूतं भवगदहमुरोजन्मधन्वन्तरिं ते ।
यस्योपास्तिप्रभावात्पितृगहनगतो वासुकिं कालकूटं
कण्ठे बिभ्रच्च शूली नयनगहुतभुक्सोऽपि मृत्युंजयोऽभूत् ॥ ५९ ॥

चञ्चन्नीलाभचोलीसलिलदपटलीलीनमम्लानमाला-
लोलाल्पाङ्कं दधानं धरणिधरसुते नौमि ते तं कुचेन्दुम् ।
यस्यालोकैर्विनिद्रं भवति भवमनःकैरवं हर्षितं च
क्षीरासारामृतौघं रसवदनमुखैः पातुकामैश्चकोरैः ॥ ६० ॥

क्षीराशसंसकलकामदमावके ते
वक्षोजनुः सुरभिरूपमकं निहन्त ।
यत्पातृषण्मुखगजास्यहरीन्द्रमुख्या
वत्सा रसस्थरसनावसनैर्विरेजु

विचित्रालेखाढ्यं समरदसुचातुर्यकलितं
दधे मातस्तं ते हृदि हृदयजैरावणमहम् ।
यदीयाद्यद्रोमावलिकपटशुण्डा शिवमनः-
सरोजं तच्चक्षुः सरसि परिविश्यैव हरति ॥ ६२ ॥

भगवति तव वक्षोजन्मरम्भास्वरूपं
शुकहृदि सुफलस्य भ्रान्तिदं दर्शनेन ।
दिशतु मम शिवं तन्नृत्यतीशस्य चेतः
कमलमिव सुधर्मा दिव्यदेशे चिरं यत् ॥ ६३ ॥

उदग्रग्रीवं तेऽविरलमसृणं नौमि गिरिजे
सुवृत्तं हीरोचन्मणिरुचमुरोजेन्द्रतुरगम् ।
पयः पातुं श्लिष्टद्विरदमुखषड्ढक्रवदना-
न्यपश्यत्तस्येशो गणपतिपिता यत्र सहसा ॥ ६४ ॥

दितिजजनविनाशकं नमस्ते भगवति कुचकूटकालकूटम् ।
यदिह हृदि हरस्य कण्ठलग्नं किमिति मदन्यदितीर्ष्ययावतस्थे ॥ ६५ ॥

कर्पूरकुङ्कुमसुनाभिजचित्रलेखं
मन्ये कुचं वलयितं जननीन्द्रचापम् ।
यस्योद्भवे स्मररिपोः प्रववर्ष शंभो-
रानन्दजाश्रुसलिलं नयनाम्बुवाहः ॥ ६६ ॥

शर्वाणि ते तरुणिमोद्गमसिन्धुजातं
मन्ये कुचं दरमहं वृजिनावलिघ्नम् ।
यं कुर्वतो निजकरे शशिशेखरस्य
जातः सरैकजनकत्वपदेऽभिषेकः ॥ ६७ ॥

धराधरसुते सुतत्रिदशपेयमाशास्महे
तव स्तनजनुःसुधारसमसारसंसारहम् ।
स्मरामि नयनोज्ज्वलज्ज्वलनजालदग्धोऽप्यसा-
वनङ्ग इह यत्पदे कृतपदेन संजीवितः ॥ ६८ ॥

अलमलममलोहैः श्लोकजालैः कवेस्तै-
र्यदिदमखिलमेतैः क्रीतमेवासदीयम्।
पुनरपि यदि चैवं वर्ण्यते तर्ह्यहं स्यां
तदपि भवतु चेत्किं पारितोषीयमस्य ॥ ६९ ॥

इत्याकर्ण्य वचो विचार्य च चमत्काराञ्चितं चेतसि
श्रीदेव्याश्चकिताः प्रभोः प्रणिधयश्चक्रुस्तथा तैः परम्।
भूयः किंचिदुदञ्चितस्तबकया वाचेदमन्विष्यते
यच्चोक्तं किल पारितोषिकमिति स्यात्किं तदुक्तं वद ॥ ७० ॥

स्तोत्रं गृहीतमनघं स्तनपाललक्ष्म्या
शुल्कं मदीयमखिलं हि मयास्य दत्वा।
शिष्टाहमस्मि मदभेदमनर्घमेतं
दास्यामि तस्य परितोषणिकं सुखेन ॥ ७१ ॥

एतदेव कविराजमानसे काङ्क्षितं लसति संततं किलम् ॥ ७२ ॥

अन्यदेकमपि दीयते स्वतः श्रूयतामनुचरेश्वराः स्फुट
इति स्तनघटस्तवं पठति यस्तु चण्ड्या मम
प्रसन्नहृदयः प्रियो भवति मे सदा सूनुवत्।
कविर्भवति भूमिपस्तुतवचःप्रपञ्चः क्षितौ
लभेत किल वाञ्छितं सहृदि सुन्दरीणां स्मरः ॥ ७३ ॥

मदीयचरणाम्बुजे भवति भक्तिभाजां प्रभुः
क्षितीशमुकुटस्थितप्रसवपूज्यपादाम्बुजः।
अनेकनवपद्मिनीस्तनगिरीन्द्रकान्तिच्छटा-
जटालहृदयान्तरो(रः) [सद]सि संस्थितो राजते ॥ ७४ ॥

यः श्रद्धया मम घनस्तनकुम्भलक्ष्म्याः
स्तोत्रं पठेत(?) किल संशृणुयात्सलोकः
गीर्वाणवामनयनानयनारविन्द-
सद्मभासरणिकज्जलतामुपैति ॥ ७५

पृथिव्यां भूपालो भवति नववामोरुनयन-
प्रफुल्लाम्भोजन्मद्युमणिरपि वाचा सुरगुरुः ।
निरस्तप्रोच्चण्डाखिलरिपुगणो मत्कुचतटी-
स्तवं कुर्वन्नित्यं जयति निजलक्ष्म्यापि धनदम् ॥ ७६ ॥

यश्चित्ते मम कुचसंस्तवं दधाति
प्रावीण्यं सकलकलासु सोऽयमेति ।
आम्नायस्मरणमपीह मामकीने
पादाम्भोरुहयुगले लभेत भक्तिम् ॥ ७७ ॥

रमापि सदने सदा कृतपदा मुदा दासव-
द्रिपुर्भवति मित्रवद्युवतिसंगमो मोक्षवत् ।
अवागपि कवीशवद्भवति पातकं पुण्यव-
द्यशोभिरमला दिशो दश भवन्ति यस्तं पठेत् ॥ ७८ ॥

चण्डीकुचपञ्चाशत्संज्ञमिमं यः स्तवं नवं पठति ।
स नरो न पुनर्जनुषे भवति हि निःश्रेयसाय मे दयया ॥ ७९ ॥

तथास्तु किल तत्परं तव जयन्तु मातः प्रभो
पदाम्बुजमधुच्छदाः कविवरस्य मौलौ वरम् ।
यतो हि कवितामृतं पिबति यः स मुक्तः श्रुत-
स्ततः स भविता न किं जगति मुक्तिकान्तापतिः ॥ ८० ॥

इत्युक्तवत्यनुचरेन्द्रगणे पुरस्ता-
दम्बापदाम्बुजनुषो(जनिता) मकरन्दधारा ।
या स्यन्दिता शिरसि मे कविलक्ष्मणस्य
स्मेरोत्थितस्य तु पुनातु पुनस्त्रिलोकीम् ॥ ८१ ॥

यावच्छिवार्धगतमस्ति वपुस्त्वदीयं
यावत्त्वदङ्घ्रिकमलं च पुनाति विश्वम् ।
तावत्तवाम्ब चरणाम्बुजयोर्निपत्य
माचाम्यहं(महे)निशमपि यः शयनोत्थितस्त्वाम् ॥ ८२ ॥

[illegible]
[illegible] ।
[illegible]
[illegible] ॥ ८१ ॥

[illegible]
[illegible] ॥

श्रीविद्यावागीशकविविरचितं
फौन्सेपवृत्तम् ।

प्रथमः सर्गः ।

दिक्पुरस्तां निकषा हिमाचलं चकास्ति शैलः किल गन्धमादनः ।
अन्वर्थमुद्रां निजनाम्नि योऽनयत्प्रसूनसंपत्तिविसारिसौरभैः ॥ १ ॥
सिञ्चन्ति चेतः सुखवृष्टिधारया यत्कन्दराभ्यन्तरवासिनश्चिरम् ।
मुञ्चन्ति किं चानुचिताः सनातनीं निरन्वयं बन्धनवासनाः सैमाः ॥२॥
सदा सदारैरनुदारमानसैर्मुदा यदारामविहारसादरैः ।
रैनादनालोकितभानुभानुभिर्विद्याधराद्यैरतिनीयते तपः ॥ ३ ॥
गाढं परिष्वज्य रसार्द्रसुन्दरीरासां पिबन्तो रदनच्छदामृतम् ।
हिमागमे यत्र हि मायता दरीरध्यासते धन्यतरा निरन्तरम् ॥ ४ ॥
अधिश्रयन्तो यदधित्यकावनं न शाखिनः किं परिणाहशालिनः ।
करम्बितास्तारकमौक्तिकश्रिया स्फुरन्ति नित्यं निशि पुष्पिता इव ॥५॥
शृङ्गाणि यस्मिन्निशि भान्त्यनारतं विचित्ररत्नप्रचुराणि कानिचित् ।
विसृत्वरैरूर्ध्वमुखं मरीचिभिः किर्मीरयन्त्यन्तिकतारकागणम् ॥ ६ ॥

---

१. अस्य श्रीविद्यावागीशकवेर्देशकालौ न ज्ञायेते, परंतु समाप्तिलेखे 'माधवभट्टतनय' 'भट्टाचार्य' इति त्रुटिपूरणस्योपलभ्यमानत्वेन भट्टाचार्यपदस्य वङ्गेषु प्रसिद्धत्वेन वङ्गदेशः कदापि भवेत्. मातापितरौ तु सर्गसमाप्तौ 'रमामाधवौ' स्वयमेव स्तवीति. २. अस्य काव्यस्य पुस्तकमेकमेव शुद्धप्रायं सप्तपत्रात्मकं प्राचीनं श्रीकृष्णचन्द्रभट्टैः काव्यमालार्थं प्रत्तमिति तेषामुपकारवर्णनेऽशक्तास्तांश्चिरायुष्ट्वाशिषा योजयाम. ३. सर्वा [illegible]. ४. सदा इत्यर्थः.

यत्रोस्त किंचित्पुरुपायितश्रमास्तल्पान्तमध्यास्य शरन्निशान्तरे ।
सलीलमिन्दावरविन्दनालकैः पिबन्ति पीयूपरसं सुराङ्गनाः ॥ ७ ॥
प्रभिन्नसप्तच्छदगन्धिभिर्मदैर्निरस्तविन्यस्तपदैरपि क्रमात् ।
यस्मिन्मदान्धद्विपदर्शनोत्सुका मार्गे मृगेन्द्रा मृगयन्ति मानिनः ॥ ८ ॥
पञ्चापि पार्थास्तु विना धनंजयं पञ्चालभूपालजया जेयान्विताः ।
तीर्थाश्रमारामगतिप्रसङ्गतो गिरीन्द्रमेनं समया समाययुः ॥ ९ ॥
संभेदमुन्नादतरं तरङ्गिणं वनानि मञ्जून्यवनानि मैत्रयोः ।
निरूपयन्तस्तदुपत्यकासु ते सुतेजसस्तत्र विचेरुरश्रमाः ॥ १० ॥
विचित्रधातुद्रवनिर्झरस्फुरन्नानामणीनिर्मितरामणीयकम् ।
अन्तर्विलोकोत्कलिकासमाकुलैस्तद्धर्मराजादिभिरारुरुक्षितम् ॥ ११ ॥
अथैकमत्या मिलिता जितश्रमाः प्रपातभागानपहाय ते समान् ।
अकृत्रिमेणैव गतागताध्वना नगं तमारोढुमुपोपचक्रमुः ॥ १२ ॥
अथाञ्जसा स्वेदपृषन्तिसंततिं मुक्तामणिश्रेणिमिवातिमञ्जुलाम् ।
शिरीषमृद्वी स्तनभारमन्थरा बभार मालाभरणं नितम्बिनी ॥ १३ ॥
सवरसुधे वक्रविधौ तथाविधे चलाचले श्वासवलादुरःस्थले ।
सकम्पयोः किं च तदूरुदण्डयोर्मृदुश्रियोः शोणपदारविन्दयोः ।
समाधिमन्तः स्तिमितातिकातराः पेतुश्चतुर्णां मनुणा दृगंशवः ॥ १४ ॥
विलासिनीनामिव चारुचीरुधामथाङ्गहारानुपशिक्षयन्निव ।
वनाधिदेव्या मृदुचञ्चलीकृतात्किं तालवृन्तादुपलम्भमागतः ॥ १५ ॥
समीरणः शीकरसारमुद्गिरन्परागसङ्गी मकरन्दमेदुरः ।
आनन्दयामास नितम्बिनीमिमां विश्रान्तिमेतेऽपि वितेरुरन्तरा ॥१६॥
तथानुकुर्वन्ननुरागसागरः ।
गाम यामेन समं सहोदरैः ॥ १७ ॥

...ः, अश्वयोनिरश्वा वा.
...ः ५. अन्यत्र सार्वभौम-

विधूनयद्भिस्तिमितांबुजरुहाण्यिहंगमैरन्तिकतो निवेदितम् ।
अन्विष्य तस्यां विमलापमाप सा सुधारसं पद्मवती सरोवरम् ॥ १८

अतिप्रकाशेन तलावलम्बिनीं विलोकमानेन फणामणीयसीम् ।
तटस्थलीमाश्रयताप्यनाविलं क्षणं न साक्षात्क्रियते यदम्भसा ॥ १९

अजस्रचक्षुःप्रसरावरोधिनो निपातभृङ्गीवदनावलम्बिनः ।
चकासतः स्फाटिकपट्टकस्य यत्तुलामुपास्ते चतुरस्रताभृतः ॥ २० ॥

समस्तमन्तर्गतमस्तसंशयं निवेदयदुल्लसितप्रभाप्रभम् ।
जानाति मन्ये जनता सरस्तया समीरणान्दोलितसंवरेण यत् ॥ २१

विराजिकादम्बनितम्बिनीगिरं रथाङ्गनारीरतिकेलिमन्दिरम् ।
पयोरुहस्तोमतिरोहितान्तरं तदन्तिके भाति परं सरोऽन्तरम् ॥ २२

नितान्तदीव्यत्कलहंसकध्वनिः प्रतीकचयन्नुपुरोर्जुनोर्मिका ।
मनोहरन्ती रुचिरेव पद्मिनी रसोत्तरेयं सरसी विराजते ॥ २३ ॥

सदारविन्दद्युतिहंसरोहिता [illegible] ।
निम्नगसोपानविस्मृतिभ्रमा कादम्बिनी सा [illegible] विभ्रमः ॥२४॥

[illegible] ।
[illegible] ॥ २५ ॥

[illegible] ।
[illegible] ॥ २६ ॥

[illegible] ।
[illegible] ॥ २७ ॥

[illegible] ।
[illegible] ॥ २८ ॥ (युग्मम्)

अथो मृणालानि मृदूनि कानिचिन्मरन्दसाराणि सरोरुहाणि च ।
आदाय मध्येऽह्नि विश्रमाय ते निषेदुरध्यासितसाधुवेदिकाः ॥ ३० ॥
आहर्तुकामो विहितेन हेतुना समानुमत्याचरसं रसोचरम् ।
भव्ये मृगव्ये विनिधाय मानसं जगाम जह्नालतयार्जुनाग्रजः ॥ ३१ ॥
महीरुहच्छायमदभ्रमाश्रितं युवानमेकं तृणतृप्तमंसलम् ।
सकृष्णसारं शरपातसंमितां महीमतीत्य स्थितिमन्तमैक्षत ॥ ३२ ॥
स यावदिष्वासनिषङ्गसङ्गिनं विभाव्य भीमं वलते पलायितुम् ।
संधाय बाणं पवमाननन्दनो जगाम तावत्तदुपान्तिके जवात् ॥ ३३ ॥
प्रस्कन्दमानं वसुहस्तपातिनं पश्यन्तमत्यन्तमधीरया दृशा ।
आलक्ष्यलक्ष्यं चलमेनमञ्जसा बिभेद भीमो निशितेन पत्रिणा ॥ ३४ ॥
तेने ततस्तेन तदेतदद्भुतं गुणावतंसेन विसारि सौरभम् ।
विचित्रचेतोहरमाधुरीभरं करम्बितं नूनमनूनतेमनैः ॥ ३५ ॥
विभज्य भोज्यं मृदुमेदुरोज्ज्वले शिलातले वल्लभयोपकल्पितम् ।
आस्वाद्य सर्वेऽपि विधाय विश्रमं विहारकासारमुपेयुरुत्सुकाः ॥ ३६ ॥
यथोचितं तान्यवचित्य कौतुकाददूरपद्माकरवारिजानि ते ।
प्रसन्नवारिण्यवसन्निपद्वरे सरोवरे चिक्षिपिरे विलासिनः ॥ ३७ ॥
तस्मिन्भवं ते भजमानमञ्जसा योगेन पद्माकरनामधेयताम् ।
आश्लेषलेशादपि तापभञ्जनं शनैः शनैरेव सरो जगाहिरे ॥ ३८ ॥
पयोभिरुच्चैः करतालचालितैः पाणिद्वयीयन्त्रविनिर्गतैरपि ।
तौ सारसासारसिकेलिसंगरं जायापती विभ्रमतो वितेनतुः ॥ ३९ ॥
तदा रसार्द्रेण हृदा कृतादरावनेकजातीयजलादिकेलिषु ।
श्रियं दधानौ रतिपञ्चबाणयोर्जगन्ति जाने जयतः स्म जम्पती ॥ ४० ॥
तत्रारविन्दच्छदभाजि वक्षसा भुजक्षिपाभिश्चरणप्रचारणैः ।
निमग्नभङ्ग्या शयनीयशीलनैस्तैरुः फलाकौशलकल्पनैरमी ॥ ४१ ॥
निर्गम्य तस्मात्सरसो रसोत्तरास्ताम्रारविन्दच्छदचारुचक्षुषः ।
आयासनिश्वाससमीरसंगमैरभ्यासमामोदमयं विधायिनः ॥ ४२ ॥

१. अंसलं पुष्टम्.

दर्पावगाहोद्भवदेहलाघवाः खेलासमारम्भनिबद्धमध्यमाः।
विश्रामकामां दयितामपीदृशीं निपीयमानाः सुदृशं विशश्रमुः॥ ४३
मुदं दधानेन तपानुबन्धिना दिनेन तेनेत्यमुदित्वरश्रियम्।
सीमानमुल्लङ्घ्य निसर्गनिर्मितां पराबभूवे कतमो न वासरः॥ ४४॥
चित्रार्चिषो रोचिरुदञ्चयन्करैः संकोचयन्कंचन भानुसंचयम्।
अचण्डचञ्चद्दुचियुग्विरोचनश्चुचुम्ब चूलं किल पश्चिमाचलम्॥ ४५
आसन्नविश्लेषमलीमसश्रियां विश्वासमाधातुमिहाम्बुजन्मनाम्।
समाचरन्सत्यमिवात्मसंगमे दधार मध्येऽग्नि करं स रागवान्॥ ४६
दिवाधिकारादपनिद्रपद्मया जगन्ति संतोष्य चरत्करश्रिया।
दैवादियं संकुचतीति भावयन्नदृश्यतां नूनममन्यतोचिताम्॥ ४७॥
जपावसाने जगतीविलोचनं बद्धा विवस्वन्तमुपासितुं मुदा।
काले तदा कुड्मलदम्बुजन्मनां (तां) दधुस्तला(मा)मञ्जलयो द्विजन्मनाम्
निर्गम्य माहेन्द्रमहीध्रकंदरादुद्दामभास्वन्मणिमौलिमञ्जुना।
निपीतकिंचित्पयसा पयोनिधौ न्यमज्ज्यताहीनदिनेन पश्चिमे॥ ४९॥
प्रसादयन्निर्भरमम्बरस्पृशा करेण माहेन्द्रदिगङ्गनामुखम्।
ततश्चिरोत्कण्ठचकोरचक्षुषामासेचनश्चारु चचार चन्द्रमाः॥ ५०॥
ततः प्रसन्नामुदिते कलानिधौ कुमुद्वतीं योषितमात्ममन्दिरात्।
पद्मासना सत्वरमेत्य संमुखी शृङ्गारयामास मुदेव नन्दिनी॥ ५१॥
श्रीसंनिधानत्रपया तया समं न प्राप साक्षात्परिरम्भसंभ्रमम्।
प्रभाभिरेनां परिरभ्य निर्भरं प्रमोदयामास परं कलानिधिः॥ ५२॥
नीलैकभागं तदखण्डमण्डलं प्राकल्पि लोकैः किल शुक्तिसंपुटम्।
गलन्ति यत्तारकवृन्दकैतवात्समौक्तिकानीति गृहीतयुक्तिभिः॥ ५३॥
ते कौमुदीसंगतचन्द्रकान्तस्रवत्सुधानिर्झरमञ्जुनादम्।
निपीयमानाः किल कीरकण्ठीमालापयन्तो मधुरेति हान्तः॥ ५४॥
यामान्तरोज्जृम्भितवक्त्रचन्द्राः प्रमीलदम्भोरुहचारुनेत्राः।
तयापि तादृग्विधया समेतास्तिरस्कृतोयद्रतिकामदर्पाः॥ ५५॥

१. चित्रार्चिषो वह्नेः

मन्दं वहत्युत्पलगन्धवाहे समन्ततश्चन्दनकाननान्तः ।
शिलामिलत्पल्लवतूलिकायां निद्रामवापुः प्रमदार्द्रचित्ताः ॥ ५६ ॥
गोपीकान्तपदारविन्दयुगलीरोलम्बशीलान्तरौ
यं मातापितरौ हितोन्नतिपरौ श्रीमद्रमामाधवौ ।
स्निग्धाशीर्भिरपुष्यतां मधुभिदो भृत्येन तेनाहिते
काव्येऽस्मिन्प्रमदाङ्कवत्यवसितः सर्गोऽयमौपक्रमः ॥ ५७ ॥

इति श्रीविद्यावागीशकृतौ कौन्तेयवृत्ताभिधाने काव्ये स्नेहविहारो नाम प्रथमः सर्गः ।

द्वितीयः सर्गः ।

अथ सुप्तोत्थितानेतानसेवत समीरणः ।
कह्लारसारसुरभिर्धीरो नीरेणुरौत्तरः ॥ १ ॥
तदीयसौरभभरैरुत्तरोत्तरपीवरैः ।
अनाघ्रातचरैस्तेषामञ्जसा हृतचेतसाम् ॥ २ ॥
आनन्दोच्छ्वसदङ्गानां दर्शनोत्कलिकावताम् ।
विषयान्तरसंचारं मनागपि न बिभ्रताम् ॥ ३ ॥
दत्तसादरदृष्टीनामुत्तरायतवर्त्मनि ।
कथंचित्सहमानानां तदालोकविलम्बनम् ॥ ४ ॥
कियतापि क्षणेनेदमभून्नयनगोचरः ।
अभ्यासमेप्यदानीतमनुकूलेन वायुना ॥ ५ ॥ (पञ्चभिः कलापकम्)
जघनाभोगभारेण मत्तवारणगामिनी ।
मनोरथेनाभिययौ द्रुतं द्रुपदनन्दिनी ॥ ६ ॥
उत्पक्ष्मणैकलक्षेण चक्षुषा वीक्षमाणया ।
करद्वये तदूर्ध्वाग्रे जगृहे महदेतया ॥ ७ ॥
सौगन्धिकमदो रेजे तन्वङ्ग्या करधारितम् ।
विकासिनीव राजीवे स्मेरं सरसिजान्तरम् ॥ ८ ॥
प्रकृत्या पुण्डरीकेण सदृशं पाणिपल्लवे ।
धार्यमाणमिदं सद्यो दधे कोकनदद्युतिम् ॥ ९ ॥
तन्मुखाम्भोजकह्लारमन्तरा दग्द्युतिच्छटा ।
रेजे द्विरेफराजीव राजीवद्वयसंगता ॥ १० ॥

अथ प्रतस्थे परितः पादपान्प्रक्षिपन्पदा ।
पार्थः पन्थानमपथे प्रथयन्पवनोपमः ॥ २४ ॥
कियद्दूरमतिक्रम्य स दूरस्तनिताकृतिम् ।
निरुध्य सरणिं सन्तं हनुमन्तमलोकत ॥ २५ ॥
मुञ्च पन्थानमित्युक्तो नाहं चलितुमुत्सहे ।
त्वमेव मामितः क्षिप्रं क्षिपेति छद्मनाब्रवीत् ॥ २६ ॥
गिरं गृहीत्वा भूतार्थां यत्नैः क्रमविवर्धितैः ।
मनागपि स्पन्दयितुं न क्षमः प्रणनाम तम् ॥ २७ ॥
गम्भीरकरुणाम्भोधेः प्रकाशितनिजाकृतेः ।
तस्माद्विदितवृत्तान्तः श्रीदपद्माकरं ययौ ॥ २८ ॥
अन्तरायतया प्राप्ता यक्षा रक्षाधिकारिण ।
क्षणेन भीमसेनस्य गदया विफलीकृता ॥ २९ ॥
तमुपद्रवमाकर्ण्य धनदः प्राहिणोन्मुहुः ।
कटकं नमहो भीममरत्पृण्यामिवाक्षिपत् ॥ ३० ॥
अथ [illegible]गुपायातः कुबेरः परिचिन्त्य तम् ।
पूजयामास संपत्त्या तत्कार्यं चान्वमन्यत ॥ ३१ ॥
अथ[illegible](स)रसादधिगम्य प्रसादितान् ।
सौगन्धिकान्युपादाय यथेष्टमथ सोऽभ्ययात् ॥ ३२ ॥
ततस्तेन समागम्य प्रयान्ते पाण्डुनन्दनाः ।
पाञ्चाली प्रमदं पूर्णमवापुः [illegible] ॥ ३३ ॥
गोपीकान्तपदारविन्दयुगलीरोलम्बलीलान्तरौ
यं मातापितरौ [illegible] श्रीमद्[illegible] ।
[illegible]निरुपुष्पितं [illegible] [illegible] [illegible]
[illegible] सर्गो द्वितीय [illegible] ॥ ३३ ।
[illegible] ।
[illegible] काव्यम् ।

श्रीमदुत्प्रेक्षावल्लभकविरचितं

सुन्दरीशतकम्।

जयति विलासवतीनां नेत्रभ्रान्तावलोकनप्राणः।
वदनेन्दुद्युतिसदनः सितमाध्वीमेदुरो मदनः ॥ १ ॥
सहृदयहृदयग्राह्यं मदनमहीपालशासनादेव।
विरचयति सुन्दरीशतमुत्प्रेक्षावल्लभः सुकविः ॥ २ ॥
चन्द्राधिकरुचयोऽपि क्षालनशुचयोऽपि चन्द्रकान्तेन।
सुन्दरि तव नखमणयो न नयो यत्तापयन्ति मनः ॥ ३ ॥
वरवर्णिनि तव चरणौ कस्य न हृदयानुरञ्जनं कुरुतः।
परमेष्ठिनोऽतिनिष्ठुरपाणितलस्पर्शतस्ताम्रौ ॥ ४ ॥
सुन्दरि जङ्घायुगमिदमुपासनस्तम्भविभ्रमं धत्ते।
इषुभिरतनोर्मनो मे विद्धं यल्लग्नमात्रमिह ॥ ५ ॥
सुन्दरि काञ्चनकदली कर्पूरोत्पत्तिशालिनीत्यनया।
चन्द्रोद्वर्तनसुरभिस्तवोरुरुपमीयते कविभिः ॥ ६ ॥
विपरीतरतसमुद्यमपुलकप्रथमानमांसलाभोगम्।
सुरतसुखैकनिधानं सुन्दरि जघनस्थलं जयति ॥ ७ ॥
वलिभिर्बन्धमकस्मादुपेत्य मध्यस्तनूभवत्यस्याः।
आनन्दीति नितम्बः समुन्नतिं निर्भरं धत्ते ॥ ८ ॥
अम्बरचुम्बिनमेनं नितम्बमधिरुह्य मुग्धनयनायाः।
दूरात्पदयति यूनां मनांसि पाटच्चरो मदनः ॥ ९ ॥

---

१. अस्य कवेर्देशो न ज्ञायते. गोकुलनाथसुतोत्तमकाव्यनिर्मिता 'उत्प्रेक्षावल्लभ' इति नाम जातमिति चरमश्लोकतो ज्ञायते. आदर्शपुस्तकपत्रान्ते 'चिन्तामणिभट्टनामेदं' पद्यम्—'अनलशरशरचन्द्राङ्के वर्षे माघस्य शुक्लप्रतिपदायाम्। शुभवारे रेवत्यां संपूर्णं सुन्दरीशतकम् ॥' इत्युपलभ्यते. तथा च विक्रमसंवत् १६५३ (ख्रिस्ताब्दाः १५९७) कालः स्फुट एव. २. अस्य काव्यस्य पुस्तकमेकमेव शुद्धं जीर्णं च मन्दशिक्षितमेव मुद्रितम्.

अस्मिन्भ्रकुटिमनोज्ञे लग्ना प्रायेण मान्मथी दृष्टिः ।
सुन्दरि यतो भवत्याः प्रतिक्षणं क्षीयते मध्यः ॥ १० ॥
या तव गात्रे यौवनतपनरथारोहनेमिनवरेखा ।
सुन्दरि सैव जनानां जनयति रोमावलिभ्रान्तिम् ॥ ११ ॥
स्मररविपुरःसरीकृतयौवनमायातमभिमुखं सुतनोः ।
आलक्ष्यते यथैषा रोमालिच्छद्मतश्छाया ॥ १२ ॥
सुतनोरियत्प्रदेशे तिष्ठतु नवरोमराजिभुजगीती ।
त्रिवलित्रिसत्यरेखा वयःफणिग्राहिणाकारि ॥ १३ ॥
वक्षसि सुमुखि भवत्या मनोहरं कान्तिमण्डलं जयति ।
भ्रामितमभिनववयसा कामनृपादेशचक्रमिव ॥ १४ ॥
वयसा कुम्भकृतास्याः परिभ्रमत्कान्तिमण्डलच्छलतः ।
अभ्रमि किमुरसि चक्रं कुचकुम्भं कर्तुकामेन ॥ १५ ॥
कृतचन्दनाङ्गरागो मदनसखः श्रीफलद्वेषी ।
सुन्दरि सुवर्णवर्णो वक्षोजः कीदृशो रुद्रः ॥ १६ ॥
करनखललितभुजायाः पल्लवकुसुमाभिरामलतिकायाः ।
अनयोर्विशेषदर्शी सुन्दरि कुसुमेषुरेवैकः ॥ १७ ॥
यस्य स्वरेण विजितः प्रिये पिकोऽभूद्वनप्रियः सपदि ।
उपमामुपैतु शङ्खः कण्ठे तस्मिन्निधित्वेन ॥ १८ ॥
वदनमिदमृतमयमिति न तर्कितं किं तु तत्प्रमितम् ।
मुग्धे दग्धरतिप्रियजीवनमेव प्रमाणमिह ॥ १९ ॥
इन्दीवरखण्डमण्डलनिर्यत्पीयूषमृष्टरसनो यः ।
अधरदलं तव सुन्दरि वर्णयितुं कल्पते यदि सः ॥ २० ॥
सुन्दरि तव दन्ततुलनामारोढुं विकसितं सरोजेन ।
विधिना तदैव दत्तं परागविपत्तो मुखेऽस्य रजः ॥ २१ ॥
लोचनयोः श्रीभृतयोः कर्णान्तिकवासिनोः पृथुकलयोः ।
अनयोस्तन्वि विभुचिना वद परहृदयापहारिणी रीतिः ॥ २२ ॥

सुन्दरि तव नयनाम्बुजभालकलानाथखण्डयोर्मध्ये ।
अन्योन्यकलहशान्त्यै भ्रुकुटिभ्रमरावली व्यरचि ॥ २३ ॥
तव नयनवारिरुहयोः संकोचो भालचन्द्रमुद्वीक्ष्य ।
मा भूदिति कमलभुवा भ्रूलेखा व्यरचि किं मध्ये ॥ २४ ॥
तव निर्मलौ कपोलौ सौन्दर्यासारसुन्दराभोगौ ।
किं वर्णयामि सुन्दरि चुम्बनयोग्याकृती कृतिनः ॥ २५ ॥
सीमन्तिनि तव कुटिलस्निग्धायतमेचकः कटाक्ष इव ।
हा हन्त केशहस्तो हृदयं हस्ताद्विहस्तयति ॥ २६ ॥
युवजनमारणशाला सुन्दरि वेणीकृपाणिकोपेता ।
तव चरममङ्गमेतत्कवयित्वा पातकी कः स्यात् ॥ २७ ॥
कुसुमशरनृपनिदेशात्सुतनौ चकितं नवं वयो विशति ।
नवसेवक इव पार्थिवसद्मनि दत्तप्रवेशोऽपि ॥ २८ ॥
शरणमिव याचमानं क्वचित्क्वचिद्बाल्यमङ्गेषु ।
भ्रमति मनोजनिदेशादधिकारिणि यौवने भवति ॥ २९ ॥
कुसुमशरनृपतिशासनमभिनवसौन्दर्यसारसौभाग्यम् ।
युवजनमनोविनोदो जयति प्रथमं वयस्तस्याः ॥ ३० ॥
जयति स्मितप्रकारः स्फुरदधरोपान्तविभ्रमन्यासः ।
कुसुमाञ्जलिरिव दत्तो नवेन वयसा रतीशाय ॥ ३१ ॥
सुन्दरि तव स्मितेन स्फुरिताधरपल्लवाश्रितेन ।
मकरध्वजनृपदर्पो वद कस्य मनो न निर्जितम् ॥ ३२ ॥
[illegible] कोमलमधुरपरीपाकोऽपि मन्दमपि वचनम् ।
वचनादपि स्मितं ते [illegible] मम ॥ ३३ ॥
अधरदलेऽपि स्मितं कुसुमपूर्णं [illegible] ।
[illegible] ॥ ३४ ॥
[illegible] ।
[illegible] ॥ ३५ ॥

तरुणि तरलनयनान्तं वलितग्रीवं वधूतचेलान्तम् ।
भवनद्वारि विशन्त्यास्तव दृष्टं द्रष्टुमुत्कण्ठे ॥ ३६ ॥
पश्यत्यसंमुखं मां मयि पश्यति साथ संमुखीभवति ।
सरमेकतोऽवरोहैः श्रमयति कोटिद्वये मौर्वी ॥ ३७ ॥
तव सुन्दरि मधुरस्मितमेदुरमचक्षुरभिमुखं चक्षुः ।
शरदिन्दुकिरणतुन्दिलकुमुदोन्मुखमधुपमनुहरते ॥ ३८ ॥
सुन्दरि विवृत्य दष्टः कष्टमपाङ्गेन भुजगेन ।
अधरामृतेन जीवति सोऽयमुपायान्तरासाध्यः ॥ ३९ ॥
कुञ्चन्मृदुकरशाखाकृष्टाञ्चलकोणतिर्यगुल्लसितः ।
लक्षीकरोति धन्यं सुन्दरि दीर्घः कटाक्षस्ते ॥ ४० ॥
निष्ठुरपञ्जरकोपे नवसंयमितस्य खञ्जनस्येव ।
गुरुजनसमक्षमक्षिव्यापारो जयति मुग्धाक्ष्याः ॥ ४१ ॥
तव नयनपुण्डरीकाश्रिये कटाक्षक्रमा विराजन्ते ।
विकसितविचकिलकुसुमात्कुसुमानीवावतीर्णानि ॥ ४२ ॥
किंचिदुदञ्चय चञ्चलमञ्चलमचिरेण लोचनांशुकयोः ।
सुन्दरि कर्णवतंसः कैरवमिन्दीवरं भवतु ॥ ४३ ॥
चक्षुरपाङ्गमपाङ्गः कर्णं कर्णोऽपि दूतिकावचनम् ।
अवधत्ते मम तपसामुदारसारः क्रमः सोऽयम् ॥ ४४ ॥
कातरनयननिवेदितनिर्दयकंदर्पवेदनातिशयम् ।
दृष्टं निखातमन्तः प्रियया प्रस्थानवेलायाम् ॥ ४५ ॥
संसदि सखीजनानां गोष्ठीं कर्तुं पुरः प्रवृत्तायाः ।
गोत्रस्खलनविलक्षं सुन्दरि मुखमीक्षणीयं ते ॥ ४६ ॥
अरविन्दद्युतिशोणं लोचनकोणं सरोजाक्ष्याः ।
प्रणमति मय्यथ सदयं हरिहरि(!) हृदयं न विस्मरति ॥ ४७ ॥
सागसि मयि मन्दपदं पश्चादेत्य स्थिते सरोजदृशा ।
मुकुरं प्रदर्शयन्त्या तत्सख्या किमिव नोपकृतम् ॥ ४८ ॥

सुन्दरि तव नयनाम्बुजभालकलानाथखण्डयोर्मध्ये ।
अन्योन्यकलहशान्त्यै भ्रुकुटिभ्रमरावली व्यरचि ॥ २३ ॥
तव नयनवारिरुहयोः संकोचो भालचन्द्रमुद्वीक्ष्य ।
मा भूदिति कमलभुवा भ्रूलेखा व्यरचि किं मध्ये ॥ २४ ॥
तव निर्मलौ कपोलौ सौन्दर्यासारसुन्दराभोगौ ।
किं वर्णयामि सुन्दरि चुम्बनयोग्याकृती कृतिनः ॥ २५ ॥
सीमन्तिनि तव कुटिलस्निग्धायतमेचकः कटाक्ष इव ।
हा हन्त केशहस्तो हृदयं हस्ताद्विहस्तयति ॥ २६ ॥
युवजनमारणशाला सुन्दरि वेणीकृपाणिकोपेता ।
तव चरममङ्गमेतत्कवयित्वा पातकी कः स्यात् ॥ २७ ॥
कुसुमशरनृपनिदेशात्सुतनौ चकितं नवं वयो विशति ।
नवसेवक इव पार्थिवसद्मनि दत्तप्रवेशोऽपि ॥ २८ ॥
शरणमिव याचमानं क्वचित्क्वचिद्बाल्यमङ्गेषु ।
भ्रमति मनोजनिदेशादधिकारिणि यौवने भवति ॥ २९ ॥
कुसुमशरनृपतिशासनमभिनवसौन्दर्यसारसौभाग्यम् ।
युवजनमनोविनोदो जयति प्रथमं वयस्तस्याः ॥ ३० ॥
जयति सितप्रकारः स्फुरदधरोपान्तविश्रमस्तस्याः ।
कुसुमाञ्जलिरिव दत्तो नवेन वयसा रतीशाय ॥ ३१ ॥
सुन्दरि तव स्मितेन स्फुरिताधरपल्लवाङ्कमिलितेन ।
मकरध्वजनृपहस्ते वद कस्य मनो न विक्रीतम् ॥ ३२ ॥
अङ्गं कोमलमङ्गादधरोऽधरतोऽपि चन्द्रमुखि वचनम् ।
वचनादपि स्मितं ते तत्कथमन्तर्भिनत्ति मम ॥ ३३
अधरदलोपरि निहितं मुक्ताचूर्णं दरस्मितं तस्याः ।
आस्वाद्योच्छूनमिदं मनो मम खेदमभिलषति ॥ ३४
सस्मितमुन्नमय्य धारितचेलाञ्चलमीषदानतग्रीवम् ।
तिर्यग्विलोकयन्त्या कोऽपि कृती लसितः क्रियते ॥

सस्मितमरुणकपोलं रचितभ्रूभङ्गमञ्चितव्रीडम् ।
संपृक्तभावरुचिरं वदनं तस्याः स्मरामि सखे ॥ ४९
ज्ञातासि गृहजनैरिति कथिते संभ्रान्ततारकं दूत्या ।
अरुणमपि मानवत्याः स्मरामि पाण्डुभवद्वदनम् ॥ ५
प्रेमासवोन्मदिष्णोः प्रणयतनीयांसि तानि वचनानि ।
करणीयानि न हृदये दयिते यदयं दयावसरः ॥ ५१
तव विरहानलतप्तं स्नेहकटाहं मदन्तरात्मानम् ।
सुन्दरि चन्दनशाखे शीतलय स्पर्शमात्रेण ॥ ५२ ॥
सहचर कुशलं तस्याः कुशलवती कथय किमपि संदि
कं संदिशतु कृशाङ्गी न तत्र मरुतोऽपि यद्गमनम् ॥
अवधिदिवसप्रयाणाः प्रियतम तस्या मृगीदृशः प्राणाः
तिष्ठन्ति कतिपयाहं कृत्वा प्रस्थानमधिकण्ठम् ॥ ५४ ।
गच्छति वर्षाकाले जलधरपटली यथा यथा रिक्ता ।
वर्षति लोचनयुगली तथा तथा पुण्डरीकदृशः ॥ ५५
नदति कलापिकलापे नवजलदच्छायशान्तसंतापे ।
संशयदोलारूढं जीवितमस्याः स्मरेण कृतम् ॥ ५६ ॥
किं वा शुनैः मयञ्जैरेतैर्मुहिनोपचारशमपैतैः ।
उर्व्वीभवति यदस्याः परितः शीतोऽपि संचरन्पवनः ॥
अपि चन्दनलेपो विषमयतां मरणमेव जीवातुः ।
सुन्दरि विरहिजनानां क्वापि लोकोत्तरा रीतिः ॥ ५८
विरहानिलदहनमोपयनेर्थं चेष्टासु तासु [illegible] ।
सुन्दरि दयितजने [illegible] नातङ्कदः ॥ ५९ ॥
सुन्दरि [illegible] भर्तरिव तव वेद ।
[illegible] यदि [illegible] ॥ ६० ॥
सुन्दरि [illegible] यथा यथा दर्शि ।
[illegible] तथा [illegible] ॥ ६१ ॥

सुन्दरि समुदितशशिकरधौततमा नैयमष्टमी रात्रिः ।
विरहिजनमसितभुजगी विदश्य परिवर्तितोत्ताना ॥ ६२ ॥
पर्यङ्कपार्श्वलग्नां गलदश्रुप्लावितैकभुजमूलाम् ।
अञ्चलसंवृतवदनां तामन्तश्चिन्तयामि चिरम् ॥ ६३ ॥
अश्रुप्लुतमतिकातरमनिमिषमस्पन्दतारकं तस्याः ।
लोचनयुगलं स्मरतः स्मरतो मम केवलं भीतिः ॥ ६४ ॥
प्रत्येकमिन्द्रियाणामास्तां भिन्नैव देवतान्यस्य ।
परिणमति मम तु सैका सकलेन्द्रियदेवतात्वेन ॥ ६५ ॥
अयि पथिक रक्ष जीवं परिहर दूरेण केतकीकुसुमम् ।
इह वसति पुष्पधन्वा स्मरहरनयनाग्निरातङ्कः ॥ ६६ ॥
तव रथ्या राजगृहं प्रेमधनं किं च परिजनो बन्धुः ।
सख्यो मूर्ताः प्राणाः सुन्दरि किमतो ममाकाङ्क्ष्यम् ॥ ६७ ॥
साहसभवनमदूतिकमवलोकनदानवर्धमानमिदम् ।
जयति क्वचिदपि धन्ये सुन्दरि सहजं तव प्रेम ॥ ६८ ॥
शितिकण्ठकण्ठकान्तिप्रतिमल्ले स्फुरति सर्वतस्तिमिरे ।
धन्याय वदति सुन्दरि तवागमं परिमलोत्कर्षः ॥ ६९ ॥
मग्नो मनसा द्वेषश्चन्द्रमसा हन्त परिचयस्तमसा ।
सुन्दरि तवाभिसारे परिपाटी काचिदन्यैव ॥ ७० ॥
आसारकम्पिते यत्प्रयासि पथि दुस्तरे पयोदजलैः ।
प्रावर्तनमुदवासतपः फलोन्मुखं कस्यचित्कृतिनः ॥ ७१ ॥
द्विगुणीकृतान्धतमसं वर्षति रुद्धानिलं पयोवाहे ।
आकस्मिकमागमनं कान्त्यानुमितं सखे तस्याः ॥ ७२ ॥
अतिमन्दवर्षदम्बुदशीकरशिशिरार्द्रसान्द्रवसनायाः ।
आकस्मिकागतायाः कण्ठग्रहणं फलं जनुषः ॥ ७३ ॥
सितवसनमौक्तिकावलिचन्दनचर्चासहायशालिन्याः ।
ज्योत्स्नाभिसारिणि तव च्छाया परिपन्थिनी भवति ॥ ७४ ॥

सलिलतमरुणकपोलं रचितभ्रूभङ्गमधितव्रीडम् ।
संष्टकभावरुचिरं वदनं तस्याः स्मरामि सखे ॥ ४९ ॥
ज्ञातासि गृहजनैरिति कथिते संभ्रान्ततारकं दृष्ट्वा ।
अरुणमपि मानवत्याः स्मरामि पाण्डुभवद्वदनम् ॥ ५० ॥
प्रेमासवोन्मदिष्णोः प्रणयतनीयांसि तानि वचनानि ।
कर्णीयानि न हृदये दयिते यद्यं दयावसरः ॥ ५१ ॥
तव विरहानलतप्तं स्नेहकटाहं मदन्तरात्मानम् ।
सुन्दरि चन्दनसारो शीतलय स्पर्शमात्रेण ॥ ५२ ॥
सहचर कुशलं तस्याः कुशलवती कथय किमपि संदिष्टम् ।
कं संदिशतु कृशाङ्गी न तत्र मरणेऽपि यत्रमनम् ॥ ५३ ॥
अवधिदिवससमाप्ताः प्रियतम तस्या मृगीदृशः प्राणाः ।
तिष्ठन्ति कण्ठसीमां कृत्वा प्रस्थानमभिकल्प्यम् ॥ ५४ ॥
गच्छति वर्षाकाले जलधरपटली यथा यथा दिक्षु ।
वर्धति [illegible] तथा तथा पुण्डरीकदृशः ॥ ५५ ॥
हरति कदाचित्कान्ते [illegible] ।
मम पर्यङ्क [illegible] ॥ ५६ ॥
[illegible] ।
[illegible] ॥ ५७ ॥
[illegible] ।

सुन्दरि समुदितशशिकरधौततमा नेयमष्टमी रात्रिः ।
विरहिजनमसितभुजगी विद्दश्य परिवर्तितोत्ताना ॥ ६२ ॥
पर्यङ्कपार्श्वलग्नां गलदश्रुप्लावितैकभुजमूलाम् ।
अञ्चलसंवृतवदनां तामन्तश्चिन्तयामि चिरम् ॥ ६३ ॥
अश्रुप्लुतमतिकातरमनिमिषमस्पन्दतारकं तस्याः ।
लोचनयुगलं स्मरतः स्मरतो मम केवलं भीतिः ॥ ६४ ॥
प्रत्येकमिन्द्रियाणामास्तां भिन्नैव देवतान्यस्य ।
परिणमति मम तु सैका सकलेन्द्रियदेवतात्वेन ॥ ६५ ॥
अयि पथिक रक्ष जीवं परिहर दूरेण केतकीकुसुमम् ।
इह वसति पुष्पधन्वा स्मरहरनयनान्निरातङ्कः ॥ ६६ ॥
तव रथ्या राजगृहं प्रेमधनं किं च परिजनो बन्धुः ।
सख्यो मूर्ताः प्राणाः सुन्दरि किमतो ममाकाङ्क्ष्यम् ॥ ६७ ॥
साहसमवनमदूतिकमवलोकनदानवर्धमानमिदम् ।
जयति क्वचिदपि धन्ये सुन्दरि सहजं तव प्रेम ॥ ६८ ॥
शितिकण्ठकण्ठकान्तिमतिमल्ले स्फुरति सर्वतस्तिमिरे ।
धन्याय वदति सुन्दरि तवागमं परिमलोत्कर्षः ॥ ६९ ॥
मग्नो मनसा द्वेपश्चन्द्रमसा हन्त परिचयस्तमसा ।
सुन्दरि तवाभिसारे परिपाटी काचिदन्यैव ॥ ७० ॥
आसारस्नपिते यत्प्रयासि पथि दुस्तरे पयोदजलैः ।
प्रावृतनमुदवासतपः फलोन्मुखं कस्यचित्कृतिनः ॥ ७१ ॥
द्विगुणीकृतान्धतमसं वर्षति रुद्धानिलं पयोवाहे ।
आकस्मिकमागमनं कान्त्यानुमितं सखे तस्याः ॥ ७२ ॥
अतिमन्दवर्षदम्बुदशीकरशिशिरार्द्रसान्द्रवसनायाः ।
आकस्मिकागतायाः कण्ठग्रहणं फलं जनुषः ॥ ७३ ॥
सितवसनमौक्तिकावलिचन्दनचर्चासहायशालिन्याः ।
ज्योत्स्नाभिसारिणि तव च्छाया परिपन्थिनी भवति ॥ ७४ ॥

यावत्पतति न चरणं छाया दुर्वारवैरिणी शिरसि ।
ज्योत्स्नाभिसारवेषः सहचरि नेशः कृतार्थयितुम् ॥ ७५ ॥
वचनरचनैः कृतं तव कितवप्रणिपातमात्रसाध्यायाः ।
अस्या मानकदल्याः फलावसानः परीपाकः ॥ ७६ ॥
भ्रूभङ्गभङ्गिसुभगं तिर्यक्चललोचनं मुखं दधती ।
सुरतप्रार्थनवेलाकृतावहेला वधूर्जयति ॥ ७७ ॥
विश्लथयति किमपि नीवीं कलकण्ठि रतस्य कूजितं यत्ते ।
शिक्षाविस्मृतिरेषा गुरोरभक्तिं निवेदयति ॥ ७८ ॥
मधुधौतमधुरमधुरं धृतधम्मिल्लं धवे धयति ।
कवलयति किमपि कम्पितकान्ताकरकंकणक्वणितम् ॥ ७९ ॥
अर्चितचण्डीचरणप्रसादफलमन्यदुर्लभं तरुणः ।
सुन्दरि हसितकरम्बितमखण्डपुण्येन खण्डयत्यधरम् ॥ ८० ॥
स्मेराननने मुखं तव सुधानिधेर्मण्डलेन तुलयन्तम् ।
एनं निजाधरसुधादानेन न किं विलक्षयसि ॥ ८१ ॥
निबिडीकृतोरुबन्धं वेल्लितवदनेन्दुनिह्नुतोच्छ्वासम् ।
तस्याः स्मरामि सुरतं तत्करभररुद्धमन्नाभि ॥ ८२ ॥
सस्मिततिर्यग्वेल्लितमुखपर्यन्तप्रकीर्णकबरीकम् ।
अतिभाग्यवान्भवत्याः सुन्दरि पुरुषायितं लभते ॥ ८३ ॥
प्रतिपणितमेकवारं पातुं द्यूते जितं पिबन्नधरम् ।
आवृत्तिद्वयभीत्या नायं निश्श्वसिते धूर्तः ॥ ८४ ॥
आश्लेषोऽधरदानं चुम्बनमनिमेषवीक्षणं सुरतम् ।
इत्येकैकपणेन क्रीडति मिथुनं जितान्योन्यम् ॥ ८५ ॥
संस्पृष्टपद्मिनीको यथा यथार्कः करान्प्रसारयति ।
सुन्दरि मानवतीयं संकुचति तथा तथा छाया ॥ ८६ ॥
प्रातः पृच्छति निभृतं सखीजने रजनिकेलिवृत्तान्तम् ।
मन्दस्मितादजायत रहस्यभेदः सरोजाक्ष्याः ॥ ८७ ॥

तम्बभरमन्थराङ्घ्रिविन्यासम् ।
नं कुरुते यतिचित्तसंयमनम् ॥ ८८ ॥
युगविन्यासमानतग्रीवम् ।
मस्या कं न मोहयति ॥ ८९ ॥
लत्पदं वर्त्म चकितनयनायाः ।
त्तीति परं निवेदयति ॥ ९० ॥
यन्ती वदनमूर्मिकामुकुरे ।
कस्य न नयनं कृतार्थयसि ॥ ९१ ॥
पुमर्धं सितेन परिपुष्यत् ।
नं वदनं दष्टाधरं तस्याः ॥ ९२ ॥
स्वाङ्कमीनं झषाङ्ककैवर्तः ।
लयति रोमालिबडिशेन ॥ ९३ ॥
ष्मुखाग्रजाग्रन्नखाङ्कलेखेयम् ।
दंष्ट्राकोटिश्रियं वहति ॥ ९४ ॥
भाति रवेः संमुखस्थिता नलिनी ।
कदर्थनां वक्तुकामेव ॥ ९५ ॥
मन्दानिलकम्पमानवसनान्ता ।
पुष्पपताका परिस्फुरति ॥ ९६ ॥
दयाभिन्ने निवेद्यमानानाम् ।
नां कथमपि कथया न तृप्यामि ॥ ९७ ॥
नि मत्तो मधुपः प्रसुप्त इति मन्ये ।
मन विनिद्रं समागत्य ॥ ९८ ॥
नि सहवासो भवति हन्त कुमुदिन्याः ।
स्वपत्यामनया यन्नीयते मधुपः ॥ ९९ ॥
लति मल्लीलवलीलवङ्गलतिकाभ्यः ।
यया निबद्धः षडङ्घ्रिरपि ॥ १०० ॥

ुनारायणपण्डिताचार्यविरचिता

शिवस्तुतिः ।

(सटीका ।)

ं स्फुटितहाटकश्रीजटं
खरं कपिलफुल्लनेत्रत्रयम् ।
गभूषणं भूतिम-
तिकण्ठ ते वपुरवेक्षते वीक्षणम् ॥ १ ॥

समासीनं भवतापनिवारकम् ।
ानस्य व्याकरिष्ये शिवस्तुतिम् ॥

ीक्षणं ते वपुः कदा न्ववेक्षत इत्यन्वयः । शितिः कण्ठे
शितिकण्ठ नीलकण्ठ । 'शिती धवलमेचकौ' इत्यमरः ।
वपुः शरीरं कर्म कदा नु कस्मिन्वा समये स्फुटं यथा
। अवेक्षतेऽवेक्षिष्यते । करणे त्वो(कर्तृत्वो)पचारः ।
। पुनः । स्फुटितहाटकश्रीजटं स्फुटितं (तत्) संततं
थीर्यासां ता एवंविधा जटा यस्य तत् । पुनः । श-
शाङ्कदलं खण्डं शेखरे यस्य शिरोभूषणं यस्य तत् ।
पिङ्गलं विकसितं नेत्रत्रयं यस्य तत् । पुनः । तरक्षु-
रा श्रेष्ठा या कृत्तिश्चर्म तदस्यास्तीति । तदया—'व्या-
। पुनः । भुजगभूषणं भुजगाः सर्पाः ते भूषणमलंकारो
'भूतिर्भसनि संपदि' इत्यभिधानम् ॥

चने लसति ते ललामायिते
यसरो नियमिनामभूद्भस्मसात् ।
शीकृतवती सतीयं सती
ी भवानपि वशी प्रसीद प्रभो ॥ २ ॥

नि यस्यासौ त्रिलोचनः तस्य संबोधनं हे त्रिलोचन । ते
दाचरिते विशिष्टे तृतीयनेत्रे लसति भासमाने सति स्मरः
व इति भस्मसात् अभूत् । किंलक्षणः । नियमिनां निय-
ः । इयं सती साध्वी सती उमा स्वर्भीकरेव लतानया
भवान् वशी स्वतन्त्रः तथापि स्वभक्तवशतः स्वकीया
ं मह्यं प्रसीद प्रसन्नो भव ॥

भक्त्या किं नु समर्पितानि बहुधा रत्नानि पाथोधिना
किं वा रोहणपर्वतेन सदनं यैर्विश्वकर्माकरोत् ।
आ ज्ञातं गिरिजे कटाक्षकलया नूनं त्वया तोषिते
शंभौ नृत्यति नागराजफणिना कीर्णा मणिश्रेणयः ॥ ११ ॥

विदूरमुक्तवाहनैर्विनम्रमौलिमण्डलै-
र्निबद्धहस्तसंपुटैः प्रयत्नसंयतेन्द्रियैः ।
विरिञ्चिविष्णुशंकरादिभिर्मुदा तवाम्बिके
प्रतीक्ष्यमाणनिर्गमो विभाति रत्नमण्डपः ॥ १२ ॥

ध्वनन्मृदङ्गकाहलः प्रगीतकिंनरीगणः
प्रनृत्तदिव्यकन्यकः प्रवृत्तमङ्गलक्रमः ।
प्रकृष्टसेवकव्रजः प्रहृष्टभक्तमण्डलो
मुदे ममास्तु संततं त्वदीयरत्नमण्डपः ॥ १३ ॥

प्रवेशनिर्गमाकुलैः स्वकृत्यरक्तमानसै-
र्बहिःस्थितामरावलीविधीयमानभक्तिभिः ।
विचित्रवस्त्रभूषणैरुपेतमङ्गनाजनैः
सदा करोतु मङ्गलं ममेह रत्नमण्डपः ॥ १४ ॥

सुवर्णरत्नभूषितैर्विचित्रवस्त्रधारिभि-
र्गृहीतहेमयष्टिभिर्निरुद्धसर्वदैवतैः ।
असंख्यसुन्दरीजनैः पुरस्थितैरधिष्ठितो
मदीयमेतु मानसं त्वदीयतुङ्गतोरणः ॥ १५ ॥

इन्द्रादींश्च दिगीश्वरान्सहपरीवारानथो सायुधा-
न्योषिद्रूपधरान्स्वदिक्षु निहितान्संचिन्त्य हृत्पङ्कजे ।
शङ्खे श्रीवसुधारया वसुमतीयुक्तं च पद्मं स्मर-
न्कामं नौमि रतिप्रियं सहचरं प्रीत्या वसन्तं भजे ॥१६॥

---

१. 'इन्द्रादिदिक्पतीन्' [illegible] क. २. '[illegible]' क. ३. '[illegible]' क.

तिमधुरं हुंकारमातन्वती-
तीरिह सरस्वत्यादिकाः पूजयन् ।
सुरगणाधीशं मदेनोन्मदां
रां परिलसन्मुक्ताविभूषां भजे ॥ १७ ॥
मलाङ्गीं कादम्बरीपानमदालसाङ्गीम् ।
ीणां मातङ्गकन्यां मनसा स्मरामि ॥ १८ ॥
करे विगलिताम्बराडम्बरे
ोचने विमलभूषणोद्भासिनि ।
वकं चरणपङ्कजं चिन्तय-
मण्डलीर्मलिकमोहदुग्धाशयाम् ॥ १९ ॥
रसैर्विघूर्णमानलोचनाः
त्यसूदनाः प्रविष्टभक्तमानसाः ।
च्छविच्छटाविराजिविग्रहाः
ूलधारिणीः स्तुवे त्वदीयदूतिकाः ॥ २० ॥
लसिताभोगैः पुरः स्थापितै-
वशोभितमुखैः कुम्भैर्नवैः शोभिना
पटलीचञ्चत्कपाटश्रिया
थेन गिरिजे वन्दे मणीमन्दिरम् ॥ २१ ॥
ासनयुतं पुष्पोपहारान्वितं
दीपसुभगं राजद्वितानोत्तमम् ।
नममिलद्भृङ्गावलीगुञ्जितं
ोतु मेऽनवरतं श्रीमण्डपाभ्यन्तरम् ॥ २२ ॥
ञ्चप्रेतासनेन विराजिते
ते रक्तश्वेताम्बरास्तरणोत्तमे ।
ल्ये दिव्योपधानसुखावहे
ः प्रादुर्भूतां भजे परदेवताम् ॥ २३ ॥

 क. २. 'दीपाङ्का' क. ३. 'राजितम्' क.

सर्वाङ्गस्थितिरम्यरूपरुचिरां मातः सैमभ्युत्थितां
जृम्भामञ्जुमुखाम्बुजां मधुमदव्याघूर्णदक्षित्रयाम्।
सेवायातसमस्तसंनिधिसखीः संमानयन्तीं दृशा
संपश्यन्परदेवतां परमहो मन्ये कृतार्थं जनुः॥ २४॥
उच्चैस्तोरणवर्तिवाद्यनिवहध्वाने समुज्जृम्भिते
भक्तैर्भूमिविलग्नमौलिभिरलं दण्डप्रणामे कृते।
नानारत्नसमूहनद्धकथनस्थालीसमुद्भासितां
प्रातस्ते परिकल्पयामि गिरिजे नीराजनामुज्ज्वलाम्॥ २५॥
पाद्यं ते परिकल्पयामि पदयोरर्घ्यं तथा हस्तयोः
सौधीभिर्मधुपर्कमम्ब मधुरं धाराभिरास्वादय।
तोयेनाचमनं विधेहि शुचिना गाङ्गेन मत्कल्पितं
साष्टाङ्गं प्रणिपातमीशदयिते दृष्ट्या कृतार्थीकुरु॥ २६॥
मातः पश्य मुखाम्बुजं सुविमले दत्ते मया दर्पणे
देवि स्वीकुरु दन्तधावनमिदं गङ्गाजलेनान्वितम्।
सुप्रक्षालितमाननं विरचयन्स्निग्धाम्बरप्रोञ्छनं
द्रागङ्गीकुरु तत्त्वमम्ब मधुरं ताम्बूलमास्वादय॥ २७॥
निधेहि मणिपादुकोपरि पदाम्बुजं मज्जना-
लयं भज शनैः सखीकृतकराम्बुजालम्बनम्।
महेशि करुणानिधे तव दृगन्तपातोत्सुका-
न्विलोकय मनागमूनुभयसंस्थितान्दैवताम्॥ २८॥
हेमरत्नवरणेन वेष्टितं विस्तृतारुणवितानशोभितम्।
सज्जसर्वपरिचारिकाजनं पश्य मज्जनगृहं मनो मम॥ २९॥
कनककलशजालस्फाटिकस्नानपीठा-
द्युपकरणविशालं गन्धमत्तालिमालम्।
स्फुरदरुणवितानं मञ्जुगन्धर्वगानं
परमशिवमहेले मज्जनागारमेहि॥ ३०॥

---

१. 'समभ्युच्छ्रितां' क.

मुक्ताहारविचित्रहेमरचनाचारुप्रभाभास्वरं
नीलं कञ्चुकमर्पयामि गिरिशप्राणप्रिये सुन्दरि ॥ ३७ ॥
विलुलितचिकुरेण च्छादितांसप्रदेशे
मणिनिकरविराजत्पादुकान्यस्तपादे ।
सुललितमवलम्ब्य द्राक्सखीमंसदेशे
गिरिशगृहिणि भूषामण्डपाय प्रयाहि ॥ ३८ ॥
लसत्कनककुट्टिमस्फुरदमन्दमुक्तावली-
समुल्लसितकान्तिभिः कलितशक्रचापव्रजे ।
महाभरणमण्डपे निहितहेमसिंहासनं
सखीजनसमावृतं समधितिष्ठ कात्यायनि ॥ ३९ ॥
स्निग्धं कङ्कतिकामुखेन शनकैः संशोध्य केशोत्करं
सीमन्तं विरचय्य चारु विमलं सिन्दूररेखान्वितम् ।
मुक्ताभिर्ग्रथितालकां मणिचितैः सौवर्णसूत्रैः स्फुटं
प्रान्ते मौक्तिकगुच्छकोपलतिकां ग्रथ्नामि वेणीमिमाम् ॥ ४० ॥
विलम्बिवेणीभुजगोत्तमाङ्गस्फुरन्मणिभ्रान्तिमुपानयन्तम् ।
स्वरोचिषोल्लासितकेशपाशं महेशि चूडामणिमर्पयामि ॥ ४१ ॥
त्वामाश्रयद्भिः कबरीतमिस्रैर्बन्दीकृतं द्रागिव भानुबिम्बम् ।
मृडानि चूडामणिमादधानं वन्दामहे तावकमुत्तमाङ्गम् ॥ ४२ ॥
स्वमध्यनद्धहाटकस्फुरन्मणिप्रभाकुलं
विलम्बिमौक्तिकच्छटाविराजितं समन्ततः ।
निबद्धलक्षचक्षुषा भवेन भूरि भावितं
समर्पयामि भास्वरं भवानि भालभूषणम् ॥ ४३ ॥
मीनाम्भोरुहखञ्जरीटसुषमाविस्तारविस्मारके
कुर्वाणे किल कामवैरिमनसः कंदर्पबाणप्रभाम् ।
माध्वीपानमदारुणेऽतिचपले दीर्घे दृगम्भोरुहे
देवि स्वर्णशलाकयोर्जितमिदं दिव्याञ्जनं दीयताम् ॥ ४४ ॥

१. 'विलसत्सिन्दू' क. २. 'स्वनद्धमध्यहाटक' क.

मध्यस्थारुणरत्नकान्तिरुचिरां मुक्तामुगोद्भासितां
दैवाद्भार्गवजीवमध्यगरवेर्लक्ष्मीमधः कुर्वतीम् ।
उत्सिक्ताधरबिम्बकान्तिविसरैर्भौमीभवन्मौक्तिकां
मद्दत्तामुररीकुरुष्व गिरिजे नासाविभूषामिमाम् ॥ ४५ ॥

उडुकृतपरिवेषस्पर्धया शीतभानो-
रिव विरचितदेहद्वन्द्वमादित्यबिम्बम् ।
अरुणमणिसमुद्यत्प्रान्तविभ्राजिमुक्तं
श्रवसि परिनिधेहि स्वर्णताटङ्कयुग्मम् ॥ ४६ ॥

मरकतवरपद्मरागहीरोत्थितगुलिकात्रितयावनद्धमध्यम् ।
विततविमलमौक्तिकं च कण्ठाभरणमिदं गिरिजे समर्पयामि ॥ ४७ ॥

नानादेशसमुत्थितैर्मणिगणप्रोद्यत्प्रभामण्डल-
व्याप्तैराभरणैर्विराजितगलां मुक्ताछटालंकृताम् ।
मध्यस्थारुणरत्नकान्तिरुचिरां प्रान्तस्थमुक्ताफल-
व्रातामम्ब चतुष्किकां परशिवे वक्षःस्थले स्थापय ॥ ४८ ॥

अन्योन्यं प्लावयन्ती सततपरिचलत्कान्तिकल्लोलजालैः
कुर्वाणा मज्जदन्तःकरणविमलतां शोभितेव त्रिवेणी ।
मुक्ताभिः पद्मरागैर्मरकतमणिभिर्निर्मिता दीप्यमानै-
र्नित्यं हारत्रयी ते परशिवरसिके चेतसि द्योततां नः ॥ ४९ ॥

करसरसिजनाले विस्फुरत्कान्तिजाले
विलसदमलशोभे चञ्चदीशाक्षिलोभे ।
विविधमणिमयूखोद्भासितं देवि दुर्गे
कनककटकयुग्मं बाहुयुग्मे निधेहि ॥ ५० ॥

व्यालम्बमानसितपट्टकगुच्छशोभि
स्फूर्जन्मणीघटितहारविरोचमानम् ।
मातर्महेशमहिले तव बाहुमूले
केयूरकद्वयमिदं विनिवेशयामि ॥ ५१ ॥

विततनिजमयूखैर्निर्मितामिन्द्रनीलै-
विजितकमलनालालीनमत्तालिमालाम् ।
मणिगणखचिताभ्यां कङ्कणाभ्यामुपेतां
कलय वलयराजीं हस्तमूले महेशि ॥ ५२ ॥
नीलपट्टमृदुगुच्छशोभिताबद्धनैकमणिजालमञ्जुलाम् ।
अर्पयामि वलयात्पुरःसरे विस्फुरत्कनकतैतृपालिकाम् ॥ ५३ ॥
आलवालमिव पुष्पधन्वना बालविद्रुमलतासु निर्मितम् ।
अङ्गुलीषु विनिधीयतां शनैरङ्गुलीयकमिदं मदर्पितम् ॥ ५४ ॥
विजितहरमनोभूमत्तमातङ्गकुम्भ-
स्थलविलुलितकूजत्किङ्किणीजालतुल्याम् ।
अविरतकलनादैरीशचेतो हरन्तीं
विविधमणिनिबद्धां मेखलामर्पयामि ॥ ५५ ॥
व्यालम्बमानवरमौक्तिकगुच्छशोभि-
विभ्राजिहाटकपुटद्वयरोचमानम् ।
हेम्ना विनिर्मितमनेकमणिप्रबन्धं
नीवीनिबन्धनगुणं विनिवेदयामि ॥ ५६ ॥
विनिहितनवलाक्षापङ्कबालातपौघे
मरकतमणिराजीमञ्जुमञ्जीरघोषे ।
अरुणमणिसमुद्यत्कान्तिधाराविचित्र-
स्तव चरणसरोजे हंसकः प्रीतिमेतु ॥ ५७ ॥
निबद्धसितपट्टकम्बरगुच्छशोभितां
कटकनिवहमुग्धां गिरिशचित्तसंमोहनीम् ।
अमन्दमणिमण्डलीविमलकान्तिकिर्मीरितां
निधेहि पदपङ्कजे कनकशृङ्खलामम्बिके ॥ ५८ ॥
विस्फुरद्यावकरसिते शिञ्जितेन कलितं समन्ततः ।
पद्मरागमणिनूपुरद्वयमर्पयामि तव पादपङ्कजे ॥ ५९ ॥

'हंसं' क.

पदाम्बुजमुपासितुं परिगतेन शीतांशुना
कृतां तनुपरम्परामिव दिनान्तरागारुणाम् ।
महेशि नवयावकद्रवभरेण शोणीकृतां
नमामि नखमण्डलीं चरणपङ्कजस्थां तव ॥ ६० ॥

आरक्तश्वेतपीतस्फुरदुरुकुसुमैश्चित्रितां पट्टसूत्रै-
र्देवस्त्रीभिः प्रयत्नादगुरुसमुदितैर्धूपितां दिव्यधूपैः ।
उद्यद्गन्धान्धपुष्पंधयनिवहसमारब्धझांकारगीतां
चञ्चत्कह्लारमालां परशिवरसिके कण्ठपीठेऽर्पयामि ॥ ६१ ॥

गृहाण परमामृतं कनकपात्रसंस्थापितं
समर्पय मुखाम्बुजे विमलवीटिकामम्बिके ।
विलोकय मुखाम्बुजं मुकुरमण्डले निर्मले
निधेहि मणिपादुकोपरि पदाम्बुजं सुन्दरि ॥ ६२ ॥

आलम्ब्य स्वसखीं करेण शनकैः सिंहासनादुत्थिता
कूजन्मन्दमरालमञ्जुलगतिप्रोल्लासिभूषाम्बरा ।
आनन्दप्रतिपादकैरुपनिषद्वाक्यैः स्तुता वेधसा
मच्चित्ते स्थिरतामुपैति(तु) गिरिजा यान्ती सभामण्डपम् ॥६३॥

चलन्त्यामम्बायां प्रचलति समस्ते परिजने
सवेगं संयाते(?) कनकलतिकालंकृतिभरे ।
समन्तादुत्तालस्फुरितपदसंपातजनितै-
र्झणत्कारैस्तारैर्झणझणितमासीन्मणिगृहम् ॥ ६४ ॥

चञ्चद्वेत्रकराभिरङ्गविलसद्भूषाम्बराभिः पुरो-
यान्तीभिः परिचारिकाभिरमरव्राते समुत्सारिते ।
रुद्धे निर्जरसुन्दरीभिरभितः कक्षान्तरे निर्गतं
वन्दे नन्दितशंभु निर्मलचिदानन्दैकरूपं महः ॥ ६५ ॥

---

१. 'दिव्यस्त्रीभिः' क. २. 'कलितवलितालंकृतितरे' क. ३. 'रणत्कारैस्तारैर्गुं-
ञ्जणितमा' क. ४. 'समुदीरिते' क.

वेधाः पादतले पतत्ययमसौ विष्णुर्नमत्यग्रतः
शंभुर्देहि दृगञ्चलं सुरपतिं दूरस्थमालोकय ।
इत्येवं परिचारिकाभिरुदिते संमाननां कुर्वती
दृग्द्वन्द्वेन यथोचितं भगवती भूयाद्विभूत्यै मम ॥ ६६ ॥

मन्दं चारणसुन्दरीभिरभितोयान्तीभिरुत्कण्ठया
नामोच्चारणपूर्वकं प्रतिदिशं प्रत्येकमावेदितान् ।
वेगादक्षिपथं गतान्सुरगणानालोकयन्ती शनै-
र्लिप्स(र्दित्स)न्ती चरणाम्बुजं पथि जगत्पायान्महेशप्रिया ॥६७॥

अग्रे केचन पार्श्वयोः कतिपये पृष्ठे परे प्रस्थिता
आकाशे समवस्थिताः कतिपये दिक्षु स्थिताश्चापरे ।
[2]संमर्दे शनकैरपास्य पुरतो दण्डप्रणामान्मुहुः
कुर्वाणाः कतिचित्सुरा गिरिसुते दृक्पातमिच्छन्ति ते ॥ ६८॥

अग्रे गायति किंनरी कलपदं गन्धर्वकान्ताः शनै-
रातोद्यानि च वादयन्ति मधुरं सव्यापसव्यस्थिताः ।
कूजन्नूपुरनादमञ्जु पुरतो नृत्यन्ति दिव्याङ्गना
गच्छन्तः परितः स्तुवन्ति निगमस्तुत्या विरञ्च्यादयः ॥ ६९ ॥

कस्मैचित्सुचिरादुपासितमहामन्त्रौघसिद्धिं क्रमा-
देकस्मै भवनिस्पृहाय परमानन्दस्वरूपां गतिम् ।
अन्यस्मै विषयानुरक्तमनसे दीनाय दुःखापहं
द्रव्यं द्वारसमाश्रिताय ददतीं वन्दामहे सुन्दरीम् ॥ ७० ॥

नम्रीभूय कृताञ्जलिप्रकटितप्रेमप्रसन्नानने
मन्दं गच्छति संनिधौ सविनयात्सोत्कण्ठमोघत्रये ।
नानामन्त्रगणं तदर्थमखिलं तत्साधनं तत्फलं
व्याचक्षाणमुदग्रकान्ति कैलये यत्किंचिदाद्यं महः ॥ ७१ ॥

१. मन्दोचार' ख-ग. २. 'सानन्दं शनकैरपि सपुरतो' क.' ३. 'दिनरीकुठमिदं'
४ '—निलये' क.

तव दहनसदृक्षैरीक्षणैरेव चक्षु-
र्निखिलपशुजनानां भीषयद्भीषणास्यम् ।
कृतवसति परेशप्रेयसि द्वारि नित्यं
शरभमिथुनमुच्चैर्भक्तियुक्तो नतोऽस्मि ॥ ७२ ॥

कल्पान्ते सरसैकदासमुदितानेकार्कतुल्यप्रभां
रत्नस्तम्भनिबद्धकाञ्चनगुणस्फूर्जद्वितानोत्तमाम् ।
कर्पूरागुरुगर्भवर्तिकलिकाप्तोस्रप्रदीपावलीं
श्रीचक्राकृतिमुल्लसन्मणिगणां वन्दामहे वेदिकाम् ॥ ७३ ॥

स्वस्थानस्थितदेवतागणवृते बिन्दौ मुदा स्थापितं
नानारत्नविराजिहेमविलसत्कान्तिच्छटादुर्दिनम् ।
चञ्चत्कौसुमतूलिकासनयुतं कामेश्वराधिष्ठितं
नित्यानन्दनिदानमम्ब सततं वन्दे च सिंहासनम् ॥ ७४ ॥

वदद्भिरभितो मुदा जय जयेति वृन्दारकैः
कृताञ्जलिपरम्परा विदधती कृतार्था दृशा ।
अमन्दमणिमण्डलीखचितहेमसिंहासनं
सखीजनसमावृतं समधितिष्ठ दाक्षायणि ॥ ७५ ॥

कर्पूरादिकवस्तुजातमखिलं सौवर्णभृङ्गारकं
ताम्बूलस्य करण्डकं मणिमयं चैलाञ्चलं दर्पणम् ।
विस्फूर्जन्मणिपादुके च दधतीः सिंहासनस्याभित-
स्तिष्ठन्तीः परिचारिकास्तव सदा वन्दामहे सुन्दरि ॥ ७६ ॥

त्वदमलवपुरुद्यत्कान्तिकल्लोलजालैः
स्फुटमिव दधतीभिर्बाहुविक्षेपलीलाम् ।
मुहुरपि च विधूते चामरग्राहिणीभिः
सितकरकरशुभ्रे चामरे चालयामि ॥ ७७ ॥

---

१. 'दवदहन' ख-ग. २. 'शलभ' क. ३. 'नमामि' क. ४. 'सरसं' ख-ग. ५. 'दीप्र' क. ६. 'कृतां तनु' क. ७. सम्बन्धसामान्यविवक्षया षष्ठी. ८. 'मदनरिपुनटदत्त' क. ९. 'अर्पयामि' क.

प्रान्तस्फुरद्विमलमौक्तिकगुच्छजालं
चञ्चन्महामणिविचित्रितहेमदण्डम्।
उद्यत्सहस्रकरमण्डलचारु हेम-
च्छत्रं महेशमहिले [1]विनिवेशयामि ॥ ७८ ॥

उद्यत्पावकदेहकान्तिपटलीसिन्दूरपूरप्रभा-
शोणीभूतमुदग्रलोहितमणिच्छेदानुकारिच्छवि।
दूरादादरनिर्मिताञ्जलिपुटैरालोक्यमानं सुर-
व्यूहैः काञ्चनमातपत्रमतुलं वन्दामहे सुन्दरम् ॥ ७९ ॥

संतुष्टां परमामृतेन विलसत्कामेश्वराङ्कस्थितां
पुष्पौघैरभिपूजितां भगवतीं त्वां वन्दमाना मुदा।
स्फूर्जत्पावकदेहरश्मिकलनाप्राप्तस्वरूपाभिदाः
श्रीचक्रावरणस्थिताः सविनयं वन्दामहे देवताः ॥ ८० ॥

आधारशक्त्यादिकमाकलय्य मध्ये समस्ताधिकयोगिनीं च।
मित्रेशनाथादिकमत्र नाथचतुष्टयं शैलसुते नतोऽस्मि ॥ ८१ ॥

त्रिपुरासुधार्णवासनमारभ्य त्रिपुरमालिनी यावत्।
आवरणाष्टकसंस्थितमासनपट्कं नमामि परमेशि ॥ ८२ ॥

ईशाने गणपं स्मरामि विचेरद्विमान्धकारच्छिदं
वायव्ये बटुकं च कज्जलरुचिं व्यालोपवीतान्वितम्।
नैर्ऋत्ये महिषासुरप्रमथिनीं दुर्गां च संपूजय-
न्नाग्नेयेऽखिलभक्तरक्षणपरं क्षेत्राधिनाथं भजे ॥ ८३ ॥

उड्यानजालंधरकामरूपपीठानिमान्पूर्णगिरिप्रसक्तान्।
त्रिकोणदक्षाग्रिमसव्यभागमध्यस्थितान्सिद्धिकरान्नमामि ॥ ८४ ॥

लोकेशः पृथिवीपतिर्निगदितो विष्णुर्जलानां प्रभु-
स्तेजोनाथ उमापतिश्च मरुतामीशस्तथा चेश्वरः।

---

१. '[illegible]' क. २. '[illegible]' क. ३. '[illegible]' क. ४. '[illegible]' क.
५. '[illegible]' क.

आकाशाधिपतिः सदाशिव इति प्रेताभिधामागता-
नेतांश्चक्रबहिःस्थितान्सुरगणान्वन्दामहे सादरम् ॥ ८५ ॥
तारानाथकलाप्रवेशनिगमव्याजाद्गतासुप्रथं(जाद्भुताशप्रभं)
त्रैलोक्ये तिथिषु प्रवर्तितकलाकाष्ठादिकालक्रमम् ।
रत्नालंकृतिचित्रवस्त्रललितं कामेश्वरीपूर्वकं
नित्याषोडशकं नमामि लसितं चक्रात्मनोरन्तरे ॥ ८६ ॥
हृदि भावितदैवतं प्रयत्नाभ्यु[1]पदेशानुगृहीतभक्तसंघम् ।
स्वगुरुक्रमसंज्ञचक्रराजस्थितमोघंत्रयमानतोऽस्मि मूर्ध्ना ॥ ८७ ॥
हृदयमथ शिरः शिखाखिलाद्ये कवचमथो नयनत्रयं च देवि ।
मुनिजनपरिचि[2]न्तितं तथास्त्रं स्फुरतु सदा हृदये षडङ्गमेतत् ॥ ८८ ॥
त्रैलोक्यमोहनमिति प्रथिते तु चक्रे
चञ्चद्विभूषणगणत्रिपुराधिवासे ।
रेखात्रये स्थितवतीरणिमादिसिद्धी-
र्मुद्रा नमामि सततं प्रकटाभिधास्ताः ॥ ८९ ॥
सर्वाशापरिपूरके वसुदलद्वन्द्वेन विभ्राजिते
विस्फूर्जत्त्रिपुरेश्वरीनिवसतौ चक्रे स्थिता नित्यशः ।
कामाकर्षणिकादयो मणिगणभ्राजिष्णुदिव्याम्बरा
योगिन्यः प्रदिशन्तु काङ्क्षितफलं विख्यातगुप्ताभिधाः ॥ ९० ॥
महेशि वसुभिर्दलैर्लसति सर्वसंक्षोभणे
विभूषणगणस्फुरत्त्रिपुरसुन्दरीसद्मनि ।
अनङ्गकुसुमादयो विविधभूषणोद्भासिता
दिशन्तु मम काङ्क्षितं तनुतराश्च गुप्ताभिधाः ॥ ९१ ॥
लसद्युगदशारके स्फुरति सर्वसौभाग्यदे
शुभाभरणभूषितत्रिपुरवासिनीमन्दिरे ।
स्थिता दधतु मङ्गलं सुभगसर्वसंक्षोभिणी-
मुखाः सकलसिद्धयो विदितसंप्रदायानिधाः ॥ ९२ ॥

---
१. 'दुपदेशा' क. २. 'चिन्तितं' क. ३. 'निधानाः' क.

बहिर्दशारे सर्वार्थसाधके त्रिपुराश्रयाः ।
कुलकौलाभिधाः पान्तु सर्वसिद्धिप्रदायिकाः ॥ ९३ ॥
अन्तःशोभिदशारकेऽतिललिते सर्वादिरक्षाकरे
मालिन्या त्रिपुराद्यया विरचितावासे स्थितं नित्यशः ।
नानारत्नविभूषणं मणिगणभ्राजिष्णु दिव्याम्बरं
सर्वज्ञादिकशक्तिवृन्दमनिशं वन्दे निगर्भाभिधम् ॥ ९४ ॥
सर्वरोगहरेऽष्टारे त्रिपुरासिद्धयान्विते ।
रहस्ययोगिनीर्नित्यं वशिन्याद्या नमाम्यहम् ॥ ९५ ॥
चूताशोकविकासिकेतकरजःप्रोद्भासिनीलाम्बुज-
प्रस्फूर्जन्नवमल्लिकासमुदितैः पुष्पैः शरान्निर्मितान् ।
रम्यं पुष्पशरासनं सुललितं पाशं तथा चाङ्कुशं
वन्दे तावकमायुधं परशिवे चक्रान्तराले स्थितम् ॥ ९६ ॥
त्रिकोण उदितप्रभे जगति सर्वसिद्धिप्रदे
युते त्रिपुरयाम्बया स्थितवती च कामेश्वरी ।
तनोतु मम मङ्गलं सकलशर्म वज्रेश्वरी
करोतु भगमालिनी स्फुरतु मामके चेतसि ॥ ९७ ॥
सर्वानन्दमये समस्तजगतामाकाङ्क्षिते बैन्दवे
भैरव्यौ त्रिपुराद्यया विरचितावासे स्थिता सुन्दरी ।
आनन्दोल्लसितेक्षणा मणिगणभ्राजिष्णुभूषाम्बरा
विस्फूर्जद्वदना परापररहः सा पातु मां योगिनी ॥ ९८ ॥
उल्लसत्कनककान्तिभासुरं सौरभस्फुरणवासिताम्बरम् ।
दूरतः परिहृतं मधुव्रतैरर्पयामि तव देवि चम्पकम् ॥ ९९ ॥
वैरमुद्धतमपास्य शंभुना मस्तके विनिहितं कलाच्छलात् ।
गन्धलुब्धमधुपाश्रितं सदा केतकीकुसुममर्पयामि ते ॥ १०० ॥
चूर्णीकृतं द्रागिव पद्मजेन त्वदाननस्पर्धिसुधांशुबिम्बम् ।
समर्पयामि स्फुटमल्लिकं विकासिनार्ताकुसुमोत्करं ते ॥ १०१ ॥

१. त्रिपुरमालिन्या. २. त्रिपुरासिद्धा चक्रेश्वरी. ३. त्रिपुरभैरव्या.

अगरुबहलधूपाजस्रसौरभ्यरम्यां
मरकतमणिराजीराजिहारिस्रगाभाम् ।
दिशि विदिशि विसर्पद्गन्धलुब्धालिमालां
बकुलकुसुममालां कण्ठपीठेऽर्पयामि ॥ १०२ ॥

ईकारोर्ध्वगबिन्दुराननमधोबिन्दुद्वयं च स्तनौ
त्रैलोक्ये गुरुगम्यमेतदखिलं हार्दं च रेखात्मकम् ।
इत्थं कामकलात्मिकां भगवतीमन्तः समाराधय-
न्नानन्दाम्बुधिमज्जने प्रलभतामानन्दथुं सज्जनः ॥ १०३ ॥

धूपं तेऽगरुसंभवं भगवति प्रोल्लासिगन्धोद्धुरं
दीपं चैव निवेदयामि महसा हार्दान्धकारच्छिदम् ।
रत्नस्वर्णविनिर्मितेषु परितः पात्रेषु संस्थापितं
नैवेद्यं विनिवेदयामि परमानन्दात्मिके सुन्दरि ॥ १०४ ॥

जातीकोरकतुल्यमोदनमिदं सौवर्णपात्रे स्थितं
शुद्धान्नं शुचि मुद्गमाषचणकोद्भूतास्तथा सूपकाः ।
प्राज्यं माहिषमाज्यमुत्तममिदं हैयंगवीनं पृथ-
क्पात्रेषु प्रतिपादितं परशिवे तत्सर्वमङ्गीकुरु ॥ १०५ ॥

दुग्धं रोहितखण्डमण्डशकलं पौर्माजरसाङ्कं पृथ-
पपट्त्रिंशन्ति(?) सुवासितानि मृदुला सव्यञ्जनान्यम्बिका ।
लपनानि च वेसवारविसरैर्दिव्यानि भवत्या कृता-
न्यमे ते विनिवेदयामि गिरिजे सौवर्णपात्रगते ॥ १०६ ॥

माषव्यञ्जनजातमुत्तमतमं मुद्गप्रकारान्बहू-
न्हारिद्रफविकारसंविलुलितापूपास्तथा चाणकान् ।
मांसं सर्पिषि साधितं बहुतरं शूल्याकृतं मारिच
मत्स्यांश्चैव सुसंस्कृतान्परशिवे सन्तापयाम्यम्बत ॥ १०७ ॥

---

१. [illegible] 'पतिवत्त्वाम्बिका' इत्यु.

[illegible] पु० ११

निम्बूकार्द्रकचूतकन्दकदलीकौशातकीकर्कटी-
धात्रीबिल्वकरीरकैर्विरचितान्यानन्दचिद्विग्रहे ।
राजीभिः कटुतैलसैन्धवहरिद्राभिः स्थितान्यातये
संधानानि निवेदयामि गिरिजे भूरिप्रकाराणि ते ॥ १०८ ॥

सितयाञ्चितलड्डुकव्रजान्मृदुपूपान्मृदुलाश्च पूरिकाः ।
परमान्नमिदं च पार्वति प्रणयेन प्रतिपादयामि ते ॥ १०९ ॥

दुग्धमेतदनले सुसाधितं चन्द्रमण्डलनिभं तथा दधि ।
फाणितं शिखरिणीं सितासितां सर्वमम्ब विनिवेदयामि ते॥११०॥

अग्रे ते विनिवेद्य सर्वमिमितं नैवेद्यमङ्गीकृतं
ज्ञात्वा तत्त्वचतुष्टयं प्रथमतो मन्ये सुतृप्तां ततः ।
देवीं त्वां परिशिष्टमम्ब कनकामत्रेषु संस्थापितं
शक्तिभ्यः समुपाहरामि सकलं देवेशि शंभुप्रिये ॥ १११ ॥

वामेन स्वर्णपात्रीमनुपमपरमान्नेन पूर्णां दधाना-
मन्येन स्वर्णदर्वीं निजजनहृदयाभीष्टदां धारयन्तीम् ।
सिन्दूरारक्तवस्त्रां विविधमणिलसद्भूषणां मेचकाङ्गीं
तिष्ठन्तीमग्रतस्ते मधुमदमुदितामन्नपूर्णां नमामि ॥ ११२ ॥

पङ्क्त्योपविष्टान्परितस्तु चक्रं शक्त्या स्वयालिङ्गितवामभागान् ।
सर्वोपचारैः परिपूज्य भक्त्या तवाम्बिके पारिषदान्नमामि ॥ ११३ ॥

परमामृतमत्तसुन्दरीगणमध्यस्थितमर्कभासुरम् ।
परमामृतघूर्णितेक्षणं किमपि ज्योतिरुपास्महे परम् ॥ ११४ ॥

दृश्यते तव मुखाम्बुजं शिवे श्रूयते स्फुटमनाहतध्वनिः ।
अर्चने तव गिरामगोचरे न प्रयाति विषयान्तरं मनः ॥ ११५ ॥

त्वन्मुखाम्बुजविलोकनोल्लसत्प्रेमनिश्चलविलोचनद्वयीम् ।
उन्मनीमुपगतां सभामिमां भावयामि परमेशि तावकीम् ॥ ११६ ॥

चक्षुः पश्यतु नेह किंचन परं घ्राणं न वा जिघ्रतु
श्रोत्रं हन्त शृणोतु न त्वगपि न स्पर्शं समालम्बताम् ।

जिह्वा वेत्तु न वा रसं मम परं युष्मत्स्वरूपामृते
नित्यानन्दविघूर्णमाननयने नित्यं मनो मज्जतु ॥ ११७ ॥
यस्त्वां पश्यति पार्वति प्रतिदिनं ध्यानेन तेजोमयीं
मन्ये सुन्दरि तत्त्वमेतदखिलं वेदेषु निष्ठां गतम् ।
यस्तस्मिन्समये तवार्चनविधावानन्दसान्द्राशयो
यातोऽहं तदभिन्नतां परशिवे सोऽयं प्रसादस्तव ॥ ११८ ॥
गणाधिनाथं बटुकं च योगिनीः क्षेत्राधिनाथं च विदिक्चतुष्टये ।
सर्वोपचारैः परिपूज्य भक्तितो निवेदयामो बलिमुक्तयुक्तिभिः ॥११९॥
वीणामुपान्ते खलु वादयन्त्यै निवेद्य शेषं खलु शेषिकायै ।
सौवर्णभृङ्गारविनिर्गतेन जलेन शुद्धाचमनं विधेहि ॥ १२० ॥
ताम्बूलं विनिवेदयामि विलसत्कर्पूरकस्तूरिका-
जातीपूगलवङ्गचूर्णखदिरैर्भक्त्या समुल्लासितम् ।
रैरूजेद्दलसमुद्गकप्रणिहितं सौवर्णपात्रे स्थितै-
र्दीपैरुज्ज्वलमन्नचूर्णरचितैरारार्तिकं गृह्यताम् ॥ १२१ ॥
काचिद्गायति किंनरी कलपदं वाद्यं दधानोर्वशी
रम्भा नृत्यति केलिमञ्जुलपदं मातः पुरस्तात्तव ।
कृत्यं प्रोज्झ्य सुरस्त्रियो मधुमदव्याघूर्णमानेक्षणं
नित्यानन्दसुधाम्बुधिं तव मुखं पश्यन्ति हृष्यन्ति च ॥१२२॥
ताम्बूलोल्लासिवक्त्रैस्त्वदमलवदनालोकनोल्लासिनेत्रै-
[illegible] परिहृतविपयासङ्गमाकर्ण्यमानम् ।
[illegible] रं [illegible] किंनरीभि-
[illegible] हेतोः ॥ १२३ ॥
[illegible] वमुजातम् ।
[illegible] ॥ १२४ ॥

यथेप्सितमनोगतप्रकटितोपचारार्चितां
निजावरणदेवतागणवृतां सुरेशाश्रिताम् ।
कृताञ्जलिपुटो मुहुः कलितभूमिरष्टाङ्गकै-
र्नमामि भगवत्यहं त्रिपुरसुन्दरि त्राहि माम् ॥ १२५ ॥
[illegible] मे सुभद्वा यतेन ते भणिति
[illegible] कादिशीकतनुना [illegible] ।
[illegible] न मे [illegible]
[illegible] ॥ १२६ ॥
[illegible] ।
[illegible] ।
[illegible]
[illegible] ॥ १२७ ॥
[illegible] ।
[illegible] ॥ १२८ ॥

[illegible]
[illegible]

अमितां ममतां मम तां तनु तां तनुतां गतां पदाब्जं ते ।
कृपया विदितो विहितो यया तथाहं हि कान्तिमत्यम्ब ॥ ४ ॥
मम चरितं विदितं चेदुदयेन्न दया कदापि ते सत्यम् ।
तदपि वदाम्ययि कुरु तां निर्हेतुकमाशु कान्तिमत्यम्ब ॥ ५ ॥
न बुधत्वं न विधुत्वं न विधित्वं नौमि किं तु भृङ्गत्वम् ।
असकृत्प्रणम्य याचे त्वच्चरणाब्जस्य कान्तिमत्यम्ब ॥ ६ ॥
अभजमहं किं सारे कंसारे वीपदेऽपि संसारे ।
रुचिमत्तां शुचिमत्तामहह त्वं पाहि कान्तिमत्यम्ब ॥ ७ ॥
मामसकृदाप्रसादाद्दुष्कृतकारीति मावमन्यस्व ।
स्मर किं न मया सुकृतं वर्धितमिदमद्य कान्तिमत्यम्ब ॥ ८ ॥
करुणाविषयं यदि मां न तनोषि यथा तथापि वर्तेऽहम् ।
भवति कृपालुत्वं ते सीदामि मृषेति कान्तिमत्यम्ब ॥ ९ ॥
अतुलितभवानुरागिणि दुर्वर्णाचलविहारिणि मयि त्वम् ।
समतेर्ष्यया प्रसादं न विधत्से किं नु कान्तिमत्यम्ब ॥ १० ॥
द्यां गां वाभ्यपतं यदि जीवातुस्त्वामृतेऽन्ततः को मे ।
हित्वा पयोदपङ्क्तिं स्तोकस्य गतिः क्व कान्तिमत्यम्ब ॥ ११ ॥
कं वा कटाक्षलक्ष्यं न करोष्येवं मयि त्वमासीः किम् ।
किं त्वामुपालभेऽहं विधिर्गरीयान्हि कान्तिमत्यम्ब ॥ १२ ॥
तनुजे जननी जनयत्यहितेऽपि प्रेम हीति तन्मिथ्या ।
यदुपेक्षसे त्रिलोकीं मातर्मा देवि कान्तिमत्यम्ब ॥ १३ ॥
निन्दामि साधुवर्गं स्तौमि पुनः क्षीणपङ्कसंसर्गम् ।
वन्दे किं ते चरणे किं स्यात्प्रीतिस्तु कान्तिमत्यम्ब ॥ १४ ॥
गीर्वाणवृन्दजिह्वारसायनस्तीयमाननीयगुणे ।
निगमान्तपञ्जरान्तरमरालिके पाहि कान्तिमत्यम्ब ॥ १५ ॥
त्रिनयनकान्ते शान्ते तान्ते स्वान्ते ममास्तु वद दान्ते ।
कृपया मुनिजनचिन्तितचरणे निवसाद्य कान्तिमत्यम्ब ॥ १६ ॥

धुतफदने कृतमदने मृशमदने योगिशर्वभक्तानाम् ।
मणिसदने शुभरदने शशिवदने पाहि कान्तिमत्यम्ब ॥ १७ ॥
गिरितनुजे हृतदनुजे वरमनुद्धाजेभिधे च हर्यनुजे ।
गुहतनुजेऽवितमनुजे कुरु करुणां देवि कान्तिमत्यम्ब ॥ १८ ॥
गजगमने रिपुदमने हरकमने क्रूरपापकृच्छ्रमने ।
कलिजनने मयि दयया प्रसीद हे देवि कान्तिमत्यम्ब ॥ १९ ॥
यन्मानसे पदाब्जं तव संविद्रास्तदाभयाभाति ।
तत्पाददासदासकदासत्वं नौमि कान्तिमत्यम्ब ॥ २० ॥
दुष्करदुष्कृतराशेर्न बिभेमि शिवे यदि प्रसादस्ते ।
दलने दृषदां टङ्कः कल्पेत न किं नु कान्तिमत्यम्ब ॥ २१ ॥
कोमलदेहं किमपि श्यामलशोभं शरन्मृगाङ्कमुखम् ।
रूपं तव हृदये मम दीपश्रियमेतु कान्तिमत्यम्ब ॥ २२ ॥
किंचनवञ्चनदक्षं पञ्चशरारेः प्रपञ्चजीवातुम् ।
चञ्चलमञ्चलमक्ष्णोरयि मयि कुरु देवि कान्तिमत्यम्ब ॥ २३ ॥
अञ्चति यं त्वदपाङ्गः किंचित्तस्यैव कुम्भदासत्वे ।
अहमहमिकया विबुधाः कलहं कलयन्ति कान्तिमत्यम्ब ॥ २४ ॥
किमिदं वदाद्भुतं ते कस्मिंश्चिल्लक्षिते कटाक्षेण ।
वृंहादीनां हृदयं दीनत्वं याति कान्तिमत्यम्ब ॥ २५ ॥
प्रायो रायोपचिते मायोपायोल्बणासुरक्षपणे ।
गेयो जायोरुबले श्रेयो भूयोऽस्तु कान्तिमत्यम्ब ॥ २६ ॥
करणं शरणं तव लसदलकं कुलकं गिरीशभाग्यानाम् ।
सरलं विरलं जयति सकरुणं तरुणां हि कान्तिमत्यम्ब ॥ २७ ॥
शंकरि नमांसि वाणी किंकरि दैतेयराड्भयंकरिते ।
करवै सुरवैर्यनुजे पुरवैर्यभिकेऽद्य कान्तिमत्यम्ब ॥ २८ ॥
तव सेवां भुवि के वा नाकाङ्क्षन्ते क्ष्माभृतस्तनये ।
त्वमिव भवेयुर्यदि ते भजन्ति ये यां हि कान्तिमत्यम्ब ॥ २९

भवदवशिखाभिवीतं शीतलयेमां कटाक्षविक्षेपैः ।
कादम्बिनीव सलिलैः शिखण्डिनं देवि कान्तिमत्यम्ब ॥ ३० ॥
त्वद्गुणपयःकणं मे निपीय मुक्तेरलंक्रियां गिरतु ।
चेतःशुक्तिर्मुक्तां भक्तिमिषां देवि कान्तिमत्यम्ब ॥ ३१ ॥
गुणगणमहामणीनामागमपाथोधिजन्मभाजां ते ।
गुणतां कदा नु भजतां मम धिषणा देवि कान्तिमत्यम्ब ॥ ३२ ॥
पाटीरचर्चितस्तनि कोटीरकृतक्षपाधिराट्कलिके ।
वीटीरसेन कविताधाटीं कुरु मेऽद्य कान्तिमत्यम्ब ॥ ३३ ॥
तव करुणां किं ब्रूमस्त्वामप्येपानवेक्ष्य तूष्णीकाम् ।
ऊरीकरोति पापिनमपि विनतं देवि कान्तिमत्यम्ब ॥ ३४ ॥
ईशोऽपि विना भवतीं न चलितुमपि किं पुनर्वयं शक्ताः ।
किमुपेक्षसे प्रसीद क्षितिधरकन्येऽद्य कान्तिमत्यम्ब ॥ ३५ ॥
मन्मानसाम्रशाखी पल्लवितः पुष्पितोऽनुरागेण ।
हर्षेण च प्रसादाल्लघु तव फलितोऽस्तु कान्तिमत्यम्ब ॥ ३६ ॥
ध्यानाम्बरवसतेर्मम मानसमेघस्य दैन्यवर्षस्य ॥
पदयुगली तव शम्पा लक्ष्मीं विदधातु कान्तिमत्यम्ब ॥ ३७ ॥
कलितपनभानुतप्तं चित्तचकोरं ममातिशीताभिः ।
जीवय कटाक्षदम्भज्योत्स्नाभिर्देवि कान्तिमत्यम्ब ॥ ३८ ॥
ज्योत्स्नासध्रीचीभिर्दुग्धध्रीभिः कटाक्षवीचीभिः ।
शीत [illegible] देवि कान्तिमत्यम्ब ॥ ३९ ॥
[illegible] माम् ।
[illegible] ४० ॥
[illegible] ।
[illegible] मत्यम्ब ॥ ४१ ॥
[illegible] निर [illegible] प्राज्य

अखिलदिविपदालम्बे पदयुग्मं देवि ते सदालम्बे।
जगतां गोमत्यम्ब क्षितिधरकन्येऽद्य कान्तिमत्यम्ब ॥ ४३ ॥
अत्रैव कल्पवल्लीचिन्तामणिरस्ति कामधेनुरपि।
वेद्मि न किं यदि बुधता पुंसा लभ्येत कान्तिमत्यम्ब ॥ ४४ ॥
नाहं भजामि दैवं मनसाप्यन्यत्त्वमेव दैवं मे।
न मृषा भणामि शोधय मानसमाविश्य कान्तिमत्यम्ब ॥ ४५ ॥
खेदयसि मां मृगं किं मृगतृष्णेव प्रसीद नौमि शिवे।
मोदय कृपया नो चेत्क नु यायां देवि कान्तिमत्यम्ब ॥
कार्यं स्वेन स्वहितं को नाम वदेदयं जनो वेत्ति।
त्वं वा वदसि किमस्माद्गतिस्त्वमेवास्य कान्तिमत्यम्ब ॥ ४७ ॥
धन्योऽस्ति को मदन्यो दिवि वा भुवि वा करोषि चेत्करुणाम्।
इदमपि विश्वं विश्वं मम हस्ते किं च कान्तिमत्यम्ब ॥ ४८ ॥
तरुणेन्दुचूडजाये त्वां मनुजा ये भजन्ति तेषां ते।
भूतिः पदाब्जधूलिर्धूलिर्भूतिस्तु कान्तिमत्यम्ब ॥ ४९ ॥
त्वामत्र सेवते यस्त्वत्सारूप्यं समेत्य सोऽमुत्र।
हरकेल्यां त्वदसूयापात्रति चित्राङ्गि कान्तिमत्यम्ब ॥ ५० ॥
चित्रीयते मनस्त्वां दृष्ट्वा भाग्यावतारमूर्तिं मे।
किंच सुधाब्धेर्लहरीविहारितामेति कान्तिमत्यम्ब ॥ ५१ ॥
किरतु भवती कटाक्षाञ्जलजसदृक्षात्रसेन तादृक्षान्।
कृतसुररक्षान्मोहनदक्षान्भीमस्य कान्तिमत्यम्ब ॥ ५२ ॥
मानसवार्धिनिलीनौ रागद्वेषौ प्रबोधवेदमुषौ।
मधुकैटभौ तवेक्षणमीनो मे हरतु कान्तिमत्यम्ब ॥ ५३ ॥
मञ्जुलभाषिणि वञ्जुलकुड्मलललितालके लसत्तिलके।
पालय कुवलयनयने बालं मां देवि कान्तिमत्यम्ब ॥ ५४ ॥
पुरमथनविलोलाभिः पटुलीलाभिः कटाक्षमालाभिः।
शुभशीलाभिः कुवलयनीलाभिः पश्य कान्तिमत्यम्ब ॥ ५५ ॥
करुणारसार्द्रनयने शरणागतपालनैककृतदीक्षे।
प्रगुणाभरणे पालय दीनं मां देवि कान्तिमत्यम्ब ॥ ५६ ॥

नरजन्मैव वरं त्वद्भजनं येन क्रियेत चेदस्मात् ।
किमवरमेवं नो चेदतस्तदेवास्तु कान्तिमत्यम्ब ॥ ५७ ॥
यद्दुर्लभं सुरैरपि तन्नरजन्मादिशो नमाम्येतत् ।
सार्थय दानाद्भक्तेर्व्यर्थय मान्येन कान्तिमत्यम्ब ॥ ५८ ॥
जीवति पञ्चभिरेभिर्न विनास्त्येभिर्जनस्तनुं भजते ।
तदपि तदासीनां त्वां दरमपि नो वेत्ति कान्तिमत्यम्ब ॥ ५९ ॥
यत्प्रेमद्विपवदने षड्वदने वा कुरुष्व तन्मयि ते ।
जात्वपि मा भूद्भेदः स्तोकेप्वस्मासु कान्तिमत्यम्ब ॥ ६० ॥
शम्बररुहरुचिवदने शम्बररिपुजीविके हिमाद्रिसुते ।
अम्बरमध्ये वम्बरडम्बरचिकुरेऽव कान्तिमत्यम्ब ॥ ६१ ॥
मन्मानसपाठीनं कलिपुलिने क्रोधभानुसंतप्ते ।
सिञ्च परितो भ्रमन्तं कृपोर्मिभिर्देवि कान्तिमत्यम्ब ॥ ६२ ॥
यमिनः क्व वेद मुकुटान्यपि भवतीं भावयन्ति वा नो वा ।
यद्येवं मम हृदयं वेत्तु कथं ब्रूहि कान्तिमत्यम्ब ॥ ६३ ॥
क्लिश्यत्ययं जनो बत जननाद्यैरित्यहं श्रितो भवतीम् ।
तत्राप्येवं यदि वद तव किं महिमात्र कान्तिमत्यम्ब ॥ ६४ ॥
वृजिनानि सन्तु किमतस्तेषां धूत्यै न किं भवेद्दद ते ।
स्मरणं दृपदुत्क्षेपणमिव काकगणस्य कान्तिमत्यम्ब ॥ ६५ ॥
प्रसरति तव प्रसादे किमलभ्यं व्यत्यये तु किं लभ्यम् ।
लभ्यमलभ्यं किं नस्तेन विना देवि कान्तिमत्यम्ब ॥ ६६ ॥
किं चिन्तयामि संविच्छरदुदयं त्वत्पदच्छलं कतकम् ।
घृष्टं यदि प्रसीदेद्धृदयजलं मेऽद्य कान्तिमत्यम्ब ॥ ६७ ॥
विभजतु तव पदयुगली हंसीयोगीन्द्रमानसैकचरी ।
संविदसंवित्पयसी मिलिते हृदि मेऽद्य कान्तिमत्यम्ब ॥ ६८ ॥
कियदायुस्तत्रार्धं स्वप्नेन हृतं कियच्च बाल्याद्यैः ।
कियदस्ति केन भजनं तृप्तिलव केन कान्तिमत्यम्ब ॥ ६९ ॥
वेद्मि न धर्ममधर्मं कायक्लेशोऽस्त्यदो विचारफलम् ।
जानाम्येकं भजनं तव शुभदं दीति कान्तिमत्यम्ब ॥ ७० ॥

क्षिपति भोगे दुष्यति योगायेदं वृथाद्य मुह्यति मे।
हृदयं किमु सतो वा परतो वा वेत्ति कान्तिमत्यम्ब ॥ ७१ ॥
न बिभीमो भवजलधेर्दरमपि दनुजारिसोदरि शिवे ते।
आस्ते कटाक्षवीक्षातरणिर्ननु देवि कान्तिमत्यम्ब ॥ ७२ ॥
चिन्तामणौ करस्थेऽप्यटनं वीथीषु किं ब्रुवे मातः।
वद किं मे त्वयि सत्यामन्याश्रयणे न कान्तिमत्यम्ब ॥ ७३ ॥
नरवर्णनेन रसना परवनितावीक्षणेन नेत्रमपि।
क्रौर्येण मनोऽपि हतं भाव्यं तु न वेद्मि कान्तिमत्यम्ब ॥ ७४ ॥
त्रासितसुरपतितप्तं तप्तं किं धर्ममेव वा क्लृप्तम्।
किमपि न संचितममितं वृजिनमये किं तु कान्तिमत्यम्ब ॥ ७५ ॥
पापीत्युपेक्षसे चेत्पातुं कान्या भवेद्विना भवतीम्।
किमिदं न वेद्मि सोऽयं बकमन्त्रः कस्य कान्तिमत्यम्ब ॥ ७६ ॥
वञ्चयितुं वृजिनाद्यैर्मुग्धान्भवतीं विनेतरान्नेक्षे।
किमतः परं करिष्यसि विदितमिदं मेऽद्य कान्तिमत्यम्ब ॥ ७७ ॥
वञ्चयसि मां रुदन्तं बालमिव फलेन मां धनाढ्येन।
मास्तु कदापि ममेदं कैवल्यं देहि कान्तिमत्यम्ब ॥ ७८ ॥
त्र्यया किं मेऽद्य गुणे तव विदिते यो यतस्तु संभवति।
आस्तां मौक्तिकलाभे सति शुक्त्या किं नु कान्तिमत्यम्ब ॥ ७९ ॥
अद्भुतमिदं सकृद्येन ज्ञाता वा श्रियो दिशस्येभ्यः।
ये खलु भक्तास्तेभ्यः कैवल्यं दिशसि कान्तिमत्यम्ब ॥ ८० ॥
सुरनैचिकीव विबुधान्कादम्बिनिकेव नीलकण्ठमपि।
प्रीणयसि मानसं मे शोभय हंसीव कान्तिमत्यम्ब ॥ ८१ ॥
कर्तुं मनःप्रसादं तव मयि चेत्किं करिष्यति वृजिनम्।
जलजविकासे भानोः परिपन्थितमो नु कान्तिमत्यम्ब ॥ ८२ ॥
तव तु करुणा स्रवन्त्यां प्रवहन्त्यां स्तोकता गतेति मया।
लुठति स्फुटति मनो मे नेदं जानासि कान्तिमत्यम्ब ॥ ८३ ॥
शोधयितुमुदासीना यदि मां पात्रं किमस्य पश्याहम्।
मादृशि का वा वार्ता दासजने कान्तिमत्यम्ब ॥ ८४ ॥

अभजमनन्यगतिस्त्वां किं कुर्यास्त्वं न चेद्यतःप्रभृति ।
अवने यानवने वा न विचारो मेऽस्ति कान्तिमत्यम्ब ॥ ८५ ॥
किं वर्तते ममाखाखिलजगन्मङ्गलालितं भाग्यम् ।
यमिहृदयपद्महंसीं यत्त्वां सेवेऽद्य कान्तिमत्यम्ब ॥ ८६ ॥
कर्तुं जगन्ति विधिवद्भर्तुं हरिवद्धरीशवद्धर्तुम् ।
लीलावती त्वमेव प्रतीयसे देवि कान्तिमत्यम्ब ॥ ८७ ॥
केचिद्विदन्ति भवतीं केचिन्न विदन्ति देवि सर्वमिदम् ।
त्वत्कृत्यं वद सत्यं किं लब्धं तेन कान्तिमत्यम्ब ॥ ८८ ॥
शास्त्राणि कुक्षिपूर्त्यै स्फूर्त्यै निगमाश्च कर्मणां किं तैः ।
किं तव तत्त्वं ज्ञेयं यैस्त्वत्कृपयैव कान्तिमत्यम्ब ॥ ८९ ॥
किं प्रार्थये पुनः पुनरवने भवतीं विना विचारः स्यात् ।
कस्याः क इति विदन्नपि दूये मोहेन कान्तिमत्यम्ब ॥ ९० ॥
विदुषस्त्वां शरणं मे शास्त्रश्रमलेशवार्तयापि कृतम् ।
करजुपि नवनीते किं दुग्धविचारेण कान्तिमत्यम्ब ॥ ९१ ॥
प्रणवोपनिषन्निगमागमयोगिमनस्विवातितुङ्गेषु ।
भाहि प्रभेव तरणेर्मम हृदि निम्नेऽपि कान्तिमत्यम्ब ॥ ९२ ॥
स्फुटितारुणमणिशोभं त्रुटिताभिनवप्रवालमृदुलत्वम् ।
श्रुतिशिखरशेखरं ते चरणाब्जं स्तौमि कान्तिमत्यम्ब ॥ ९३ ॥
तव चरणाम्बुजभजनादमृतरसस्यन्दिनः कदाप्यन्यत् ।
स्वप्नेऽपि किंचिदपि मे मा स्म भवद्देवि कान्तिमत्यम्ब ॥ ९४ ॥
विस्मापनं पुरारेरस्मादृग्जीविकां परात्परमम् ।
सुपुमामयं स्वरूपं सदा निषेवेय कान्तिमत्यम्ब ॥ ९५ ॥
मङ्गलमस्त्विति पिष्टं पिनष्टि गीः सर्वमङ्गलायास्ते ।
वशितजयायाश्च तथा जयेति वादोऽपि कान्तिमत्यम्ब ॥ ९६ ॥
आशासितुर्विभूत्यै भवति भवत्यै हि मङ्गलाशास्तिः ।
स्वामिसमृद्ध्याशंसा भृत्योन्नत्यै हि कान्तिमत्यम्ब ॥ ९७ ॥

निगमैरपरिच्छेद्यं क वैभवं तेऽल्पधीः क चाहमिति।
तूष्णीकं मां भक्तिस्तव मुखरयति स्म कान्तिमत्यम्ब ॥ ९८ ॥
अनुकम्पापरवशितं कम्पातटसीम्नि कल्पितावसथम्।
उपनिषदां तात्पर्यं तव रूपं स्तौमि कान्तिमत्यम्ब ॥ ९९ ॥
जय धरणीधरतनये जय वेणुवनाधिराट्प्रिये देवि।
जय जम्भभेदिविनुते जय जगतामम्ब कान्तिमत्यम्ब ॥ १०० ॥
गुणमञ्जरिपिञ्जरितं सुन्दररचितं विभूषणं सुदृशाम्।
गीतिशतकं भवत्या क्षयतु कटाक्षेण कान्तिमत्यम्ब ॥ १०१ ॥
वप्ता यस्य मनीषिहारतरलः श्रीवेङ्कटेशो महा-
न्माता यस्य पुनः सरोजनिलया साध्वीशिरोभूषणम्।
श्रीवत्साभिजनामृताम्बुधिविधुः सोऽयं कविः सुन्दरः
देव्या गीतिशतं व्यधत्त महितं श्रीकान्तिमत्या मुदे ॥ १०२ ॥

इति तिरुनेल्वेलिप्रदेशपरिष्कृतपुरनिवासिभिः, अस्माकं [illegible]श्रीवा-त्सवेङ्कटेशविद्वन्मणितनूजैः, श्रीसुन्दराचार्यैर्विरचितं गीतिशतकं संपूर्णम्।

श्रीसामराजदीक्षितविरचितं
त्रिपुरसुन्दरीमानसपूजनस्तोत्रम्।

मधुरजदधिमध्योल्लासिरत्नान्तरीप-
[illegible]।
सुरतरु[illegible]-
[illegible] ॥ १ ॥
[illegible]-
[illegible]।

[illegible]

तदुपरि कृतवासं दत्तबालार्कहासं
दिशतु शुभमनन्ते देवि सिंहासनं ते ॥ २ ॥
तदुपरि धृतनानाहेतिभूषाश्मरश्मि-
व्यतिकरपुनरुक्तीभूतरम्योत्तरीयाम् ।
गलदमलदयाम्भःसिक्तभक्तप्ररोहां
प्रणवनलिनभृङ्गीं भावये ज्ञानभङ्गीम् ॥ ३ ॥
द्रुहिणहरिहराणां मौलिसंचारशीलं
मणिघटितविभूषारश्मिनिर्णेजितं च ।
निजमतिदृषदाहं भक्तिगङ्गापयोभिः
पदयुगममलं ते देवि निर्णेजयामि ॥ ४ ॥
गरुडमणिमयूखस्पर्धिदूर्वासनाथैः
कुशशिशुपरिजुष्टैः स्फीतसिद्धार्थसार्थैः ।
उपहितसितगन्धैः साक्षतैर्वारिभिस्ते
जननि चरणपद्मे पाद्यमार्यं ददामि ॥ ५ ॥
फलकुसुमसनाथं नूत्नरत्नप्ररोहं
मलयजरसदिग्धं स्निग्धमुग्धाक्षतं च ।
दरनियमितभक्तानीकवाञ्छाप्रदाने
करसरसिरुहेऽस्मिन्नर्घ्यमर्घ्यं ददामि ॥ ६ ॥
शिशिरकिरणजातीपत्रदेवप्रसून-
स्फुटितदलनवैलाक्रान्तकक्कोलगन्धम् ।
शिशिरममलमेतद्दद्भपीयूषरम्यं
[illegible] मसत्राचमेधाः ॥ ७ ॥

[illegible] धाः ॥ ८ ॥

पुनराचमनं कार्यं जगज्जननि सुव्रते।
त्वच्छिक्षितेन मार्गेण यतो लोकः प्रवर्तते ॥ ९ ॥

त्वरितसहचरीभिर्दत्तहस्तावलम्बं
चरणनलिनमेतत्पादुकास्थं विधाय।
प्रविश विविधशालं स्नानगेहान्तरालं
पशुपतिसहितैवाभ्यङ्गमङ्गीकुरुष्व ॥ १० ॥

अपि रसिकविगीतं भक्तचित्तानुमत्यै
सदयहृदयभावे स्नाहि पञ्चामृतेन।
शशिमृगमदमुस्तागौरसिद्धार्थचूर्णैः
कुसुमजलविमिश्रैः स्वैरमुद्वर्तयाङ्गम् ॥ ११ ॥

परिजनपरिमृष्टे त्वच्छरीरे न याव-
च्छिशिरसलिलधारां कापि चिक्षेप तावत्।
उदयिनि जनमातः सीत्कृते बद्धभावै-
स्त्रिपुरमथनहासैर्व्रीडितं क्रीडितं ते ॥ १२ ॥

अथ विमलितरत्नस्वर्णदुर्वर्णकुम्भै-
स्त्रिभुवनगततीर्थानीतपानीयपूर्णैः।
स्नपयति सुरनारीवृन्दमेतत्तथापि
प्रणयजलमिदं नः स्नानकृत्यं करोतु ॥ १३ ॥

विमलधवलचीनप्रच्छदप्रावृताङ्ग्या-
स्तव शिरसिरुहेभ्यो निर्हरेऽम्भाम्बुबिन्दून्।
अगरुशकलधूपैर्धूप्यतां चाङ्गमङ्गं
सह पशुपतिना त्वं याहि वासोगृहान्तः ॥ १४ ॥

नवविमलविचित्रे वाससी नूतरत्न-
द्युतिरत्नपुनरुक्तापाससंशोभिनी ते।
अथ कुचपरिणाहाच्छादिनीं शंभुनेत्र-
त्रितयभवदमूषां कञ्चुकीमर्पयामि ॥ १५ ॥

नहनमपि कचानां कङ्कतीभिर्विधाय
ग्रथितमणिविभूषां देवि वेणीं करोमि ।
निहितनवकिरीटालम्बिमुक्तालताभि-
स्तलबहलमयूखां चन्द्रलेखां विदध्याम् ॥ १६ ॥
अलिकतलविलम्बिस्फीतसीमन्तमुक्ता-
सरणिघटितहीरास्पष्टचन्द्राचतन्द्रे ।
विविधमणिगणाङ्कोत्तंससंक्लिप्यदस्मा
श्रवणयुगविभूषा देवि तोषाय भूयात् ॥ १७ ॥
विविधविरचनाभिर्भिन्नभिन्ना विभूषा
जनयतु तव कण्ठे देवि कामप्यभिख्याम् ।
गुणिनमपि गिरीशश्लेषदत्तान्तरायं
कठिनकुचयुगाग्रे हारमारोपयामि ॥ १८ ॥
दरतरलविलम्बिस्वर्णसूत्रान्तगुच्छे
जननि तव दिशेतामङ्गदे शर्मकर्म ।
अथ वलयमणीनां रश्मिसंभिन्नमुद्रां
जनयतु पुनरुक्तां शृङ्खलामन्तरीणाम् ॥ १९ ॥
मणिमयरशनाधःक्षुद्रघण्टानिनादा
मणितगुणनिकानां स्मारकाः स्युः शिवस्य ।
मरकतमणिजातं मञ्जुमञ्जीरयुग्मं
रचयतु शशिमौले रञ्जनं सिञ्जितेन ॥ २० ॥
अरुणमणिकृतानामङ्गुलीभूषणानां
प्रभवतु पदमुंस्रैर्लक्षया रञ्जितं ते ।
मृगमदरचितायां पत्रभङ्गीलताया-
मनुभवतु दृगन्तो बन्धनं भूतभर्तुः ॥ २१ ॥
भज जननि हरिद्रां दत्तहारिद्रमुद्रां
कुसुमसलिलतैलक्रान्तकाश्मीरकोशाम् ।

१. किरणैः.

अथ नसि कुरु मुक्तां दन्तवासोनुषक्तां
सितरुचिपुनरुक्तां नन्दितानेकभक्ताम् ॥ २२ ॥
सहजनलिननीले खञ्जने खञ्जनानां
भवनिगडगतानां मोचने लोचने ते ।
जननि गिरिशचेतोरञ्जने मन्दमन्दं
मसृणिमसृणितैस्तैरञ्जनैरञ्जनेयम् ॥ २३ ॥
प्रणतिभिरुपनीतं दीप्तलालाटनेत्र-
प्रतिभटमिव शंभोर्मृत्युबाधाविरोधि ।
शशिन इव मुखेन्दोर्भेदकः कोऽपि धर्मो
जनयतु मुदमुच्चैः कुङ्कुमं रेङ्कुनेत्रे ॥ २४ ॥
युगपदुपगतेन्द्रोपेन्द्ररुद्रादिमौलि-
स्खलमुकुटविघट्टचण्डदण्डाभिघातैः ।
कृतसरणिरजस्रक्रुद्धदौवारिकैस्ते
जननि भव विभूषा प्रेतपद्मासनस्य ॥ २५ ॥
अहमहमिकयाधः पातुकानां सुराणां
प्रपदमपि शरीरे देवि संयोज्य शीघ्रम् ।
करुणरसमयीनां लोचनान्तच्छटानां
कतिपयचलनाभिर्देहि पूजावकाशम् ॥ २६ ॥
अगुरुघुसृणचोरीक्षीरगोरोचनाभि-
र्मलयजमृगनाभिस्फीतकर्पूरपूरैः ।
कुसुमसलिलवृष्टैः कल्पयित्वाङ्गरागं
पटुतरपटवासैर्वासये तेऽङ्गकानि ॥ २७ ॥
कमलकुमुदमल्लीमालतीकुन्दजाती-
बकुलकनकनीपाशोकचाम्पेयकाद्यैः ।
मरुवकतुलसीभिः केतकीबिल्वपत्रै-
र्[illegible] ॥ २८ ॥

१. मुक्तमंजवरने.

हारशेखरवतंसशाटिकाप्रच्छकातुलितकञ्चुकीमुखैः।
मण्डपैर्जवनिकाभिरुच्चकैः कौसुमैस्तव मुदं कदम्बये ॥ २९ ॥

कनकमयहसन्तीकोटिमध्यस्थितानां
मृदुपवनधुतानां दीप्तवैश्वानराणाम्।
अगरुमुपरि हुत्वा गुग्गुलुं सर्जखण्डा-
न्मृतजतुपरिमिश्रं त्वां शिवे धूपयामि ॥ ३० ॥

धूपवर्तितरुमन्तरान्तरा गन्धतैलपरिपूर्णदीपिकाः।
आवहन्तु तव पार्श्वयोस्तरामम्बिके जवनिकापटश्रियम् ॥ ३१ ॥

सुरसुरभिजसर्पिःपूरिते रत्नपात्रे
हिमकिरणरजोभिर्लोडितां तूलवर्तीम्।
तरुणदहनयुक्तामम्ब कृत्वा ददेयं
निरयनिरसनाय प्रस्फुरन्तं प्रदीपम् ॥ ३२ ॥

रजतकनकहीराद्यश्मपात्रेषु मात-
र्विविधरससनाथैश्चोष्यलेह्यप्रपेयैः।
उपहितबहुभक्ष्यैर्व्यञ्जनैश्चारुखाद्यै-
र्जठरदहनतृप्तिं नित्यतृप्ते चरेथाः ॥ ३३ ॥

परस्परकुतूहलैः कवलदानरूपैः शिवे
पुराणतरुणौ युवां चरतमत्र लीलाशितम्।
सुगन्धि सलिलं तथा पिबतमेणनाभीरसैः
सकेसरनिशाकरै रचयतं करोद्वर्तनम् ॥ ३४ ॥

पनसकदलजम्बूकर्कटीहारहूरा-
मलकबदरनिम्बूदुम्बरैर्बीजपूरैः।
अमृतलकुचबिल्वैर्दाडिमीनालिकेरै
रुचिरुचितफलैस्ते वर्धतां चद्वरागा ॥ ३५ ॥

शशिकरधवलानां नागवल्लीदलानां
क्रमुककदरजातीचन्द्रसंयोगभाजाम्।

मृगमदपुरसमुत्स्फीतचूर्णीकृतानां
भजतु जननि रागं त्वन्मुखाम्भोजमेतत् ॥ ३६ ॥
कनकभरितपृथ्वीं मानुपानन्दमाहु-
स्तदुपरि शतकोटिकामुकानन्दमाहुः ।
जननि तव ददेयं दक्षिणां कां तथापि
प्रथय मयि दृगन्तं दक्षिणावीक्षणेन ॥ ३७ ॥
त्रिभुवनकुहरेऽस्मिन्पूरिते वेणुवीणा-
पटुपटहकझिल्लीतालघण्टानिनादैः ।
उरगसुरवधूभिर्गीयमानं समन्ता-
ज्जनयतु पदमुच्चैर्देवि नीराजनं ते ॥ ३८ ॥
प्राणेषु पञ्चसु निधाय षडात्मवृत्ति-
वर्तीश्चिदग्निपरिचुम्बितजातशोभाः ।
नीराजयामि भवतीं भवतीव्रताप-
निर्वापहेतुमधुना मधुनालसाक्षि ॥ ३९ ॥
उरगतुरगहंसीकेकिशार्दूलभृङ्गी-
मदकलकलविङ्कीश्येनपारावतानाम् ।
गतिभिरुपचितोऽयं मौलितः पादमूलं
हरतु दुरितजातं देवि कर्पूरदीपः ॥ ४० ॥
जय देवि जय देवि जय विश्वाधारे
दीनानाथोद्धरणप्रवणे जनसारे ।
त्वत्पदपद्मे पद्मे विधृतव्यापारे
मयि दीने कुरु करुणां करुणामृतपारे ॥ ४१ ॥
अमृतोदधिमध्यस्थितनवरत्नद्वीपे
विष्वग्विकसितसुरतरुनवचम्पकनीपे
नानाकुसुमामोदिनि विधुतागरुधूपे
चिन्तामणिभवनेऽङ्गनतिष्ठत्सुरभूपे ॥ ४२ ॥

माणिक्योज्ज्वलचत्वरसिंहासनशोभे
शवपञ्चकमञ्चेऽञ्चितजनलोचनलोभे ।
सुश्वेतातपवारणचलचामरदम्भे
ध्याये भवतीमनिशं कृतजगदारम्भे ॥ ४३ ॥

दलितजपाकुसुमोपमवसनच्छन्नाङ्गीं
तरुणारुणकरुणप्रदकिरणावलिभङ्गीम् ।
दधतीं रचनां नयने यमुनातारङ्गीं
कलयन्तीं कुचकोशे सुषमां नारङ्गीम् ॥ ४४ ॥

शरपञ्चकबाणासनसृणिपाशोल्लसितां
मलयानिलपरिवाददमुखपद्मश्वसिताम् ।
बालामृतकरमण्डितचूडातटमहितां
ज्योतिस्त्रितयालंकृतनयनत्रयसहिताम् ॥ ४५ ॥

पशुपतियज्ञपट्टुतररोमावलियूपां
मन्मथतस्करगुप्तिक्षमनाभीकूपाम् ।
प्रपदालम्बिशिखामणिवृन्दारकभूपां
कमलासनहरिहरमुखचिन्त्यामितरूपाम् ॥ ४६ ॥

काली बगला बाला तारा भुवनेशी
वाराही मातङ्गी कमला वचनेशी ।
छिन्ना दुर्गा गङ्गा काशी कामेशी
त्वत्तो नान्यत्किंचित्त्वं चिद्रसपेशी ॥ ४७ ॥

त्वं भूमिस्त्वं सलिलं त्वं तेजः प्रबलं
त्वं वायुस्त्वं व्योम त्वं चित्तं विमलम् ।
त्वं जीवस्त्वं चेशस्त्वं ब्रह्मास्यमलं
सत्यानृतयोरन्यत्त्वत्तः किं सकलम् ॥ ४८ ॥

हे त्वं कुरुषे शयने प्रस्वापं

नीला नाभौ कण्ठे शशिभा हृतपापं
वर्षत्यमृतं बिन्दावानन्दावापम् ॥ ४९ ॥
त्वत्पदपद्मे चित्तं त्रिपुरे मे रमतां
तत्रैव प्रतिवेलं मौलिर्मे नमताम्।
यातायातक्लेशः सद्यः संशमतां
याचे भूयो भूयो भवता मे भवताम् ॥ ५० ॥
नृत्यति गायति सुरसं सुरनारीवृन्दे
करतालीदानोत्सुकसुरविततानन्दे।
नीराजनकाले तव मुनिजननुतवेदे
चरणानतसम्राजः परिहृतभवखेदे ॥ ५१ ॥
मिलदलिपटलीभिः केवलं घ्रातपूर्वैः
स्फुटितकुसुमगर्भैः स्वैरसंचारिणीभिः।
उपहितपटवासः पुष्पधूलीकदम्बैः
प्रभवतु पदपाती देवि पुष्पाञ्जलिस्ते ॥ ५२ ॥
सकृदपि विनताङ्घ्रिस्त्वां परिक्रम्य मात-
र्भवति मखफलेषु क्षीणलोभं मनो नः।
सरसिजमकरन्दास्वादतृप्तो मिलिन्दः
क्वचिदपि पिचुमन्दे चित्तवृत्तिं तनोति ॥ ५३ ॥
जननि खलकपोतन्यायतः पादुकाना-
मधिपदकमलं ते मन्दवृन्दारकाणाम्।
भवतु नयनयोस्ते गोचरः कान्तिर्मे
न लसति पुनरुच्चैः स्वैरमुद्धीविका चेत् ॥ ५४ ॥
विमलमुकुरबिम्बं पुण्डरीकातपत्रं

अथ कृतपरिवाराभ्यर्चनं ते समर्प्य
स्तुतिभिरनुपमाभिः पावये स्वां रसज्ञाम् ।
यदपि न रविरश्मिः स्वोपकारं विधत्ते
तदपि कमलमालाम्लानहानिं तनोति ॥ ५६ ॥

श्रवसि विशति यस्य त्वन्मनोरेकवर्णः
सकृदपि विधियोगादम्बिके मानवस्य ।
लघुतरफलमेतद्यत्रिवर्गाश्रयत्वं
परिचरति पुरस्तात्पूरुषार्थश्चतुर्थः ॥ ५७ ॥

हृदयकमलमध्ये त्वां समानीय मातः
पवनभरितनाडीरन्ध्रमुद्राविधिज्ञाः ।
दधति परमधन्याः कुण्डलीस्पर्शहृष्य-
च्छशिगलदमृतौघप्लावजन्यप्रमोदम् ॥ ५८ ॥

वदति विधिकलत्रं त्वां शिवे कोऽपि कश्चि-
त्त्रिपुरमथनपुण्यं श्रीपतेः कोऽपि भाग्यम् ।
प्रकृतिमिति परेऽपि प्रौढविज्ञाननेके
निखिलनिगममूलं मन्महे बोधमेव ॥ ५९ ॥

कदा तव पदाम्बुजस्मरणजातरोमोद्गमः
सदाशिवपदालये जननि मातरित्युद्गिरन् ।
निलीनकरणक्रियश्छिदुरगर्वसर्वंकषा-
मखर्वपदवीं भजे हरिहरादिनिर्भावितान् ॥ ६० ॥

त्वदीयमुखचन्द्रिरे चलितलोचनेन्दीन्दिरे
प्रसादकुलमन्दिरे स्मितवचश्चन्द्रिन्दिरे ।
प्रतापदलनान्दुरे ललितहावकेलीपुरे
हृतस्मरशरान्तरे पुनरतीर्णवं संतरे ॥ ६१ ॥

इदं को जानीते क्षणमपि हृदाधे भजपतां
हृसार्धे व्यालम्ब्य प्रतिफलति हंसः परिणतिः ॥ ६२ ॥
जननि निभृतं यत्ते रूपं वदत्यतिशाश्वतं
लसतु हृदि नो दीपप्रायः स कोऽपि हसात्मकः ।
स्मरणविषये येन स्वैरं स्मरेण विजृम्भता
त्रिपुरमथनः प्रापेशत्वं तदात्मकतां गतः ॥ ६३ ॥
ऋचामाचार्यासि स्तुतिशतजुषां चापि यजुषां
महाधाम्नां साम्नां प्रथितयशसोऽथर्वशिरसः ।
हरित्र्यक्षेशाद्याः मपदकिरणोर्चसमुकुटा-
स्तथातस्त्वां स्तोतुं जनजननि को वा प्रभवतु ॥ ६४ ॥
त्रस्यत्खञ्जनगञ्जनव्यसनिनीमुन्माथिनीं माथतो
जीवंजीवकुलस्य भृङ्गपटलीन्यक्कारबद्धव्रताम् ।
रङ्क्च्छङ्कुविधायिनीं च नलिनश्रीगर्वसर्वंकषां
कारुण्यामृतवर्षिणीं मयि शिवे दृष्टिं मनाक्प्रोदय ॥ ६५ ॥
रिङ्गद्भृङ्गकदम्बडम्बरपरिष्वङ्गप्रसङ्गाकुल-
मत्यूषस्फुरमाणपङ्कजवनीसौभाग्यसर्वंकषः ।
दृक्कोणः करुणाङ्कुराङ्किततनुः कोऽप्यद्रिजे मद्वपुः-
पान्थत्वे तरसा भवेत्परिकरी धन्यस्तदा स्यां न किम् ॥ ६६ ॥
समुद्यन्मार्तण्डप्रसृमरकरालीमसृणया
पदद्वन्द्वानन्दप्रणयिजनरिङ्गत्करुणया ।
ललल्लीलाभाजा परशिवपरिष्वङ्गपरया
धिया चेतः कालं नय गतनय त्वं क्षणमपि ॥ ६७ ॥
त्रैगुद्भिभिरुज्ज्वलोपनिषदां वन्द्यैरधःकल्पितैः

तरुणारुणप्रतिमरम्यरुचिं कुसुमेषुचापसृणिपाशकराम् ।
त्रिगुणात्परां त्रिगुणरूपमयीं भवतीमहर्निशमहं कलये ॥ ६९ ॥
इति निजमतिविभवानुरूपामकृत कविर्भुवि सामराजनामा ।
समयिजनमुदेऽम्बिकासपर्याममृतसुखात्मकताविकासपर्याम् ॥ ७० ॥

इति श्रीसत्यानन्दनाथापरनामधेयसामराजदीक्षितविरचिते पूजारत्ने स्थितं त्रिपुरसुन्दरीमानसपूजनस्तोत्रम् ।

श्रीशंकराचार्यविरचितं
[1]चतुःषष्ट्युपचारमानसपूजास्तोत्रम् ।

उषसि मागधमङ्गलगायनैर्झटिति जागृहि जागृहि जागृहि ।
अतिकृपार्द्रकटाक्षनिरीक्षणैर्जगदिदं जगदम्ब सुखीकुरु ॥ १ ॥
कनकमयवितर्दिशोभमानं दिशि दिशि पूर्णसुवर्णकुम्भयुक्तम् ।
मणिमयगृहमध्यमेहि मातर्मयि कृपया हि समर्चनं ग्रहीतुम् ॥ २ ॥
कनककलशशोभमानशीर्षं जलधरलम्बि समुल्लसत्पताकम् ।
भगवति तव संनिवासहेतोर्मणिमयमन्दिरमेतदर्पयामि ॥ ३ ॥
तपनीयमयी सुतूलिकाकमनीया मृदुलोत्तरच्छदा ।
नवरत्नविभूषिता मया शिबिकेयं जगदम्ब तेऽर्पिता ॥ ४ ॥
कनकमयवितर्दिस्थापिते तूलिकाढ्ये
विविधकुसुमकीर्णे कोटिबालार्कवर्णे ।
भगवति रमणीये रत्नसिंहासनेऽस्मि-
न्नुपविश पदयुग्मं हेमपीठे निधेहि ॥ ५ ॥
मणिमौक्तिकनिर्मितं महान्तं कनकस्तम्भचतुष्टयेन युक्तम् ।
कमनीयतमं भवानि तुभ्यं नवमुल्लोचमहं समर्पयामि ॥ ६ ॥

---

१. अस्य स्तोत्रस्य पुस्तकद्वयं समासादितम्. तत्रैकं क. चिह्नितं जयपुरराजगुरुपं०-नारायणशर्मकराणां नवपत्रात्मकम्. अपरं ख चिह्नितं चातुर्वेदिद्वारकाप्रसादशर्म-

दूर्वया सरसिजान्वितविष्णुक्रान्तयापि सहितं कुसुमाढ्यम्।
पद्मयुग्मसदृशे पदयुग्मे पाद्यमेतदुररीकुरु मातः॥ ७॥
गन्धपुष्पयवसर्षपदूर्वासंयुतं तिलकुशाक्षतमिश्रम्।
हेमपात्रनिहितं सह रत्नैरर्घ्यमेतदुररीकुरु मातः॥ ८॥
जलजद्युतिना करेण जातीफलकङ्कोललवङ्गगन्धयुक्तैः।
अमृतैरमृतैरिवातिशीतैर्भगवत्याचमनं विधीयताम्॥ ९॥
निहितं कनकस्य संपुटे पिहितं रत्नपिधानकेन यत्।
तदिदं भवतीकरेऽर्पितं मधुपर्कं जननि प्रगृह्यताम्॥ १०॥
एतच्चम्पकतैलमम्ब विविधैः पुष्पैर्मुहुर्वासितं
न्यस्तं रत्नमये सुवर्णचषके भृङ्गैर्भ्रमद्भिर्वृतम्।
सानन्दं सुरसुन्दरीभिरभितो हस्ते धृतं तन्मया
केशेषु भ्रमरभ्रमेषु सकलेष्वङ्गेषु चालिप्यते॥ ११॥
मातः कुङ्कुमपङ्कनिर्मितमिदं देहे तवोद्वर्तनं
भक्त्याहं कलयामि हेमरजसा संमिश्रितं केसरैः।
केशानामलकैर्विशोध्य विशदान्कस्तूरिकार्चितैः
स्नानं ते नवरत्नकुम्भविधिना संवासितोष्णोदकैः॥ १२॥
दधिदुग्धघृतैः समाक्षिकैः सितया शर्करया समन्वितैः।
स्नपयामि वताहमादृतो जननि त्वां पुनरुष्णवारिभिः॥ १३॥
एलोशीरसुवासितैः सकुसुमैर्गङ्गादितीर्थोदकै-
र्माणिक्यैद्रवमौक्तिकामृतरसैः स्वच्छैः सुवर्णोदकैः।
मन्त्रान्वैदिकतान्त्रिकान्परिपठन्सानन्दमत्यादरा-
त्स्नानं ते परिकल्पयामि जननि स्नानं त्वमङ्गीकुरु॥ १४॥
बालार्कद्युति दाडिमीयकुसुमप्रस्पर्धि सर्वोत्तमं
मातस्त्वं परिधेहि दिव्यवसनं भक्त्या मया कल्पितम्।

नवरत्नमये मयार्पिते कमनीये तपनीयपादुके ।
सविलासमिदं पदद्वयं कृपया देवि तयोर्निधीयताम् ॥ १६ ॥

बहुभिरगुरुधूपैः सादरं धूपयित्वा
भगवति तव केशान्कङ्कतैर्मार्जयित्वा ।
सुरभिभिररविन्दैश्चम्पकैश्चार्चयित्वा
झटिति कनकसूत्रैर्जूटयन्वेष्टयामि ॥ १७ ॥

सौवीराञ्जनमिदमम्ब चक्षुषोस्ते विन्यस्तं कनकशलाकया मया यत् ।
तन्यूनं मलिनमपि त्वदक्षिसङ्गाद्ब्रह्मेन्द्राद्यभिलषणीयतामियाय ॥ १८ ॥

मञ्जीरे पदयोर्निधाय रुचिरां विन्यस्य काञ्चीं कटौ
मुक्ताहारमुरोजयोरनुपमां नक्षत्रमालां गले ।
केयूराणि भुजेषु रत्नवलयश्रेणीं करेषु क्रमा-
त्ताटङ्के तव कर्णयोर्विनिदधे शीर्षे च चूडामणिम् ॥ १९ ॥

धम्मिल्ले तव देवि हेमकुसुमान्याधाय भालस्थले
मुक्ताराजिविराजमानतिलकं नासापुटे मौक्तिकम् ।
मातर्मौक्तिकजालिकां च कुचयोः सर्वाङ्गुलीषूर्मिकाः
कट्यां काञ्चनकिङ्किणीर्विनिदधे रत्नावतंसं श्रुतौ ॥ २० ॥

मातर्भालतले तवातिविमले काश्मीरकस्तूरिका-
कर्पूरागरुभिः करोमि तिलकं देहाङ्गरागं तव ।
वक्षोजादिषु यक्षकर्दमरसं सिक्तासु पुष्पाक्षतैः
पादौ कुङ्कुमलेपनादिभिरिदं संपूजयामि क्रमात् ॥ २१ ॥

रत्नाक्षतैस्त्वां परिपूजयामि मुक्ताफलैर्वा रुचिरैरविद्धैः ।
अखण्डितैर्देवि यवादिभिर्वा काश्मीरपङ्काङ्किततण्डुलैर्वा ॥ २२ ॥

जननि चम्पकतैलमिदं पुरो मृगमदोऽयमिदं पटवासकम् ।
सुरभिगन्धमिदं च चतुःसमं सपदि सर्वमिदं प्रतिगृह्यताम् ॥ २३ ॥

सीमन्ते ते भगवति मया सादरं न्यस्तमेत-
त्सिन्दूरं ते हृदयकमले हर्षवर्षं तनोतु ।

१. 'पुत' ख. २. 'मन्यताम्' क. ३. '[illegible]' ख. ४. '[illegible]'

[illegible] ॥ २४ ॥

[illegible]
[illegible] ।
[illegible]
नानाविधानि कुसुमानि च तेऽर्पयामि ॥ २५ ॥

[illegible] ।
[illegible] पूजयामि जगदम्ब ते वपुः ॥ २६ ॥

पारिजातशतपत्रपाटलैर्मल्लिकावकुलचम्पकादिभिः ।
अम्बुजैः कुसुमैश्च सादरं पूजयामि जगदम्ब ते वपुः ॥ २७ ॥

लाक्षासंमिलितैः सिताभ्रसहितैः श्रीवाससंमिश्रितैः
कर्पूराकलितैः सितामधुयुतैर्गोसर्पिषा लोडितैः ।
श्रीखण्डागरुगुग्गुलुप्रभृतिभिर्नानाविधैर्वस्तुभि-
र्धूपं ते परिकल्पयामि जननि स्नेहात्त्वमङ्गीकुरु ॥ २८ ॥

रत्नालंकृतहेमपात्रनिहितैर्गोसर्पिषा दीपितै-
र्दीपैर्दीर्घतरान्धकारभिदुरैर्बालार्ककोटिप्रभैः ।
आताम्रज्वलदुज्ज्वलज्ज्वलनवद्रत्नप्रदीपैः सदा
मातस्त्वामहमादरादनुदिनं नीराजयाम्युच्चकैः ॥ २९ ॥

मातस्त्वां दधिदुग्धपायसमहाशाल्यन्नसंतानिकाः
सूपापूपसिताघृतैः सवटकैः सक्षुद्ररम्भाफलैः ।
एलाजीरकहिङ्गुनागरनिशाकस्तूरिकासंस्कृतैः
शाकैः साकमहं सुधाधिकरसैः संतर्पयाम्यम्बिके ॥ ३

सापूपसूपदधिदुग्धसिताघृतानि
सुस्वादुभक्ष्यपरमान्नपुरःसराणि ।

१. '[illegible]' क. २. 'कुरण्ट' क. ३. 'अम्बुजैश्च कुसुमैश्च' ख. ४. '[illegible]' क. ५. '[illegible]दीपितैः' क. ६. 'प्रदीपैस्तथा' ख. ७. 'कुस्तुम्बरीसंस्कृतैः'

शाकोलसन्मरिचजीरकबाल्हिकानि
भक्ष्याणि भक्ष जगदम्ब मयार्पितानि ॥ ३१ ॥
क्षीरमेतदिदमुत्तमोत्तमं प्राज्यमाज्यमिदमुत्तमं मधु ।
मातरेतदमृतोपमं त्वया संभ्रमेण परिपीयतां मुहुः ॥ ३२ ॥
उष्णोदकैः पाणियुगं मुखं च प्रक्षाल्य मातः कलधौतपात्रे ।
कर्पूरमिश्रेण सकुङ्कुमेन हस्तौ समुद्वर्तय चन्दनेन ॥ ३३ ॥
अतिशीतमुशीरवासितं तपनीयावपने निवेदितम् ।
पटपूतमिदं जितामृतं शुचि गङ्गामृतमम्ब पीयताम् ॥ ३४ ॥
जम्ब्वाम्ररम्भाफलसंयुतानि द्राक्षाफलक्षोडसमन्वितानि ।
सनालिकेराणि सदाडिमानि फलानि ते देवि समर्पयामि ॥ ३५ ॥
कलिङ्गकोशातकिसंयुतानि जम्बीरनारङ्गसमन्वितानि ।
सबीजपूराणि सबादराणि फलानि ते चाम्ब समर्पयामि ॥ ३६ ॥
कर्पूरेण युतैर्लवङ्गसहितैः कङ्कोलचूर्णान्वितैः
सुस्वादुक्रमुकैः सगौरखदिरैः सुस्निग्धजातीफलैः
मातः केतकपत्रपाण्डुरुचिभिस्ताम्बूलवल्लीदलैः
सानन्दं मुखमण्डनीयमतुलं ताम्बूलमङ्गीकुरु ॥ ३७ ॥
एलालवङ्गादिसमन्वितानि कङ्कोलकर्पूरसमिश्रितानि ।
ताम्बूलवल्लीदलसंयुतानि पूगानि ते देवि समर्पयामि ॥ ३८ ॥
ताम्बूलवल्लिदलनिर्जितहेमवर्ण
स्वर्णाक्तपूगफलमौक्तिकचूर्णयुक्तम् ।
रत्नस्रगिस्थितमिदं खदिरेण युक्तं
ताम्बूलमम्ब वदनाम्बुरुहे गृहाण ॥ ३९ ॥
महति कनकपात्रे स्थापयित्वा विशाला-
न्डमरुसदृशरूपान्बद्धगोधूमदीपान् ।
बहुघृतमथ तेषु न्यस्य दीपानुकम्पा-
न्भुवनजननि कुर्वे नित्यमारार्तिकं ते ॥ ४० ॥

१. 'भुङ्क्ष्व' ख. २. 'तपनीयाचमनीवे०' ख. ३. 'आनाम' ख. ४. 'कुष्माण्डी'

सविनयमथ दत्त्वा जानुयुग्मं धरण्यां
सपदि शिरसि धृत्वा पात्रमारार्तिकस्य ।
मुखकमलसमीपे तेऽम्ब सार्धं त्रिवारं
भ्रमयति मयि भूयात्ते कृपार्द्रः कटाक्षः ॥ ४१ ॥
अथ बहुमणिमिश्रैर्मौक्तिकैस्त्वां विकीर्य
त्रिभुवनकमनीयैः पूजयित्वा च वस्त्रैः ।
मिलितविविधमुक्तादिव्यलावण्ययुक्तां
जननि कनकवृष्टिं दक्षिणां तेऽर्पयामि ॥ ४२ ॥
मातः काञ्चनदण्डमण्डितमिदं पूर्णेन्दुबिम्बप्रभं
नानारत्नविशोभिहेमकलशं लोकत्रयाह्लादकम् ।
भास्वन्मौक्तिकजालिकापरिवृतं प्रीत्यात्महस्ते धृतं
छत्रं ते परिकल्पयामि शिरसि त्वष्ट्रा स्वयं निर्मितम् ॥ ४३ ॥
शरदिन्दुमरीचिगौरवर्णैर्मणिमुक्ताविलसत्सुवर्णदण्डैः ।
जगदम्ब विचित्रचामरैस्त्वामहमानन्दभरेण वीजयामि ॥ ४४ ॥
मार्तण्डमण्डलनिभो जगदम्ब योऽयं
भक्त्या मया मणिमयो मुकुरोऽर्पितस्ते ।
पूर्णेन्दुबिम्बरुचिरं वदनं स्वकीय-
मस्मिन्विलोकय विलोलविलोचने त्वम् ॥ ४५ ॥
इन्द्रादयो नतिनतैर्मुकुटप्रदीपै-
र्नीराजयन्ति सततं तव पादपीठम् ।
तस्मादहं तव समस्तशरीरमेत-
न्नीराजयामि जगदम्ब सहस्रदीपैः ॥ ४६ ॥
प्रियगतिरतितुङ्गो रत्नपल्याणयुक्तः
कनकमयविभूषः स्निग्धगम्भीरघोषः ।
भगवति कलितोऽयं वाहनार्थं मया ते
तुरगशतसमेतो वायुवेगस्तुरङ्गः ॥ ४७ ॥

१. '[illegible]' ख. २. '[illegible]' [illegible] ख. ३. '[illegible]'
ख.

मधुकरवृतकुम्भे न्यस्तसिन्दूररेणुः
कनककलितघण्टः किङ्किणीशोभिकण्ठः ।
श्रवणयुगलचञ्चच्चामरो मेघतुल्यो
जननि तव मुदे स्तान्मत्तमातङ्ग एषः ॥ ४८ ॥

द्रुततरतुरगैर्विराजमानं मणिमयचक्रचतुष्टयेन युक्तम् ।
कनकमयमहं वितानवन्तं भगवति ते हि रथं समर्पयामि ॥ ४९ ॥

हयगजरथपत्तिशोभमानं दिशि दिशि दुंदुभिमेघनादयुक्तम् ।
अतिबहुचतुरङ्गसैन्यमेतद्भगवति भक्तिभरेण तेऽर्पयामि ॥ ५० ॥

परिखीकृतसप्तसागरं बहुसंपत्सहितं मयाम्ब ते ।
विपुलं धरणीतलाभिधं प्रबलं दुर्गमिदं समर्पितम् ॥ ५१ ॥

शतपत्रयुतैः स्वभावशीतैरतिसौरभ्ययुतैः परागपीतैः ।
भ्रमरीमुखराकृतैरनन्तैर्व्यजनैस्त्वां जगदम्ब वीजयामि ॥ ५२ ॥

भ्रमरलुलितलोलकुन्तलाली विगलितमाल्यविकीर्णरङ्गभूमिः ।
इयमतिरुचिरा नटी नटन्ती तव हृदये मुदमातनोतु मातः ॥ ५३ ॥

मुखनयनविलासलोलवेणीविलसितनिर्जितलोलभृङ्गमालाः ।
युवजनसुखकारिचारुलीला भगवति ते पुरतो नटन्ति बालाः ॥ ५४ ॥

रुचिरकुचतटीनां नाट्यकाले नटीनां
प्रतिगृहमथ तत्र प्रत्यहं प्रादुरासीत् ।
धिमिकिटिधिमिधिद्धी धिद्धिधिद्धीधिमिद्धी
धिमिकिटिधिमितथाथेयथेयेति शब्दः ॥ ५५ ॥

भ्रमदलिकुलतुल्या लोलधम्मिल्लभारा
स्मितमुखकमलोद्यद्दिव्यलावण्यपूरा ।
अनुपमतमवेषा वारयोषा नटन्ती
परभृतकलकण्ठी देवि धैर्यं तनोतु ॥ ५६ ॥

डमरुडिण्डिमझर्झरझल्ली मृदुरवार्द्रपटार्द्रपटाहयः ।

विपञ्चीषु सप्त स्वरान्वादयन्त्यस्तव द्वारि गायन्ति गन्धर्वकान्ताः ।
शनैः सावधानेन चित्तेन मातः समाकर्णय त्वं मया प्रार्थितासि ॥५८॥

अभिनयकमनीयैर्नर्तनैर्नर्तकीनां
क्षणमथ रमयित्वा चेत एवं त्वदीयम् ।
स्वयमहमपि चित्रैर्नृत्यरागप्रगीतै-
र्भगवति भवदीयं मानसं रञ्जयामि ॥ ५९ ॥

तव देवि गुणानुवर्णने चतुरा नो चतुराननादयः ।
तदिहैकमुखेषु जन्तुषु स्तवनं कस्तव कर्तुमीश्वरः ॥ ६० ॥
पदे पदे या परिपूजकेभ्यः सद्योऽश्वमेधादिफलं ददाति ।
तां सर्वपापक्षयहेतुभूतां प्रदक्षिणां ते परिकल्पयामि ॥ ६१ ॥
रक्तोत्पलारक्तलताप्रभाभ्यां ध्वजोर्ध्वरेखाकुलिशाङ्किताभ्याम् ।
अशेषवृन्दारकवन्दिताभ्यां नमो भवानीपदपङ्कजाभ्याम् ॥ ६२ ॥

चरणनलिनयुग्मं पङ्कजैः पूजयित्वा
कनककमलमालां कण्ठदेशेऽर्पयित्वा ।
शिरसि विनिहितोऽयं रत्नपुष्पाञ्जलिस्ते
हृदयकमलमध्ये देवि हर्षं तनोतु ॥ ६३ ॥

अथ मणिमयमञ्चकाभिरामे श्रुतिमति पुष्पवितानराजमाने ।
प्रसरदगरुधूपधूपितेऽस्मिन्भगवति वासगृहेऽस्तु ते निवासः ॥६४॥
तव देवि सरोजचिह्नयोः पदयोर्निर्जितपद्मरागयोः ।
अतिरक्ततरैरलक्तकैः पुनरुक्तां रचयामि रक्तताम् ॥ ६५ ॥
अथ मारुतशीतवासितं निजताम्बूलरसेन रञ्जितम् ।
तपनीयमये हि पट्टके मुखगण्डूषजलं निधीयताम् ॥ ६६ ॥
एतस्मिन्मणिखचिते सुवर्णपीठे त्रैलोक्याभयवरदे निधाय पादौ ।
विस्तीर्णे मृदुतरतोत्तरच्छदेऽस्मिन्पर्यङ्के कनकमये निषीद मातः ॥६७॥
क्षणमथ जगदम्ब मञ्चकेऽस्मिन्मृदुतरतूलिकया विराजमाने ।
अतिरहसि मुदा शिवेन सार्धं सुखशयनं कुरु मां हृदि स्मरन्ती ॥६८॥

मुक्ताकुन्देन्दुगौरां मणिमयमुकुटां रत्नताटङ्कयुक्ता-
मक्षस्रक्पुष्पहस्तामभयवरकरां चन्द्रचूडां त्रिनेत्राम् ।
नानालंकारयुक्तां सुरमुकुटमणिद्योतितस्वर्णपीठां
सानन्दां सुप्रसन्नां त्रिभुवनजननीं चेतसा चिन्तयामि ॥ ६९ ॥

एषा भक्त्या तव विरचिता या मया देवि पूजा
स्वीकृत्यैनां सपदि सकलान्मेऽपराधान्क्षमस्व ।
न्यूनं यत्तत्तव करुणया पूर्णतामेति सर्वं
सानन्दं मे हृदयकमले तेऽस्तु नित्यं निवासः ॥ ७० ॥

पूजामिमां पठेत्प्रातः पूजां कर्तुमनीश्वरः ।
पूजाफलमवाप्नोति वाञ्छितार्थं च विन्दति ॥ ७१ ॥

प्रत्यहं भक्तिसंयुक्तो यः पूजनमिदं पठेत् ।
वाग्वादिन्याः प्रसादेन वत्सरात्स कविर्भवेत् ॥ ७२ ॥

पूजामिमां यः पठति प्रभाते मध्याह्नकालेऽप्यथवा प्रदोषे ।
धर्मार्थकामान्पुरुषोऽभ्युपैति देहावसाने शिवतामुपैति ॥ ७३ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितचतुःषष्ट्युपचार-
मानसपूजास्तोत्रं समाप्तम् ।
